

श्रीविनयकुशलरचितम्

# मण्डलविचारप्रकरणम्

(स्वोपज्ञवृत्तिसहितम्)

श्रीविनयकुशलरचितम्

# ॥मण्डलविचारप्रकरणम्॥

(स्वोपज्ञवृत्तिसहितम्)

श्रुतभवनसंशोधनकेन्द्रम्

पुणे

| | | |
|---|---|---|
| **ग्रंथनाम** | : | मण्डलविचारप्रकरणम् (स्वोपज्ञवृत्तिसहितम्) |
| **कर्ता** | : | श्रीविनयकुशलजी. म. |
| **सम्पादक** | : | मुनिवैराग्यरतिविजयगणी |
| **सहसम्पादन** | : | भूपत वंश (एम. ए.) |
| **विषय** | : | तत्त्वज्ञान, खगोल |
| **भाषा** | : | प्राकृत, संस्कृत |
| **प्रकाशक** | : | शुभाभिलाषा (रिलिजियस) ट्रस्ट (E-18511, Ahmedabad) |
| **पत्र** | : | १८ + १३० = १४८ |
| **आवृत्ति** | : | प्रथम, वि.सं.२०७३, ई.२०१७ |
| **मूल्य** | : | १५०/- |
| **स्वामित्व** | : | श्रमणसंस्थाधीनशुभाभिलाषाविश्वस्तधार्मिकसंस्थानम्। |

**-: प्राप्तिस्थल :-**

**पुणे** : **श्रुतभवन संशोधन केन्द्र,**
४७/४८ अचल फार्म, आगममंदिर से आगे,
सच्चाइ माता मंदिर के पास, कात्रज, पुणे-४११ ०४६
Mo. ७७४४००५७२८ (9-00 a.m. to 5-00 p.m.)
www.shrutbhavan.org Email: shrutbhavan@gmail.com

**अहमदाबाद** : **श्रुतभवन (अहमदाबाद शाखा)**
उमंग शाह, अर्हम् फ्लेक्सीपेक, २०१, तीर्थराज काम्प्लेक्स, एलीसब्रीज,
वी. एस. हॉस्पिटल के सामने, मादलपुर, अहमदाबाद-६
Mo. ९८२५१२८४८६

**मुंबई** : **श्री गौरवभाई शाह**
सी/१११, जैन एपार्टमेंट, ६० फीट रोड, देवचंद नगर रोड, भायंदर (वेस्ट)
मुंबई-४०११०१. मो.०९८३३१३९८८३

**सुरत** : **श्री मितुलभाई धनेशा**
C/o. सिया मेन्युफेक्चरींग, सुखदेव काम्प्लेक्स,
२ री मंझिल, टोरंट पावर हाऊस के पास, वास्तादेवी रोड,
कतारगाम, सुरत-३९५००४ मो. ०९३७७०५९६७३

**मुद्रण** : नूतन आर्ट, अहमदाबाद

## પ્રકાશકીય

પરમાત્મા શ્રી મહાવીર દેવે જગતને બે અણમોલ ભેટ આપી છે - અહિંસા અને અનેકાંત. 'અહિંસા અને અનેકાંતના સહારે આત્મધ્યાનની સાધના' ભગવાનના ઉપદેશનું કેંદ્રબિંદુ છે. ભગવાનનો આ ઉપદેશ આગમ અને શાસ્ત્રોના માધ્યમથી પ્રવાહિત થયો છે. આગમ અને શાસ્ત્રો જૈનધર્મની માત્ર ધરોહર જ નથી પરંતુ અણમોલ વિરાસત પણ છે. પરમાત્મના નિર્વાણના એક હજાર વર્ષ પછી આગમ અને શાસ્ત્રો લખાયા. શરુઆતમાં તાડપત્રો ઉપર અને ત્યાર પછી કાગળ ઉપર શાસ્ત્રો લખવામાં આવતા હતા. આજે શ્રી સંઘ પાસે હાથથી લખેલી દશ લાખ હસ્તપ્રતો છે. મુદ્રણ યુગ શરુ થયા પછી આગમ અને શાસ્ત્રો છપાવા લાગ્યા.

લેખન અને મુદ્રણ કરતી વખતે આગમ અને શાસ્ત્રોમાં માનવ સહજ સ્વભાવવશ ભૂલો થઇ છે. આજે ઘણાં શાસ્ત્રો મુદ્રિત રૂપે મળે છે જેનું સંશોધન આજે પણ બાકી છે, જે માત્ર પ્રાચીન તાડપત્ર ઉપર લખેલી હસ્તપ્રતોના આધારે થઇ શકે છે. શ્રુતભવનનું લક્ષ્ય આના મુખ્ય આધારે સંશોધન કાર્ય કરવાનું છે. સંશોધન કાર્ય કરવા માટે અમારી સંચાલન સમિતિએ વિશેષજ્ઞ પંડિતોની નિમણૂક કરી છે જેઓ ટ્રેનીંગ મેળવીને **પૂ. મુનિશ્રી વૈરાગ્યરતિ વિ.** ગણિવરના માર્ગદર્શન પ્રમાણે આ કાર્યમાં સંલગ્ન છે. આ કામમાં અનેક સમુદાયોના વિશેષજ્ઞ આચાર્યભગવંતોનું માર્ગદર્શન અને સહાય મળી રહી છે. કાર્યની વિશાળતા, મહત્તા અને ઉપયોગિતા જોતાં આગામી સમયમાં પંડિતોની સંખ્યા વધારવાનો ઇરાદો છે.

આની સાથે બીજું પણ આયોજન છે, આજ સુધી જે શાસ્ત્ર મુદ્રિત રૂપમાં ઉપલબ્ધ નથી તેનું સંશોધન કરીને પ્રકાશિત કરવા. આ શાસ્ત્રોને બે વિભાગમાં વહેંચી શકાય છે. સાધુ ઉપયોગી અને ગૃહસ્થ ઉપયોગી. ગૃહસ્થ ઉપયોગી શાસ્ત્રોનો સરળ સારાંશ કરીને અંગ્રેજી, હિન્દી અને ગુજરાતી ભાષામાં પ્રસ્તુત કરવામાં આવશે.

પરમ ઉપકારી પરમ પૂજ્ય આચાર્યદેવ શ્રીમદ્ વિજય **રામચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પૂજ્ય ગુરુદેવ મુનિપ્રવરશ્રી **વૈરાગ્યરતિવિજયજી ગણિવર**ના માર્ગદર્શન હેઠળ શ્રુતભવન

સંશોધન કેંદ્રના સહાયક સંપાદક શ્રી ભૂપત વંશે આ સંપાદન તૈયાર કર્યું છે. પ્રાચીન કૃતિઓનું પ્રકાશન કરવા દ્વારા હસ્તપ્રતોમાં સચવાયેલા શાશ્વત જ્ઞાનને ભવિષ્યની પેઢી સુધી પહોંચાડવાનો લાભ અમને પ્રાપ્ત થયો તેનો આનંદ છે.

આ ગ્રંથના પ્રકાશનનો લાભ **શ્રી ચિંતામણી પાર્શ્વનાથ જૈન શ્વેતાંબર મંદિર તથા મૂર્તિપૂજક સંઘ, નાશિકે** જ્ઞાનનિધિમાંથી લીધો છે. તેમની શ્રુતભક્તિની હૃદયપૂર્વક અનુમોદના.

શ્રુતભવનમાં કાર્યરત સંપાદકગણ તેમજ શ્રુતભવન સંશોધન કેંદ્રની તમામ પ્રવૃત્તિનાં મુખ્ય આધારસ્તંભ માંગરોળ (ગુજરાત) નિવાસી **માતુશ્રી ચંદ્રકલાબેન સુંદરલાલ શેઠ પરિવાર** તેમ જ અન્ય સહુ લાભાર્થીઓ પ્રત્યે આભારની લાગણી વ્યક્ત કરૂં છું.

**ભરત શાહ**
(માનદ અધ્યક્ષ)

**શ્રુતપ્રેમી**

**શ્રી ચિંતામણી પાર્શ્વનાથ જૈન શ્વેતાંબર મંદિર**

**તથા મૂર્તિપૂજક સંઘ**

પારસનાથ લેન, ભદ્રકાલી,

નાશિક

(જ્ઞાનદ્રવ્યમાંથી)

# अनुक्रम


| | | | |
|---|---|---|---|
| | સંપાદકીય | | ९ |
| | निवेदनम्  पू. प्र.श्री चतुरवि.म. | | १४ |
| | **विषयः** | **गाथाङ्कः** | **पत्राङ्क** |
| (१) | मङ्गलाचरणं प्रतिज्ञा च | १ | ३ |
| (२) | सार्धद्वीपद्वयसमुद्रद्वयगतचन्द्रसूर्याणां सङ्ख्या | २ | ३ |
| (३) | नरलोके चन्द्रसूर्याणां सङ्ख्या | ३ | ३ |
| (४) | चन्द्रसूर्याणां पङ्क्तयः संस्थितिश्च | ४ | ४ |
| (५) | नक्षत्राणां पङ्क्तिस्वरूपम् | ५ | ५ |
| (६) | ग्रहाणां पङ्क्तिस्वरूपम् | ६ | ५ |
| (७) | चन्द्रादीनां भ्रमणस्वरूपम् | ७ | ६ |
| (८) | जम्बूद्वीपे चन्द्रादीनां चारभूमिविष्कम्भमानम् | ८ | ७ |
| (९) | जम्बूद्वीपे चन्द्रसूर्यमण्डलसङ्ख्या | ९ | ७ |
| (१०) | चन्द्रसूर्यमण्डलानामन्तरम् | १० | ८ |
| (११) | जम्बूद्वीपे निषधे च चन्द्रसूर्ययोः मण्डलानि | ११-१२ | ८ |
| (१२) | मण्डलस्वरूपम् | १३-१६ | ९ |
| (१३) | चन्द्रसूर्ययोः मण्डलस्थयोर्मिथो विष्कम्भान्तरम् | १७ | ११ |
| (१४) | सर्वाभ्यन्तरबाह्यपरिधी | १८-१९ | १२ |
| (१५) | चन्द्रस्य मुहूर्तगतिः | २० | १२ |
| (१६) | सूर्यस्य मुहूर्तगतिः | २१ | १३ |
| (१७) | नक्षत्राणां मुहूर्तगतिः | २२ | १३ |
| (१८) | चन्द्रस्य मण्डलभ्रमिमुहूर्तमानम् | २३-२४ | १३ |
| (१९) | सूर्यस्य मुहूर्तगतिकरणम् | २५ | १४ |
| (२०) | नक्षत्रस्य मुहूर्तगतिकरणम् | २६-२७ | १५ |
| (२१) | सर्वमण्डलेषु सूर्यस्योदयास्तान्तरं दिनमानं च | २८-३० | १६ |

| | | | |
|---|---|---|---|
| (२२) | तारकसङ्ख्या | ३१ | १८ |
| (२३) | सूर्यचन्द्रयोः प्रकाशक्षेत्रे हानिवृद्धी | ३२ | १९ |
| (२४) | सूर्यस्य तापक्षेत्रे भागाः | ३३-३८ | २० |
| (२५) | उत्कृष्टदिवसे जम्बूद्वीपे सूर्योदयः | ३९-४० | २६ |
| (२६) | सूर्यस्य पश्चादग्रे च तापक्षेत्रम् | ४१ | २६ |
| (२७) | जम्बूद्वीपे प्रतिदिवसं तेजसः हानिवृद्धी | ४२ | २७ |
| (२८) | शेषमनुष्यलोकस्थसर्वसूर्यवक्तव्यता | ४३ | २७ |
| (२९) | पुष्करार्धे चरमसूर्यस्य तेजःप्रसरः | ४४ | २८ |
| (३०) | सूर्याणां दशभागादिस्वरूपम् | ४५ | २९ |
| (३१) | सूर्याणां तापक्षेत्रवृद्धिहानी | ४६ | २९ |
| (३२) | जम्बूद्वीपबाह्यसूर्याणां मण्डलसङ्ख्या मण्डलान्तरप्रमाणं चारक्षेत्रविष्कम्भमानं च | ४७ | २९ |
| (३३) | जम्बूद्वीपबाह्यचन्द्राणां मण्डलसङ्ख्या मण्डलान्तरप्रमाणं चारक्षेत्रविष्कम्भमानं च | ४८ | २९ |
| (३४) | जम्बूद्वीपादिषु दिङ्निर्णयः | ४९-५० | ३० |
| (३५) | सूर्यस्य दिशः | ५१ | ३१ |
| (३६) | षट्सु दिक्षु जम्बूद्वीपगतसूर्ययोः करप्रसरः | ५२-५७ | ३१ |
| (३७) | दिवसरात्रिस्थानानि | ५८-५९ | ३३ |
| (३८) | प्रतिद्वीपं प्रतिसमुद्रं च दिवसो रात्रिश्च | ६० | ३४ |
| (३९) | पश्चिममहाविदेहैरावतपूर्वमहाविदेहेषु दिनरात्रिमानम् | ६१-६२ | ३४ |
| (४०) | रात्रिमाननिर्णयः | ६३ | ३५ |
| (४१) | शेषमनुष्यलोके दिनरात्रिप्रमाणम् | ६४ | ३५ |
| (४२) | जम्बूद्वीपादिष्वष्टप्रहरकालनिर्णयः | ६५ | ३६ |
| (४३) | चन्द्रस्य विशेषस्वरूपम् | ६६ | ३६ |
| (४४) | राहुस्वरूपम् | ६७ | ३६ |
| (४५) | चन्द्रस्य वृद्धिहानिस्वरूपं चन्द्रस्य आवरणमोचनस्वरूपे मतत्रयं च | ६८-६९ | ३७ |
| (४६) | सितकृष्णपक्षस्वरूपम् | ७० | ३९ |
| (४७) | चन्द्रस्य दिनरात्र्युदयस्वरूपम् | ७१-७६ | ४० |
| (४८) | पर्वराहुस्वरूपम् | ७७ | ४१ |
| (४९) | ग्रहणस्वरूपम् | ७८ | ४१ |
| (५०) | चन्द्रसूर्याणां दक्षिणोत्तरचारः | ७९ | ४२ |

| | | | |
|---|---|---|---|
| (५१) | नक्षत्रतारकयोः स्वरूपम् | ८० | ४५ |
| (५२) | मण्डलेषु नक्षत्राणि | ८१-८५ | ४६ |
| (५३) | नक्षत्रमण्डलानाम् अवस्थिततत्वम् | ८६ | ४६ |
| (५४) | नक्षत्राणां चन्द्रेण सह कालयोगः | ८७ | ४७ |
| (५५) | पञ्चदशमुहूर्तानि नक्षत्राणि | ८८ | ४७ |
| (५६) | पञ्चचत्वारिंशन्मुहूर्तानि नक्षत्राणि | ८९ | ४८ |
| (५७) | त्रिंशन्मुहूर्तानि नक्षत्राणि | ९० | ४८ |
| (५८) | नक्षत्रपटले ऊर्ध्वाधोमध्यविभागः | ९१ | ४९ |
| (५९) | नक्षत्रतारकाणां मण्डलस्वरूपम् | ९२ | ५० |
| (६०) | ज्योतिश्चक्रावस्थितिः | ९३ | ५० |
| (६१) | तिर्यक्तारकाणां प्रचारः | ९४ | ५० |
| (६२) | लवणसमुद्रे चन्द्रसूर्यादिज्योतिष्काणां व्याघाताभावकारणम् | ९५ | ५२ |
| (६३) | लवणशिखायां ज्योतिष्काणामूर्ध्वं तेजःप्रसरः | ९६ | ५२ |
| (६४) | मनुष्यलोकबहिर्वर्तिज्योतिष्काणां स्वरूपम् | ९७ | ५ |
| (६५) | उपसंहारः | ९८-९९ | ५४ |
| (६६) | टीकाकृत्प्रशस्तिः। | | ५४ |


**परिशिष्टाणि**


| | | |
|---|---|---|
| (१) | परिशिष्टं प्रथमम्—मण्डलविचारप्रकरणं मूलमात्रम्। | ५७ |
| (२) | परिशिष्टं द्वितीयम्—मण्डलविचारप्रकरणस्य अकारादिक्रमः। | ६१ |
| (३) | परिशिष्टं तृतीयम्—उद्धरणसङ्केतसूचिः। | ६३ |
| (४) | परिशिष्टं चतुर्थम्—मण्डलविचारप्रकरणपूर्ववाचना। | ६५ |
| (५) | परिशिष्टं पञ्चमम्—चन्द्रसूर्यादिमण्डलविचारः। (कर्ता-आ.श्रीमुनिचन्द्रसू.) | ९६ |
| (६) | परिशिष्टं षष्ठम्—कालशतकम्।(कर्ता-आ.श्रीमुनिचन्द्रसू.) (सं. मु.श्रीत्रैलोक्यमण्डनवि. म.) | १०० |
| (७) | परिशिष्टं सप्तमम्—पारिभाषिकशब्दसूचिः। | १०८ |
| (८) | परिशिष्टं अष्टमम् —विशेषनामसूचिः। | १२० |
| (९) | परिशिष्टं नवमम्—सन्दर्भग्रन्थसूचिः। | १२३ |

# સંપાદકીય

આ ગ્રંથમાં શ્રીવિનયકુશલજી મ. રચિત સ્વોપજ્ઞ વૃત્તિ સહિત મંડલવિચારપ્રકરણનું સંપાદન કરવામાં આવ્યું છે. પૃથ્વીની સમાનાંતર ઉપર મેરુ પર્વતની આસપાસ ભ્રમણ કરતા સૂર્યચંદ્ર માંડલા બનાવે છે, તેનું વર્ણન આ ગ્રંથનો વિષય છે. જો કે આ કૃતિ પૂર્વે પ્રગટ છે તેમ છતાં તેનું પુનઃ પ્રકાશન કરવાનાં બે કારણો છે. ૧) પૂર્વનાં પ્રકાશન કરતા આ પ્રકાશન સહાયક સામગ્રીથી યુક્ત બને. ૨) બીજું મહત્ત્વનું કારણ એ છે કે આ કૃતિની બે પ્રકારની વાચના મળે છે. પહેલી વાચના જૈન વિશ્વભારતી લાડનૂં યુનિવર્સિટીની ૦૦૫૬ નંબરની હસ્તપ્રતમાં છે. તેમાં ૯૦ ગાથા છે. બીજી પ્રતોમાં ૯૮ ગાથા ધરાવતી વાચના જોવા મળે છે. તે જ રીતે ટીકામાં પણ વાચનાભેદ જોવા મળે છે. અન્ય પ્રતોનો અભ્યાસ કરતા એમ જણાય છે કે આ પ્રત ગ્રંથકારે કાચા ખરડારૂપે લખી હશે. ત્યાર પછી તેને અન્ય વિદ્વાનોને સંશોધન કરવા આપી. તેમણે સૂચવેલા સુધારા વધારા સાથે અંતિમ વાચના તૈયાર થઇ અને તે પ્રચલિત બની. પહેલી પ્રતમાં ટીકાનું મંગલ કે પ્રશસ્તિ નથી તે જોતાં આ સંભાવના પ્રબળ બને છે. સંશોધનની દૃષ્ટિએ આવી પ્રત અગત્યની ગણાય. કેમ કે તેનાથી પ્રથમવાર ગ્રંથ રચાયા પછી તેનું અન્ય વિદ્વાનો દ્વારા સંશોધન કેવી રીતે થાય છે, તેમાં કેવા પ્રકારના સુધારા-વધારા થાય છે તેની ખબર પડે. પ્રાચીન સમયમાં સંશોધનની પદ્ધતિ શું હતી તેનું તુલનાત્મક અધ્યયન આ દ્વારા થઇ શકે છે.

## કર્તાપરિચય

મંડલવિચારપ્રકરણના કર્તા શ્રીવિનયકુશલજી મ. છે. ગુજરાતી સાહિત્ય કોશ (ખંડ-૧, મધ્યકાળ)માં તેમનો પરિચય આ પ્રમાણે આપ્યો છે[૧].

શ્રીવિનયકુશલજી મ. તપાગચ્છના જૈન સાધુ હતા. તેઓ આચાર્ય શ્રી વિજયસેનસૂરિની પરંપરામાં શ્રીલક્ષ્મીરુચિજીના શિષ્ય શ્રીવિમલકુશલજીના શિષ્ય હતા.[૨] તેમણે ત્રણ કૃતિઓ રચી છે.

(૧) મંડલપ્રકરણ સ્વોપજ્ઞવૃત્તિસહિત. રચના સંવત ૧૬૫૨

---

૧ પત્ર-૪૦૮

૨ ગુ. સા. કો. ૪૦૮

(૨) વિચારસપ્તતિકાવૃત્તિ. આ વૃત્તિ તેમણે ૧૬૭૫માં આચાર્ય શ્રીદેવસૂરિજીની આજ્ઞાથી રચી છે.[૧] અને

(૩) જીવદયારાસ. રચના સંવત ૧૬૩૯.

આ સિવાય તેમણે જ્યોતિષસાર નામનો ગ્રંથ પણ રચ્યો છે, તેમ પૂ. મુનિપ્રવર શ્રી ચતુરવિજયજી મ. મંડલપ્રકરણની પૂર્વમુદ્રિત આવૃત્તિમાં જણાવે છે.

જૈન સાહિત્યનો સંક્ષિપ્ત ઈતિહાસમાં તેમનો પરિચય આ પ્રમાણે આપ્યો છે[૨] -

મંડલપ્રકરણવૃત્તિની પ્રશસ્તિમાં તેઓ પોતાને આ.શ્રી સેનસૂરિજીના શિષ્ય ગણાવે છે એટલે તેમની ગુરુપરંપરાનો ઉલ્લેખ કર્યો નથી.

સેનપ્રશ્નોત્તરરત્નાકરમાં ત્રીજા ઉલ્લાસમાં ત્રીજો પ્રશ્ન પં. વિનયકુશલગણિનો છે. તેથી એ અનુમાન થઇ શકે કે તેમને પંડિતપદ પ્રાપ્ત હતું.

પં. વિનયકુશલે સં. ૧૬૫૨ સ્વોપજ્ઞવૃત્તિવાળું 'મંડલપ્રકરણ' રચ્યું છે. તેનું મહો. લાભવિજયગણિએ સંશોધન કર્યું હતું. તેમણે સં. ૧૬૫૩માં વીજાપુરમાં 'તપાગચ્છ ગુર્વાવલી' (કડી : ૨૭) રચી છે. તેમણે તે 'ગુર્વાવલી'માં આ. વિજયસેનસૂરિ સુધીના પટ્ટધરોનું વર્ણન કર્યું છે અને જણાવ્યું છે કે, અત્યારે તપાગચ્છમાં ૧) ઉપા. ધર્મસાગરગણિ, ૨) ઉપા. વિમલહર્ષગણિ અને ૩) ઉપા. કલ્યાણવિજયગણિ એ ત્રણ ઉપાધ્યાયો છે. તેઓએ સં. ૧૬૫૩ના વૈશાખ સુદ ૪ ને બુધવારે મેડતામાં ગાદરિયા પદમશીએ ભરાવેલી ભ. શાંતિનાથની પ્રતિમાની ભટ્ટારક વિજયસેનસૂરિની આજ્ઞાથી પ્રતિષ્ઠા કરી[૩].

પં. વિનયસુંદરગણિ. તેમનું બીજું નામ વિનયકુશલગણિ પણ મળે છે. તે પં. વિજયહંસના હસ્તદીક્ષિત શિષ્ય હતા અને મહાપંડિત હતા. પં. વિનયસુંદરગણિએ સં. ૧૬૭૨માં આગરામાં 'વિચારસપ્તતિકા' ની પ્રતિ અને સં. ૧૭૨૧ના માગસર સુદ ૧૫ના રોજ સુરતમાં સુશ્રાવિકા વરીબાઈને ભણવા માટે કવિ સેવકે બનાવેલ ભ. ઋષભદેવના ૧૩ ભવોના સ્તવન (ગા.૨૪૫)ની ૧૪ પાનાંની પ્રતિ લખી છે[૪]. પં. વિનયસુંદરગણિ વિજયદેવસૂરિસંઘના ભટ્ટા. વિજયપ્રભસૂરિની આજ્ઞામાં હતા.

પં. વિનયસુંદરગણિ અને શ્રીવિનયકુશલજી મ. એક છે કે ભિન્ન તે કહી શકાતું નથી. બહુધા ભિન્ન હોવા જોઇએ.

---

૧ જૈ. સા. સં. ઈ. પરિચ્છેદ ૮૬૯

૨ સેનપ્રશ્ન કર્તા. પં. શુભવિજયગણિ. રચના સંવત ૧૬૭૩-૧ ૬૭૫

૩ પ્રા. જૈ. લે., ભા. ૨, લે. ૪૪૧

૪ પ્રશસ્તિ સંગ્રહ, ભા. ૨, પ્રશસ્તિ નં. ૭૧૫

## હસ્તપ્રત પરિચય

**૧) હસ્તપ્રત-अ** આ હસ્તપ્રત જૈન વિશ્વભારતી લાડનૂં યુનિવર્સિટીની છે. તેનો ક્રમાંક ૦૦૫૬ છે. તેનાં ૧૯ પત્ર છે. પ્રત્યેક પત્રમાં ૧૭ પંક્તિ છે. પ્રત્યેક પંક્તિમાં ૪૬ અક્ષર છે. આ હસ્તપ્રત કાગળ ઉપર લખાયેલી છે. પ્રતનું માપ નથી આપ્યું કારણ કે અમારી પાસે મૃદુપ્રત જ (Soft Copy) ઉપલબ્ધ છે. પ્રતની લિપિ પ્રાચીન દેવનાગરી છે. વૃત્તિ પણ સાથે આપવામાં આવી છે. લેખન સમય ૧૬૫૨. અક્ષરો સુસ્પષ્ટ છે. મંગલવાક્ય पणमिय वीरजिणिंदं થી કૃતિની શરુઆત કરી છે. પ્રસ્તુત પ્રતમાં જ્યાં અક્ષરો ભુલાયા છે ત્યાં જ નિશાની કરીને અક્ષરો લખેલા જોવા મળે છે. હાંસિયામાં લખાણ જોવા મળતું નથી. આ હસ્તપ્રત જૈન વિશ્વભારતી યુનિવર્સિટી, લાડનૂં દ્વારા પ્રાપ્ત થઇ છે.

**૨) હસ્તપ્રત-ब** આ હસ્તપ્રત શ્રીમોહનલાલજી મ. જૈન લાયબ્રેરી, મુંબઇની છે. તેનો ક્રમાંક-૦૦૩૧ છે. તેનાં ૨૫ પત્ર છે. પ્રત્યેક પત્રમાં ૧૬ પંક્તિ છે. પ્રત્યેક પંક્તિમાં ૪૦ અક્ષર છે. આ હસ્તપ્રત કાગળ ઉપર લખાયેલી છે. પ્રતનું માપ નથી આપ્યું કારણ કે અમારી પાસે મૃદુપ્રત જ (Soft Copy) ઉપલબ્ધ છે. પ્રતની લિપિ પ્રાચીન દેવનાગરી છે. વૃત્તિ પણ સાથે આપવામાં આવી છે. લેખન સમય વિ. સં.૧૯૬૫ છે. અક્ષરો સુસ્પષ્ટ છે. મંગલવાક્ય श्रीमद्वीरजिनं नत्वा થી કૃતિની શરુઆત કરી છે. પ્રસ્તુત પ્રતમાં જ્યાં અક્ષરો ભુલાયા છે ત્યાં જ નિશાની કરીને અક્ષરો લખેલા જોવા મળે છે. હાંસિયામાં લખાણ જોવા મળતું નથી. શ્રીહર્ષમુનિજીએ પ્રત નવી લખાવી છે. શુદ્ધપ્રાયઃ છે. આ હસ્તપ્રત સુ.નીતિનભાઇ સોનાવાલા દ્વારા પ્રાપ્ત થઇ છે.

**૩) હસ્તપ્રત-क** આ હસ્તપ્રત જૈન વિશ્વભારતી લાડનૂં યુનિવર્સિટીની છે. પ્રતિનું નામ 'ચંદ્રસૂર્યમંડલવિચાર' છે. તેના કર્તા મુનિચંદ્રસૂરિજી છે. આ હસ્તપ્રત 'જ્યોતિષ્કરંડક' નામે નોંધાયેલી છે. તેનો ક્રમાંક ૨૯૪૪ તેના ૨ પત્ર છે. પ્રત્યેક પત્રમાં ૧૯ પંક્તિ છે. પ્રત્યેક પંક્તિમાં ૬૮ અક્ષર છે. આ હસ્તપ્રત કાગળ ઉપર લખાયેલી છે. પ્રતનું માપ નથી આપ્યું કારણ કે અમારી પાસે મૃદુપ્રત જ (Soft Copy) ઉપલબ્ધ છે. પ્રતની લિપિ પ્રાચીન દેવનાગરી છે. અંકોને લાલ શાહીથી ચિત્રિત કરવામાં આવ્યા છે. અક્ષરો સુસ્પષ્ટ છે. મંગલવાક્ય श्रीसर्वज्ञाय नमः થી શરુઆત કરી છે. પ્રસ્તુત હસ્તપ્રતમાં જ્યાં અક્ષરો ભૂલાયા છે ત્યાં નિશાની કરીને હાંસિયામાં ભુલાયેલો પાઠ આપવામાં આવ્યો છે. આ હસ્તપ્રત જૈન વિશ્વભારતી લાડનૂં યુનિવર્સિટી દ્વારા પ્રાપ્ત થઇ છે.

**૪) હસ્તપ્રત-ड** આ હસ્તપ્રત આ.શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, શ્રીમહાવીર જૈન આરાધના કેંદ્ર કોબા તરફથી પ્રાપ્ત થઇ છે. પ્રતનું નામ 'મંડલવિચાર' છે. તેના કર્તા આ.શ્રીમુનિચંદ્રસૂરિજી છે. તેનો ક્રમાંક ૩૫૭૨૧ છે. એક પત્ર છે. તેમાં ૧૭ પંક્તિ છે, ૭૬ અક્ષરો છે. આ હસ્તપ્રત

કાગળ ઉપર લખાયેલી છે. પ્રતનું માપ નથી આપ્યું કારણ કે અમારી પાસે મૃદુપ્રત જ (Soft Copy) ઉપલબ્ધ છે. પ્રતની લિપિ પ્રાચીન દેવનાગરી છે. ભાષા સંસ્કૃત પ્રાકૃત મિશ્ર છે. પ્રત ખૂબ જ જીર્ણ થયેલી છે. હાંસિયામાં લખાયેલું લખાણ પણ સુવાચ્ય નથી.

**૫) હસ્તપ્રત-इ** આ હસ્તપ્રત ક્યા હસ્તપ્રતભંડારની છે તે જાણી શકાયું નથી. આગમપ્રજ્ઞ પૂ. જંબૂ વિ. મ.સા. એ પોતાના જીવનકાળ દરમ્યાન અનેક હસ્તપ્રતભંડારોની હસ્તપ્રતોની ઝેરોકેસ, માઇક્રોસ્કોપ અને સ્કેન કોપી કરાવી હતી તેમાં આ હસ્તપ્રત છે પણ ક્યા હસ્તપ્રતભંડારની છે તેની નોંધ નથી. હાલ આ હસ્તપ્રત પૂ શ્રી રંજન વિજયજી જૈન પુસ્તકાલય માલવાડા (રાજસ્થાન) હસ્તપ્રતભંડારમાં છે. તેમાં આ પ્રતનો ક્રમાંક ૨૮૯૬ છે. આ પ્રતમાં બે કૃતિઓ છે. ૧) ચંદ્રસૂર્યમંડલવિચાર. તેના કર્તા આ.શ્રીમુનિચંદ્રસૂરિજી છે. અને ૨) ચતુર્દશગુણસ્થાનાનિ. આ પ્રતનાં ૨ પત્રો છે. તેમ જ દરેક પત્રની ૧૫ પંક્તિ છે. એક પંક્તિમાં ૫૭ અક્ષરો છે. આ પ્રતના અક્ષરો અતિસૂક્ષ્મ છે છતાં પણ સુસ્પષ્ટ છે. હાંસિયામાં લખાણ પણ જોવા નથી મળતું. પ્રત કાગળ ઉપર લખાયેલી છે. પ્રતનું માપ નથી આપ્યું કારણ કે અમારી પાસે મૃદુપ્રત જ (Soft Copy) ઉપલબ્ધ છે. પ્રતની લિપિ પ્રાચીન દેવનાગરી છે. ભાષા સંસ્કૃત છે. આ હસ્તપ્રત પૂ. આ. શ્રી રત્નત્રયસૂરિજી મ.ની પ્રેરણાથી પ્રાપ્ત થઇ છે.

## સંપાદન પદ્ધતિ

(૧) મૂળગ્રંથ પૂર્વપ્રકાશિત પૂ. મુનિપ્રવર શ્રી ચતુરવિજયજી મહારાજ સાહેબનાં સંપાદનના આધારે મુદ્રિત કરવામાં આવ્યો છે. તેમણે પૂ. હંસવિજયજી લાઇબ્રેરી (પ્રાયઃ વડોદરા)ની બે નવી લખેલી હસ્તપ્રતોના આધારે સંપાદન કરેલું છે. પ્રસ્તુત સંપાદનમાં કોબાથી પ્રાપ્ત થયેલી પ્રતનો પણ આધાર લીધો છે. જો કે આ પ્રત પણ નવી જ છે તેથી અને પૂ. મુનિ શ્રી ચતુરવિજયજી મહારાજ સાહેબ એક સિદ્ધસંપાદક હતા તેથી નવી પાઠશુદ્ધિ કરવાની જરૂર પડી નથી. પૂ. મુનિપ્રવર શ્રી ચતુરવિજયજી મ. મંડલપ્રકરણની પૂર્વમુદ્રિત આવૃત્તિનું निवेदनम् પણ અહીં સમાવ્યું છે.

(૨) પૂર્વે જણાવ્યું છે તેમ જૈન વિશ્વભારતી લાડનૂંથી પ્રાપ્ત થયેલી હસ્તપ્રત-अ તદ્દન જૂદી વાચના ધરાવે છે. કદાચ તે મૂળગ્રંથનો કર્તાએ સ્વયં લખેલો કાચો ખરડો હોઈ શકે છે. પાછળથી વિદ્વાનો પાસે સંશોધન અને શુદ્ધિવૃદ્ધિ કરાવી તેને અંતિમ સ્વરૂપ આપ્યું હોવું જોઇએ. આ ખરડો પણ વિદ્વાનોને ધ્યાનમાં આવે તે માટે પરિશિષ્ટ-૪માં સંપાદિત કર્યો છે. આ પ્રત બહુધા શુદ્ધ છે અને તેની બીજી હસ્તપ્રત મળવાની સંભાવના નહીંવત છે. તેથી તેનું સંપાદન કરવામાં બહુ મુશ્કેલી પડી નથી.

(૩) આ જ કૃતિ જેવું સમાન નામ ધરાવતી અન્ય કૃતિ પણ મળે છે. આ.શ્રી મુનિચંદ્રસૂરિજીરચિત ચંદ્રસૂર્યમંડલવિચાર નામની કૃતિ મંડલવિચારના નામે પણ પ્રચલિત છે. તે અપ્રગટ છે. શ્રીવિનયકુશલજીએ પોતાની કૃતિરચનામાં તેનો પણ આધાર લીધો છે. આ કૃતિ ઉપયોગી છે તેમ જ અપ્રગટ છે તેથી તેનું પણ અહી સંપાદન क, ड અને इ હસ્તપ્રતના આધારે કરવામાં આવ્યું છે. હસ્તપ્રત-क અશુદ્ધ છે. તેમ જ તેનું સ્કેનીંગ પણ બરોબર થયું નથી તેથી તેના અક્ષરો વાંચી શકાતા નથી. હસ્તપ્રત-ड પ્રાચીન છે અને શુદ્ધ પણ છે. તેના આધારે સંપાદન સરળ બન્યું છે. કેટલાક પાઠો હસ્તપ્રત-कમાં શુદ્ધ જણાય છે. આ કૃતિ પરિશિષ્ટમાં સમાવી છે.

(૪) પૂર્વ સંપાદનમાં ઉદ્ધરણ સ્થળોનો ઉલ્લેખ છે પણ ઉદ્ધરણો દર્શાવ્યાં નથી. અહીં તે તે મૂળગ્રંથના ઉદ્ધરણો પ્રસ્તુત કર્યા છે.

(૫) આ પ્રકરણમાં આવતા પદાર્થનો સંગ્રહ પૂ. આ.શ્રી **હેમચંદ્રસૂરિજી** મ.ના શિષ્ય પૂ. મુનિરાજ **શ્રીસૌમ્યરત્નવિ.** મ.એ પદાર્થપ્રકાશ ભાગ-૨૫ માં સંકલિત કર્યા છે. તેમાં ચિત્રો તેમ જ આકૃતિઓ દર્શાવીને વિષયને સ્પષ્ટ કર્યો છે. તેથી અહીં તે માટે પ્રયાસ કર્યો નથી. જિજ્ઞાસુ તેમાંથી સ્વયં જાણી શકશે.

(૬) આ સિવાય સંપાદનવિધાના સામાન્ય નિયમોનું અનુસરણ કર્યું છે જેમ કે-

શંકાસ્પદ પાઠને (?) ચિહ્ન કરીને મૂકવામાં આવેલ છે. પતિત પાઠને [ ] કૌંસમાં દર્શાવ્યો છે અશુદ્ધ પાઠના સ્થાને જણાતા સંભવિત શુદ્ધ પાઠને भाव्यम् કરીને ટિપ્પણીમાં બતાવેલ છે.

## પરિશિષ્ટ-

પહેલાં પરિશિષ્ટમાં મંડલપ્રકરણની મૂળ ગાથાઓ મૂકવામાં આવી છે.

બીજાં પરિશિષ્ટમાં મૂળ ગાથાઓનો વર્ણાનુક્રમ છે.

ત્રીજાં પરિશિષ્ટમાં મંડલપ્રકરણમાં આવેલા શાસ્ત્રપાઠોના સંકેત સ્થળ છે. આ પરિશિષ્ટ સુ. **હિરેનભાઈ દોશી**એ તૈયાર કર્યું છે. પર્યાપ્ત સામગ્રીના અભાવે બધાં જ ઉદ્ધરણ સ્થળો શોધી શકાયા નથી.

ચોથાં પરિશિષ્ટમાં મંડલપ્રકરણની અંતિમ વાચના પૂર્વની વાચના યથાતથ આપવામાં આવી છે. સંપાદકો અને સંશોધકોને તેમાંથી ઘણી સામગ્રી પ્રાપ્ત થશે. તેમ જ ગ્રંથરચના અને સંશોધન પદ્ધતિ વિષે ખ્યાલ આવશે. પૂર્વ વાચનામાં ૯૦ ગાથા છે જ્યારે સંશોધિત ગ્રંથમાં ૯૯ ગાથા છે. વિષય નિરૂપણમાં તેમ જ તેના ક્રમમાં તફાવત છે. પૂર્વવાચનાના અમુક વિષયોને સંશોધિત ગ્રંથમાં ત્યજી દેવામાં આવ્યા છે. આ પ્રકારની પૂર્વવાચનાની પ્રત બહુ ઓછી મળે છે.

પાંચમાં પરિશિષ્ટમાં આ. શ્રી મુનિચંદ્રસૂ. રચિત ચંદ્રસૂર્યાદિમંડલવિચાર છે. આ એક અપ્રગટ કૃતિ છે. મંડલપ્રકરણના કર્તા શ્રીવિનયકુશલજી એમ જણાવે છે કે તેમણે મંડલપ્રકરણની રચના ચંદ્રસૂર્યાદિમંડલવિચારના આધારે કરી છે. ચંદ્રસૂર્યાદિમંડલવિચારની ગાથાઓમાં થોડા ફેરફાર કરીને તેમ જ જીવાભિગમ સૂત્ર વગેરેની ગાથાઓ ઉમેરીને આ પ્રકરણ રચ્યું છે[૧]. અહીં ત્રણ હસ્તપ્રતોના આધારે ચંદ્રસૂર્યાદિમંડલવિચારનું સંપાદન કરવામાં આવ્યું છે. તેમનો પરિચય પૂર્વે આપ્યો છે.

છટ્ઠાં પરિશિષ્ટમાં આ. શ્રીમુનિચંદ્રસૂરિજી વિરચિત કાલવિચારશતક આપવામાં આવ્યું છે. આ કૃતિ અનુસંધાન અંક-૬૭માંથી ઉદ્ધૃત કરવામાં આવી છે. તેનું સંપાદન પૂ. આ.શ્રી **શીલચંદ્રસૂરિજી મ.**ના શિષ્ય પૂ. મુનિરાજશ્રી **ત્રૈલોક્યમંડનવિજયજી મ.**એ કર્યું છે. આ પરિશિષ્ટનો ખ્યાલ **સુ. હિરેનભાઈ દોશી**એ આપ્યો છે.

સાતમાં પરિશિષ્ટમાં પારિભાષિક શબ્દોની સૂચિ આપવામાં આવી છે.

આઠમાં પરિશિષ્ટમાં વિશેષનામોની સૂચી આપી છે.

નવમાં પરિશિષ્ટમાં સંદર્ભગ્રંથોની સૂચી આપી છે.

**કૃતજ્ઞતા**

સંપાદનના આ કાર્યમાં મને અમારા માર્ગદર્શક પ.પૂ. ગણિવર શ્રી **વૈરાગ્યરતિવિજયજી** મ.સા. તરફથી પ્રેરણા તેમજ સહાયતા પ્રાપ્ત થઈ છે. તેમનાં અમૂલ્ય માર્ગદર્શનથી જ હું આ કાર્ય કરી શક્યો છું. જે મહાત્માઓ તેમ જ સંચાલકોએ ઉદારભાવે હસ્તપ્રત મેળવી આપી તેમનો ઋણી છું. સંપાદન કાર્યમાં શ્રુતભવન સંશોધન કેંદ્રના બધા શ્રુતસેવીઓએ ભક્તિભાવથી સહકાર્ય કર્યું છે. તેથી તેઓ સાધુવાદને પાત્ર છે. આ ગ્રંથનું યથામતિ શુદ્ધ સંપાદન કરવાનો પ્રયાસ કર્યો છે. તેમ છતાં પણ પ્રમાદવશ કોઇ અશુદ્ધિઓ રહી ગઇ હોય તો વિદ્વાન પાઠકગણ સંપાદકના પ્રમાદને અને ભૂલને ક્ષમા પ્રદાન કરશે તેવી વિનમ્ર પ્રાર્થના છે.

**ભૂપત વંશ**

શ્રુતભવન, પુણે

---

૧ स्वकृतपरकृतगाथाभिः स्मृत्यर्थं लिखितो विचारलेशो न नूतनो विहितः किन्तु श्रीमुनिचन्द्रसूरिकृतमण्डलकुलकमेव प्रतिसंस्कृतं जीवाभिगमादिगाथाभिः कतिभिः कतिभिर्नूतनाभिश्च।

## કૃતજ્ઞતા

મારા પરમ ઉપકારી ગુરુદેવ પરમ પૂજ્ય **આચાર્યદેવ શ્રીમદ્ વિજય રામચંદ્રસૂરીશ્વરજી મહારાજા**, પિતૃગુરુદેવ પરમ પૂજ્ય **મુનિપ્રવરશ્રી સંવેગરતિ વિજયજી મ.સા.**ની પાવન કૃપા, બંધુમુનિવરશ્રી **પ્રશમરતિવિજયજી મ.**નો સ્નેહભાવ તથા તેમ જ **મુનિવરશ્રી સંયમરતિ વિજયજી મ.**, પરમ પૂજ્ય **સાધ્વીજી શ્રીહર્ષરેખાશ્રીજીમ.**ના શિષ્યા **સાધ્વીજી શ્રીજિનરત્નાશ્રીજી મ., સા. શ્રી મધુરહંસાશ્રીજી મ., સા. શ્રી ધન્યહંસાશ્રીજી મ.**નો નિરપેક્ષ સહાયકભાવ મારી પ્રત્યેક પ્રવૃત્તિની આધારશિલા છે. તેમના ઉપકારોથી મુક્ત થવું સંભવ નથી.

વિ.સં. ૨૦૭૩, પોષ સુદ ૧૦

**વૈરાગ્યરતિવિજય**
શ્રુતભવન, પુણે

**સંપાદકમંડલ**

**મુનિશ્રીવૈરાગ્યરતિવિજયગણી (પ્રબંધ સંપાદક)**

ભૂપત વંશ (પ્રકલ્પપ્રમુખ)

અમિત ઉપાધ્યે (વિભાગપ્રમુખ)
કૃષ્ણા માળી (સહાયક)
દિનેશ ઉદાગે (સહાયક)
સિદ્ધનાથ ગાયકવાડ (પ્રબંધસહાયક)
અતુલ મસ્કે (સહાયક)
વિનય ગાયકવાડ (સહાયક)
ગણેશ ખેડકર (સહાયક)
વર્ધમાનજિનરત્નકોશવિભાગ (સહાયક)

# निवेदनम्

इदं हि चन्द्रसूर्यादिमण्डलगतानेकवक्तव्यताप्रधानं सान्वर्थाभिधेयाभिधानं नवनवतिगाथापरिमितं मण्डलप्रकरणं नाम प्रकरणं साम्प्रतकालीनमन्दमतीनामेकत्र मण्डलविचारसारजिज्ञासूनां भव्यसत्त्वानां तदवबोधाय स्वस्मृतये च जीवाभिगमादिसूत्रगाथाभिः बृहद्गच्छगगनाङ्गणदिनमणिश्रीमन्मुनिचन्द्रसूरि-विरचितसमग्रमण्डलविचारकुलकगाथाभिः पृथक्पृथगागमप्रकीर्णकगतविप्रकीर्णभूतमण्डलविचारलेशाधार-विरचितनवीनगाथाभिश्च श्रीमता पण्डितविनयकुशलेन सङ्कलितमित्यस्य प्रकरणस्य प्रान्तगाथाव्याख्यानतः प्रकटमेव।

अस्य प्रकरणस्योपरि वाचकवर्गस्य सुखावबोधाय जिनागमोपाङ्गप्रकरणादिगतमण्डलविचारानुसरण-शीलातीवस्फुटतरव्याख्याना अनेनैव पण्डितप्रवरेण स्वोपज्ञा वृत्तिरपि लिखितेत्यस्य प्रशस्तिगतद्वितीयकाव्येन स्फुटमेवावसीयते।

स्वोपज्ञवृत्तियुतस्यास्य प्रकरणस्य विनिर्माता कदा कतमं महीमण्डलं मण्डयामास? इति जिज्ञासायां जातायां प्रस्तुतप्रकरणस्य प्रशस्तिगतेन—

**"गुरुतमतपगणपुष्करसूर्याः श्रीविजयसेनसूरीन्द्राः। श्रीमदकब्बरनरवरविहितप्रबलप्रमोदा ये॥**

**तेषां शिशुना वृत्तिः स्वोपज्ञा व्यरचि विनयकुशलेन। ----पुरे करबाणरसेन्दु १६५२ मितवर्षे॥"**

इत्यनेन काव्यद्वयेन तथा श्रीमन्महेन्द्रसूरिविरचितविचारसप्ततिकाप्रकरणवृत्तिगतेन—

**"श्रीतपगणगगनाङ्गणसूरश्रीविजयदेवसूरीणाम्।**

**विनियोगाद् वृत्तिरियं विनिर्मिता विनयकुशलेन॥१॥"**

इत्येतत्काव्येन च श्रीमद्विजयसेनसूरिश्रीविजयदेवसूर्योः समानकालवर्तित्वेन विक्रमार्कीय-द्विपञ्चाशदधिकषोडशशताब्द्यां मण्डलप्रकरणवृत्तिविरचितत्वेन च श्रीमतो विनयकुशलस्य सत्तासमयोऽपि निर्विवादं विक्रमीयसप्तदशशताब्द्यामेव निश्चीयते।

अनन्तरोक्तग्रन्थव्यतिरिक्तो ज्योतिश्चक्रविचारनामा ग्रन्थः श्रीमता विनयकुशलेन कृतोऽस्तीति श्रूयते परं न समासादि।

अस्य प्रकरणस्य मुद्रणे द्रव्यसाहाय्यं भावनगरवास्तव्यश्रीमालिज्ञातीयश्रेष्ठि-माणिक्यचन्द्रतनूज-उजमसी इती नाम्ना कृतम्। तदस्यैतत्कार्यं प्रशंसार्हम्।

एतस्य संशोधनसमये प्रवर्तकश्रीमत्कान्तिविजयपुस्तकसंग्रहाद्द्वे नव्ये अनतिशुद्धे पुस्तके समुपलब्धे।

यद्यप्यनन्तरोदितपुस्तकद्वितयाधारेण सावधानतया संशोधनमकारि तथाप्यत्र दृष्टिदोषेण काचनाशुद्धिरवशिष्टा भवेत्तत्र संशोध्य वाचनीयं धीधनैरिति प्रार्थयते।

**- चतुरविजयः।**

# સમર્પણ

વીતેલાં શતકમાં

જેમણે સેંકડો ગ્રંથોનું

શુદ્ધ સંપાદન કરી

પ્રગટ કરાવ્યાં

તે મનીષીપ્રવર

મુનિશ્રી **ચતુરવિજયજી** મહારાજને

- શ્રુતભવન પરિવાર -

श्रीमद्विनयकुशलगणिविरचितम्

# ॥मण्डलविचारप्रकरणम्॥

(स्वोपज्ञवृत्तिसङ्कलितम्)

॥ऐँ॥

श्रीमद्विनयकुशलगणिविरचितम्

# ॥मण्डलविचारप्रकरणम्॥

(स्वोपज्ञवृत्तिसङ्कलितम्)

**श्रीमद्वीरजिनं नत्वा, नित्यानित्यार्थदेशकम्। मण्डलादिविचारस्य, कुर्वे वृत्तिं सुबोधिकाम्॥**

अन्यत्र ग्रन्थेषु विस्तराभिहितान् चन्द्रादिमण्डलादिविचारानवेक्ष्यात्र सङ्क्षेपेण तद्विचाराभिधित्सया मण्डलप्रकरणाभिधानस्य ग्रन्थस्येमामाद्यां गाथामाह—

## [मङ्गलाचरणं प्रतिज्ञा च]

[मूल] **पणमिअ वीरजिणिंदं, भवमंडलभमणदुक्खपरिमुक्कं।**
**चंदाइमंडलाई, विआरलवमुद्धरिस्सामि॥१॥**

[वृत्ति] **पणमि०।** श्रीवीरजिनेन्द्रं प्रणम्य नत्वा, किंलक्षणं वीरम्? भवमण्डलभ्रमणस्य यद् दुःखं तेन परिमुक्तं रहितम्, चन्द्रादिमण्डलादिविचारलेशम् उद्धरिष्यामि, जीवाभिगमाद्यागमाद् इति शेषः। इह चन्द्रादयः पञ्च चन्द्र-सूर्य-ग्रह-नक्षत्र-तारकारूपाः, ते चरादिभेदेन द्विधा। तत्र चराणां मण्डलादिस्वरूपमिह वक्ष्य इति॥१॥

## [सार्धद्वीपद्वयसमुद्रद्वयगतचन्द्रसूर्याणां सङ्ख्या]

अत्र पूर्वं तावत् सार्धद्वीपद्वयसमुद्रद्वयगतचन्द्रसूर्याणां सङ्ख्यामाह—

[मूल] **ससिरविणो दो चउरो, बार दुचत्ता बिसत्तरी अ कमा।**
**जंबूलवणोआइसु, पंचसु ठाणेसु नायव्वा॥२॥**

[वृत्ति] **ससिर०।** शशिनो रवयश्च द्वौ चत्वारो द्वादश द्विचत्वारिंशद् द्विसप्ततिर्जम्बूप्रभृतिषु अर्धतृतीयद्वीपेषु लवणकालोदध्योः समुद्रयोश्च पञ्चसु स्थानेषु ज्ञातव्याः। भावना यथा—द्वौ चन्द्रौ द्वौ सूर्यौ जम्बूद्वीपे, एवं चत्वारो लवणसमुद्रे, द्वादश धातकीखण्डे, द्विचत्वारिंशत् कालोदधौ, द्विसप्ततिः पुष्करार्धे इति॥२॥

## [नरलोके चन्द्रसूर्याणां सङ्ख्या]

अथ निखिले नरलोके चन्द्रसूर्याणां सर्वाग्रमाह—

[मूल] **बत्तीससयं चंदा, बत्तीससयं च सूरिआ सययं।**
**समसेणीए सव्वे, माणुसखित्ते परिभमंति॥३॥**

[वृत्ति] **बत्तीस०।** द्वात्रिंशदधिकं शतं चन्द्रा द्वात्रिंशदधिकं शतं सूर्याश्च सततं निरन्तरम् अपेरध्याहारात्

सर्वेऽपि मनुष्यलोके समश्रेण्या जम्बूद्वीपगतमेरोः परितः पङ्क्त्या परिभ्रमन्ति॥३॥

**[चन्द्रसूर्याणां पङ्क्तयः संस्थितिश्च]**

अथ चन्द्रसूर्याणां कियन्त्यः पङ्क्तयः कथं च संस्थिताः? इत्याह—

**[मूल] चत्तारि अ पंतीओ, चंदाइच्चाण मणुअलोगम्मि।**
**छावट्ठी छावट्ठी, होई इक्किक्किआ पंती॥४॥**

**[वृत्ति] चत्ता०।** इह मनुष्यलोके चन्द्रादित्यादीनां चतस्रः पङ्क्तयो भवन्ति, तद्यथा—द्वे पङ्क्ती चन्द्राणां द्वे च सूर्याणामेकान्तरिते। एकैका च पङ्क्तिर्भवति षट्षष्टि-षट्षष्टिचन्द्रसूर्यसङ्ख्या। तद्भावना चैवम्—एकः किल सूर्यो जम्बूद्वीपे मेरोर्दक्षिणभागे चारं चरन् वर्तते, एक उत्तरभागे। तथा एकश्चन्द्रमा मेरोः पूर्वभागे, एकोऽपरभागे। तत्र यो मेरोर्दक्षिणभागे सूर्यश्चारं चरन् वर्तते, तत्समश्रेणिव्यवस्थितौ द्वौ दक्षिणभाग एव सूर्यौ लवणसमुद्रे, षड् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्धे इत्यस्यां सूर्यपङ्क्तौ षट्षष्टिः सूर्याः। तथा यो मेरोरुत्तरभागे सूर्यश्चारं चरन् वर्तते तस्यापि समश्रेण्या व्यवस्थितौ द्वौ सूर्यौ उत्तरभागे लवणसमुद्रे, षड् धातकीखण्डे, एकविंशतिः कालोदे,षट्त्रिंशदभ्यन्तरपुष्करार्धे इत्यस्यामपि सूर्यपङ्क्तौ सर्वसङ्ख्यया षट्षष्टिः सूर्याः।

तथा यो मेरोः किल पूर्वभागे चारं चरन् वर्तते चन्द्रः तत्समश्रेणिव्यवस्थितौ पूर्वभागे द्वौ चन्द्रमसौ लवणे, षड् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशद् अभ्यन्तरपुष्करार्धे एतस्यां चन्द्रपङ्क्तौ सर्वसङ्ख्या षट्षष्टिः चन्द्रमसः। एवं यो मेरोरपरभागे चन्द्रमाः तन्मूलायामपि पङ्क्तौ षट्षष्टिश्चन्द्रमसो वेदितव्याः। स्थापनाग्रे विलोक्या॥४॥



## [नक्षत्राणां पङ्क्तिस्वरूपम्]

अथ नक्षत्राणां पङ्क्तिस्वरूपमाह—

**[मूल] छप्पन्नं पंतीओ, नक्खत्ताणं तु मणुअलोगम्मि।**
**छावट्ठी छावट्ठी, होई इक्किक्किया पंती॥५॥**

**[वृत्ति] छप्पन्नं०।** नक्षत्राणां मनुष्यलोके सर्वसङ्ख्यया षट्पञ्चाशत् पङ्क्तयो भवन्ति। एकैका च पङ्क्तिर्भवति षट्षष्ठि-षट्षष्ठिनक्षत्रपरिमाणा इत्यर्थः। तथाहि—किलास्मिन् जम्बूद्वीपे दक्षिणतोऽर्धभागे एकस्य शशिनः परिवारभूतानि अभिजिदादीनि अष्टाविंशतिसङ्ख्यकानि नक्षत्राणि क्रमेण व्यवस्थितानि चारं चरन्ति। उत्तरतोऽप्यर्धभागे द्वितीयस्य शशिनः परिवारभूतानि अष्टाविंशतिसङ्ख्यकानि अभिजिदादीन्येव नक्षत्राणि क्रमेण व्यवस्थितानि। तत्र दक्षिणतोऽर्धभागे यदभिजिन्नक्षत्रं तत्समश्रेणिव्यवस्थिते द्वे अभिजिन्नक्षत्रे लवणसमुद्रे, षड् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशद् अभ्यन्तरपुष्करार्धे इति सर्वसङ्ख्यया षट्षष्ठिरभिजिन्नक्षत्राणि पङ्क्त्या व्यवस्थितानि।

एवं श्रवणादिन्यपि दक्षिणतोऽर्धभागे पङ्क्त्या व्यस्थितानि षट्षष्ठिसङ्ख्यकानि षट्षष्ठिसङ्ख्यकानि भावनीयानि। तथोत्तरतोऽप्यर्धभागे यदभिजिन्नक्षत्रं तत्समश्रेणिव्यवस्थिते उत्तरभागे एव द्वे अभिजिन्नक्षत्रे लवणसमुद्रे, षड् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्धे एवं श्रवणादीनां सर्वनक्षत्राणां पङ्क्तयोऽपि प्रत्येकं षट्षष्ठिसङ्ख्यका वेदितव्या इति भवन्ति सर्वसङ्ख्यया षट्पश्चाशत्सङ्ख्या नक्षत्राणां पङ्क्तयः। एकैका च पङ्क्तिः षट्षष्ठिसङ्ख्येति।

किञ्च जम्बूद्वीपे यस्मिन् दिने यदश्विन्यादिनक्षत्रं दक्षिणार्धभागे एकस्य चन्द्रस्य परिभोग्यं भवति तस्मिन्नेव दिने तत्समश्रेणिस्थस्य द्वितीयस्य चन्द्रस्योत्तरार्धभागे तन्नामकमेव नक्षत्रं परिभोग्यं भवति। एवं सर्वस्मिन् द्वीपे समुद्रे चैकनामकनक्षत्रे एव चन्द्राः सूर्याश्च समकं भवन्ति॥५॥

## [ग्रहाणां पङ्क्तिस्वरूपम्]

अथ ग्रहाणां पङ्क्तिस्वरूपमाह—

**[मूल] छावत्तरं गहाणं, पंतिसयं होइ मणुअलोगम्मि।**
**छावट्ठि अ छावट्ठि अ, होई इक्किक्किया पंती॥६॥**

**[वृत्ति] छावत्तरं०।** ग्रहाणाम् अङ्गारकप्रभृतीनां सर्वसङ्ख्यया मनुष्यलोके षट्सप्ततं पङ्क्तिशतं[१] षट्सप्तत्यधिकं पङ्क्तिशतं भवति, एकैका च पङ्क्तिर्भवति षट्षष्टिः षट्षष्टिः। अत्रापीयं भावना—जम्बूद्वीपे दक्षिणार्धभागे एकस्य शशिनः परिवारभूता अङ्गारकप्रभृतय एवान्येऽष्टाशीतिर्ग्रहाः। तत्र दक्षिणतोऽर्धभागे योऽङ्गारकनामा ग्रहः तत्समश्रेणिव्यवस्थितौ दक्षिणभागे एव द्वावङ्गारकौ लवणसमुद्रे, षड् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्धे इति, एवं शेषा अपि सप्ताशीतिग्रहाः पङ्क्त्या व्यवस्थिताः

१ 'षट्सप्तति' इत्यपि।

प्रत्येकं षट्षष्टिर्वेदितव्याः। एवमुत्तरतोऽप्यर्धभागे पूर्वोक्तदक्षिणपङ्क्तिसमश्रेणिस्थानाम् अङ्गारकप्रभृतीनाम् अष्टाशीतेर्ग्रहाणां पङ्क्तयः षट्षष्टिसङ्ख्या भावनीया इति भवति सर्वसङ्ख्यया ग्रहाणां षट्सप्ततं पङ्क्तिशतम्। एकैका च पङ्क्तिः षट्षष्टिसङ्ख्यकेति। पुनरुक्तं जीवाभिगमे—

***छावट्ठी पिडगाइं, चंदाइच्चाण मणुअलोगम्मि। दो चंदा दो सूरा, य होंति इक्किक्कए पिडए।।***

***छावट्ठी पिडगाइं, नक्खत्ताणं तु मणुअलोगम्मि। छप्पण्णं नक्खत्ता, होंति इक्किक्कए पिडए।।***

***छावट्ठी पिडगाइं, महग्गहाणं तु मणुअलोगम्मि। छावत्तरं गहसयं, होइ उ[१] इक्किक्कए पिडए।।***[२]

**[जीवा. प्र.३. उ.२ सू.१७७ गा.४-६, ज्योति.१३०-१३२]**

पिटकानि इति। अत्र चन्द्रादित्यचतुष्कं सपरिवारं पिटकाकारं पिटकमुच्यते, अयमर्थो हारिभद्र्यां जीवाभिगमलघुवृत्तौ[३]। किञ्चात्र प्रथमं नक्षत्रगाथा नक्षत्राणां चन्द्रादिभोग्यत्वेनोक्ता, ग्रहा न चन्द्रादिभोग्या इति ज्ञापनाय व्युत्क्रमः।।६।।

## [चन्द्रादीनां भ्रमणस्वरूपम्]

अथैतेषां चन्द्रादीनां भ्रमणस्वरूपमाह—

---

१ च होइ मु.।

२ अथ किं प्रमाणं पिटकमिति पिटकप्रमाणमाह— एकैकस्मिन् पिटके द्वौ चन्द्रौ द्वौ सूर्यौ भवत इति, किमुक्तं भवति?— द्वौ चन्द्रौ द्वौ सूर्यावित्येतावत्प्रमाणमेकैकचन्द्रादित्यानां पिटकमिति, एवं प्रमाणं च पिटकं जम्बूद्वीपे एकं, द्वयोरेव चन्द्रमसोर्द्वयोरेव सूर्ययोस्तत्र भावतः, द्वे पिटके लवणसमुद्रे चतुर्णां चन्द्रमसां चतुर्णां सूर्याणां च तत्र भावात्, एवं षट् पिटकानि धातकीखण्डे एकविंशतिः कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्धे इति भवन्ति सर्वमीलने चन्द्रादित्यानां षट्षष्टिः पिटकानि।। सर्वस्मिन्नपि मनुष्यलोके सर्वसङ्ख्यया नक्षत्राणां पिटकानि भवन्ति षट्षष्टिः, नक्षत्रपिटकपरिमाणं च शशिद्वयसम्बन्धिनक्षत्रसङ्ख्यापरिमाणम्, तथा चाह— एकैकस्मिन् पिटके नक्षत्राणि नक्षत्राणि भवन्ति षट्पञ्चाशत्, किमुक्तं भवति?— षट्पञ्चाशन्नक्षत्रसङ्ख्याकमेकैकं नक्षत्रपिटकमिति, अत्रापि षट्षष्टिसङ्ख्याभावनैवम्— एकं नक्षत्रपिटकं जम्बूद्वीपे द्वे लवणसमुद्रे षड् धातकीखण्डे एकविंशतिः कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्धे इति।। महाग्रहाणामप्यङ्गारकप्रभृतीनां सर्वस्मिन् मनुष्यलोके सर्वसङ्ख्यया पिटकानि भवन्ति षट्षष्टिः, ग्रहपिटकरिमाणं च शशिद्वयसम्बन्धिग्रहसङ्ख्यापरिमाणम्, तथा चाह— एकैकस्मिन् पिटके भवति षट्सप्ततं—षट्सप्तत्यधिकं ग्रहशतम्, षट्सप्तत्यधिकग्रहशतपरिमाणमेकैकं ग्रहपिटकपरिमाणमिति भावः, षट्षष्टिसङ्ख्याभावना प्राग्वत्।। इह मनुष्यलोके चन्द्रादित्यानां चतस्रः पङ्क्तयो भवन्ति, तद्यथा— द्वे पङ्क्ती चन्द्राणां द्वे सूर्याणाम्, एकैका च पङ्क्तिर्भवति षट्षष्टिः षट्षष्टिः— षट्षष्टिषट्षष्टिसूर्यादिसङ्ख्या, तद्भावना चैवम्— एकः किल सूर्यो जम्बूद्वीपे मेरोर्दक्षिणभागे चारं चरन् वर्तते एक उत्तरभागे, एकश्चन्द्रमा मेरोः पूर्वभागे एकोऽपरभागे, तत्र यो मेरोर्दक्षिणभागे सूर्यश्चारं चरन् वर्तते ततः समश्रेणिव्यवस्थितौ द्वौ दक्षिणभागे एव सूर्यौ लवणसमुद्रे षड् धातकीखण्डे एकविंशतिः कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्धे, इत्यस्यामपि सूर्यपङ्क्तौ सर्वसङ्ख्यया षट्षष्टिः सूर्याः, तथा योऽपि च मेरोरुत्तरभागे सूर्यश्चारं चरन् वर्तते तस्यापि समश्रेण्या व्यवस्थितौ द्वौ उत्तरभागे सूर्यौ लवणसमुद्रे षड् धातकीखण्डे एकविंशतिः कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्धे इत्यस्यामपि सूर्यपङ्क्तौ सर्वसङ्ख्यया षट्षष्टिः सूर्याः, तथा यो मेरोः किल पूर्वभागे चारं चरन् वर्तते चन्द्रमास्तत्समश्रेणिव्यवस्थितौ द्वौ पूर्वभागे एव चन्द्रमसौ लवणसमुद्रे षड् धातकीखण्डे एकविंशतिः कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्धे इत्यस्यां चन्द्रपङ्क्तौ सर्वसङ्ख्यया षट्षष्टिश्चन्द्रमसः, एवं यो मेरोरपरभागे चन्द्रमास्तन्मूलायामपि पङ्क्तौ षट्षष्टिश्चन्द्रमसो वेदितव्याः।। नक्षत्राणां मनुष्यलोके सर्वसङ्ख्यया पङ्क्तयो भवन्ति षट्पञ्चाशत्, एकैका च पङ्क्तिर्भवति षट्षष्टिः षट्षष्टिस्तद्भवपरिमाणा इत्यर्थः,

३ चन्द्रादित्यचतुष्कं सपरिवारं पिटकमुच्यते। इति मू. हारिभद्र्यां जीवाभिगमलघुवृत्तौ ह.प्र.।

**[मूल] ते मेरु पडिअडंता, पयाहिणावत्तमंडला सव्वे।**
**अणवट्ठिअजोगेहिं, चंदा सूरा गहगणा य॥७॥**

**[वृत्ति] ते मेरु०।** ते पूर्वोक्ता नरलोकवर्तिनः सर्वे चन्द्राः सर्वे सूर्याः सर्वे ग्रहगणाः सर्वाणि नक्षत्राणि ध्रुवादिवर्जं सर्वे तारकाश्च जम्बूद्वीपगतम् अमुमेव मेरुमनुलक्षीकृत्य प्रदक्षिणावर्त्तमण्डलाः सन्तो नित्यमहोरात्रं परिभ्रमन्ति, न तु क्षणमात्रं क्वापि कदापि तिष्ठन्ति। गाथोत्तरार्धेन विशेषमाह—**अणवट्ठिअ त्ति।** चन्द्राः सूर्या ग्रहगणाश्च अनवस्थितयोगैः प्रतिदिनं पृथक् पृथक् मण्डलैः परिभ्रमन्ति, तेन चन्द्रादित्यग्रहाणां मण्डलान्यनवस्थितानि, यथायोगमन्यस्मिन् अन्यस्मिन्मण्डले तेषां सञ्चरिष्णुत्वात्। चकारान्नक्षत्रतारकाणां मण्डलानि अवस्थितानि ज्ञेयानि, प्रतिदिनं तेष्वेव निजनिजमण्डलेषु सञ्चरणात्। तथा ध्रुवपार्श्ववर्तिनः तारा ध्रुवमेव परिवर्तयन्ति न मेरुम्। ध्रुवाश्चत्वारो जम्बूद्वीपे ज्ञेयाः। यदुक्तम्—नमिऊण सजल-अभिधलघुक्षेत्रसमास प्रान्तगाथायाः[1] वृत्तौ श्रीहरिभद्रसूरिभिर्यथा—

***इह मेरोश्चतुर्दिशं चत्वारो ध्रुवतारा मन्तव्याः तत्परिवारतारकास्तु तेषामेव तारकाणां चतुर्णां समन्तात् परिभ्रमन्ति न तु मेरोः प्रादक्षिण्येन इति॥७॥*** [ ]

### [जम्बूद्वीपे चन्द्रादीनां चारभूमिविष्कम्भमानम्]

अथ जम्बूद्वीपे चन्द्रादीनां चारक्षेत्रविष्कम्भमानमाह—

**[मूल] दीवे असिइसयं जोअणाण तीसहिअ तिन्नि सय लवणे।**
**खित्तं पणसयदसहिअ, भागा अडयाल इगसट्ठा॥८॥**

**[वृत्ति] दीवे०।** द्वीपे जम्बूद्वीपे चन्द्रयोः सूर्ययोश्च क्षेत्रं चारक्षेत्रं विष्कम्भतोऽशीत्यधिकं शतम् १८० योजनानाम्, लवणे च त्रिंशदधिकानि त्रीणि शतानि योजनानाम् ३३०, उभयोर्मीलने दशाधिकानि पञ्चशतानि योजनानाम् अष्टचत्वारिंशच्च एकषष्ठिभागा योजनस्य ५१०। नक्षत्राणामपि चारक्षेत्रमेतदेव, सर्वाभ्यन्तरसर्वबाह्यमण्डलयोः परस्परं दशाधिकपञ्चशतयोजनप्रमाणान्तरालस्य उक्तत्वात्। ग्रहाणां तारकाणां च चारक्षेत्रविष्कम्भमानं व्यक्त्या शास्त्रेषु नोपलभ्यत इति॥८॥

### [जम्बूद्वीपे चन्द्रसूर्यमण्डलसङ्ख्या]

अथ जम्बूद्वीपे चन्द्रयोः सूर्ययोश्च सङ्ख्याज्ञापनपूर्वकं प्रत्येकं कति मण्डलानि भवन्तीत्याह—

**[मूल] इह दीवे दुन्नि रवी, दुन्नि अ चंदा सया पयासंति।**
**चुलसीसयमेगेसिं, मंडलमन्नेसि पन्नरस॥९॥**

**[वृत्ति] इह दिवे०।** इह अस्मिन् जम्बूद्वीपे द्वौ सूर्यौ द्वौ चन्द्रौ सदा प्रकाश्यतः। तत्र **एगेसिं** ति प्रथमोद्दिष्टयो रव्योः चतुरशीत्यधिकं शतं मण्डलानि भवन्ति। **अन्नेसिं** ति पश्चादुद्दिष्टयोः चन्द्रयोः पञ्चदश

---

१ अयमज्ञातकर्तृकः सम्भाव्यते।

सङ्ख्याकानि भवन्ति। नक्षत्रमण्डलानि चाष्टौ सन्ति, तत्स्वरूपं नक्षत्राधिकारे भावयिष्यते॥९॥

**[चन्द्रसूर्यमण्डलानामन्तरम्]**

अथ सूर्यमण्डलानां मिथश्चन्द्रमण्डलानां चान्तराणि कियत्प्रमाणानीत्याह—

**[मूल] दो जोअणंतराइं, सूराण ससीण पंचतीसा य।**
**तीसमिगसट्ठिभागा, चउरो तस्सत्तभागा य॥१०॥**

**[वृत्ति] दो जोअणं०।** सूर्यसम्बन्धिनां मण्डलानाम् अन्तराणि द्वे योजने योजनद्वयप्रमाणानीत्यर्थः, एवंविधानि अन्तराणि सूर्ययोः त्र्यशीत्यधिकशतसङ्ख्याकानि भवन्ति। चन्द्रसम्बन्धिनां मण्डलानाम् अन्तराणि पञ्चत्रिंशद्योजनानि त्रिंशच्चैकयोजनस्य एकषष्ठिभागा एकस्यैकषष्ठिभागस्य सप्तभागाः क्रियन्ते तादृशाश्चत्वारो भागाश्च ३५ एवंविधानि अन्तराणि चन्द्रयोः चतुर्दश। तेन जम्बूद्वीपे द्वयोः सूर्ययोश्चन्द्रयोश्च दक्षिणोत्तरायणे कुर्वतोः प्रतिदिनभ्रमिक्षेत्रलक्षणानि निजबिम्बप्राणविष्कम्भानि मण्डलानि यथाक्रमं सूर्ययोः१८४ चन्द्रयोः पञ्चदश १५ भवन्ति। तेषां मण्डलानाम् अन्तरालसहितानां विष्कम्भक्षेत्रमानम्—५१० ४८/६१। तथाहि— सूर्यस्य चतुरशीत्यधिकं शतं मण्डलानामन्तराणि त्र्यशीत्याधिकं शतम् १८३, एषां विष्कम्भमानं द्वे द्वे योजने, ते च त्र्यशीत्यधिकशतेन गुण्येते जातानि षट्षष्ठ्यधिकानि त्रीणि शतानि ३६६। ये च सूर्यसम्बन्धिनोः अष्टचत्वारिंशद् एकषष्ठिभागाः ४८/६१ ते चतुरशीत्यधिकेन शतेन गुण्यन्ते, जातानि अष्टाशीतिशतानि द्वात्रिंशदधिकानि ८८३२। तेषां योजनानयनार्थम् एकषष्ठ्या भागे हृते लब्धं चतुश्चत्वारिंशं योजनशतम्, शेषा अष्टचत्वारिंशच्चैकषष्ठिभागा योजनस्य १४४ ४८/६१, एतत् पूर्वराशौ क्षिप्तम्, जातं च यथोक्तमानम् ५१० ४८/६१।

चन्द्रस्य तु मण्डलविष्कम्भः षट्पञ्चाशदेकषष्टिः भागा योजनस्य, ते ५६/६१ पञ्चदशगुणिता जाताः ८४०, तेषां योजनानयनार्थम् एकषष्ठिभागहरणे लब्धाः १३, शेषाः ४७ स्थिताः। मण्डलान्तराणां च प्रत्येकं विष्कम्भमानं पञ्चत्रिंशद्योजनानि त्रिंशदेकषष्ठिभागा योजनस्यैकस्यैकषष्ठिभागस्य च सप्तधा छिन्नस्य चत्वारो भागाः ३५.३०/६१ ४/७ पञ्चत्रिंशच्चतुर्दशगुणिता जातानि ४९० योजनानि, त्रिंशद्भागाः चतुर्दशगुणिता जाताः ४२०। सप्तधा छिन्नस्य चत्वारो भागाः चतुर्दशगुणिता जाताः षट्पञ्चाशत्, ते सप्तभिर्हृता लब्धा अष्टौ एकषष्ठिभागाः, ते च चतुःशतविंशतौ क्षिप्ता जाताः ४२८, ते एकषष्ठ्या हृताः, लब्धानि योजनानि सप्त शेष एक एकषष्ठिभागः स्थितः ७. १/६१, पूर्वोक्तानि योजनानि १३ तथा ४९० तथा ७, सर्वेषां मीलने जातानि योजनानि ५१०, शेषभागाः १ तथा ४७ उभयोर्मीलने ४८/६१ स्थिता इति। इदं चारक्षेत्रचक्रवालविष्कम्भमानम्॥१०॥

**[जम्बूद्वीपे निषधे च चन्द्रसूर्ययोः मण्डलानि]**

अथ कति मण्डलानि द्वीपे कति च निषधे लवणे च कति सूर्यचन्द्रयोर्भवन्तीति गाथाद्वयेनाह—

**[मूल] संततमंतरमेअं, रवीण पणसट्ठिमंडला दीवे।**
**तत्थ बिसट्ठी निसढे, तिन्नि अ बाहाइ तस्सेव॥११॥**

**चंदाणं निसढे वि अ[१], मंडल पण गुरूवएसि दिसंति।**
**सेसाइं मंडलाइं, दोण्ह वि जलहिस्स मज्झम्मि॥१२॥**

**[वृत्ति] संतत०।** सन्ततं सर्वकालम् एतत् पूर्वोक्तं सूर्ययोश्चन्द्रयोश्च मध्ये प्रविशतोः बहिर्निर्गच्छतोश्च मण्डलानां परस्परमन्तरं ज्ञेयम्। तत्र रव्योः पञ्चषष्ठिमण्डलानि जम्बूद्वीपे। तत्रापि द्वाषष्ठिर्निषधपर्वते त्रीणि च तस्य बाहायाम्, इदं तु श्रीमुनिचन्द्रसूरिभिरुक्तम्[२]। समवायाङ्गवृत्तौ त्रिषष्टिस्थाने[३]—

***जम्बूद्वीपस्य पर्यन्तिमेऽशीत्युत्तरे योजनशते पञ्चषष्टिर्भवन्ति, तत्र निषधपर्वते नीलवत्पर्वते च त्रिषष्टिः सूर्योदयाः सूर्यमण्डलानीत्यर्थः, तदन्ये तु द्वे जगत्याम्, शेषाणि तु लवणे*** इत्युक्तमस्ति। **[सम. सू.वृ.स्थान ६३]**

सङ्ग्रहणीवृत्तादावपि—***त्रिषष्टित्रिषष्टिमण्डलानि निषधनीलवतोः, द्वे द्वे हरिवर्षकोट्यादौ ततस्तत्त्वं सर्वविद्वेद्यम्***॥११॥ **[सङ्ग्र.सू.वृ.६८]**

तथा **चंदा०।** चन्द्रयोर्निषधनीलवन्तपर्वत एव पञ्च मण्डलानि गुरूपदेशे दृश्यन्ते, शेषाणि मण्डलानि द्वयोरपि जलधौ ११९ सूर्यस्य दश १० चन्द्रस्य च भवन्ति। तत्राप्ययं विशेषः- १-२-३-४-५-११-१२-१३-१४-१५। एतानि चन्द्रमण्डलानि सूर्यस्यापि साधारणानि। षष्ठम-सप्तम-अष्टम-नवम-दशमरूपाणि पुनश्चन्द्रस्यैव भवन्ति, न जातुचिदपि तेषु सूर्यः समायाति। चन्द्रस्य १५ मण्डलानामन्तराणि चतुर्दश भवन्ति। तत्र चतुर्षु सर्वाभ्यन्तरेषु चतुर्षु सर्वबाह्यमण्डलान्तरेषु च सूर्यस्य प्रत्येकं द्वादश मण्डलानि भवन्ति। मध्यवर्तिषु षट्सु चन्द्रमण्डलान्तरेषु सूर्यमण्डलानि त्रयोदश भवन्ति॥१२॥

## [मण्डलस्वरूपम्]

अथ मण्डलनिष्पत्तिस्वरूपमाह—

**[मूल] रविदुगभमणवसाओ, निप्फज्जइ मंडलं इहं एगं।**
**तं पुण मंडलसरिसं, ति मंडलं वुच्चइ तहाहि॥१३॥**

**[वृत्ति] रविदु०।** रविद्विकभ्रमणवशान्निष्पद्यते मण्डलमिहैकम्। तत्पुनर्वृत्ताकारतया मण्डलसदृशमिति हेतोर्व्यवहारेण मण्डलमुच्यते न तु निश्चयेन। तथाहीति साक्षाद्दर्शने॥१३॥

---

१ **निसढि च्चिअ** इति चन्द्रसूर्यमण्डलविचारे।

२ चन्द्रसूर्यमण्डलविचारः गा. ३,४ द्रष्टव्यं परिशिष्टं पञ्चमम्(अ)

३ निसढे णं पव्वते तेवट्ठिं सूरोदया पण्णत्ता। एवं नीलवंते वि। [टी.] अथ त्रिषष्टिस्थानकम्, तत्र संपत्तजोव्वण त्ति मातापितृपरिपालनानपेक्षा इत्यर्थः। निसहे णमित्यादि, किल सूर्यमण्डलानां चतुरशीत्यधिकशतसङ्ख्यानां मध्यात् जम्बूद्वीपस्य पर्यन्तिमे अशीत्युत्तरे योजनशते पञ्चषष्टिर्भवति, तत्र च निषधवर्षधरपर्वतस्योपरि नीलवद्वर्षधरस्य चोपरि त्रिषष्टिः सूर्योदयाः सूर्योदयस्थानानि सूर्यमण्डलानीत्यर्थः, तदन्ये तु द्वे जगत्या उपरि, शेषाणि तु लवणे त्रिषु त्रिंशदधिकेषु योजनशतेषु भवन्तीति भावार्थः॥६३॥ सम.सू. ६३ द्रष्टव्यं परिशिष्टम्।




तमेवार्थं गाथाद्वयेनाह —

**[मूल] गिरिनिसढनीलवंतेसु उग्गयाणं रवीण कक्कम्मि।**
**पढमाउ चेव समया, ओसरणेणं जओ भमणं॥१४॥**
**तो नो निच्छयरूवं, निप्फज्जइ मंडलं दिणयराणं।**
**चंदाण वि एवं चिअ, निच्छयओ मंडलाभावो॥१५॥**

**[वृत्ति] गिरिनि०।** निषधनीलवन्नाम्नोः गिर्योः उपर्युद्गतयो रव्योः कर्के कर्कसङ्क्रान्तिप्रथमदिने प्रथमसमयाद् एवारभ्य शनैः शनैरपसरणेन यतः कारणाद् भ्रमणम्॥१४॥

**तो नो०।** तो इति ततः कारणात् निश्चयरूपं मण्डलं न निष्पद्यते परिपूर्णवृत्ताकारतया मण्डलनिष्पत्तिः निश्चयतो दिनकरयोर्न भवतीत्यर्थः। चन्द्रयोरप्येवमेव निश्चयतो मण्डलाभावस्तथैव वक्रतया परिभ्रमणात्॥१५॥

अथ चन्द्रसूर्ययोर्मण्डलस्थानादूर्ध्वमधश्च सङ्क्रमणनिषेधमाह—

**[मूल] रयणिअरदिणयराणं, उड्ढे अ अहे अ संकमो नत्थि।**
**मंडलसंकमणं पुण, सब्भंतरबाहिरं तिरिअं॥१६॥**

**[वृत्ति] रयणिअर०।** रजनिकरदिनकरयोः चन्द्रादित्ययोः समभूतलाद् अशीत्यधिकाष्टाशतयोजनेभ्यः चन्द्रस्य परिपूर्णाष्टशतयोजनेभ्यः सूर्यस्य च ऊर्ध्वे ऊर्ध्वदेशे सङ्क्रमः सञ्चरणम्। तथा पूर्वोक्तयोजनेभ्योः

अधश्च सङ्क्रमो नास्ति, तथाजगत्स्वाभाव्यात्। तिर्यक् पुनर्मण्डलेषु सङ्क्रमणं भवेत्, किंविशिष्टमित्याह— साभ्यन्तरबाह्यं सहाभ्यन्तरं बाह्यं यस्य येन वा तत्साभ्यन्तरबाह्यम्, किमुक्तं भवति? सर्वाभ्यन्तरान्मण्डलात् परतः तावत् मण्डलेषु सङ्क्रमणं यावत्सर्वबाह्यमण्डलम्, सर्वबाह्याच्च मण्डलादर्वाक् मण्डलेषु तावत्सङ्क्रमणं यावत् सर्वाभ्यन्तरमिति। इदं विमानापेक्षम्, न तु तन्मध्यवर्तिसुरापेक्षम्, ते तु नन्दीश्वरद्वीपभगवत्समवसरणादिषु आयान्ति॥१६॥

**[चन्द्रसूर्ययोः मण्डलस्थयोर्मिथो विष्कम्भान्तरम्]**

अथ चन्द्रयोः सूर्ययोश्च सर्वमण्डलस्थयोर्मिथो विष्कम्भान्तरमाह—

**[मूल] ससिससि रविरवि अंतर, मज्झे इगलक्ख तिसयसट्ठूणो।**
**साहिअदुसयरिपण चय, बहि लक्खो छसयसट्ठहिओ॥१७॥**

**[वृत्ति] ससि०।** मध्ये इति सर्वाभ्यन्तरे मण्डले वर्तमानयोः शशिनोः समश्रेण्या परस्परमन्तरं जम्बूद्वीपेऽशीत्यधिके शते योजनानां मध्ये प्रवेशात् षष्ठ्यधिकशतत्रययोजनोनं लक्षम्, अङ्कतो यथा— ९९६४०। तत्परिधिः योजनानि ३१५०८९ किञ्चिदधिकानि, यतः ९९६४० अङ्कानां वर्गकरणे दशगुणे च ९९२८१२९६००० एतदङ्कानां करणीकरणे सर्वाभ्यन्तरमण्डलस्य परिधिः ३१५०८९ भवति। ततो द्वितीयादिचन्द्रमण्डलेषु विष्कम्भस्य **चय** इति वृद्धिर्योजनानां द्वासप्ततिरेकपञ्चाशदेकषष्ठिभागाः तत्साप्तिकश्चैकभागोऽपि, यथा- योजनानि ७२ ५१/६१ १/७, एतद्राशेः परिधिर्योजनानि २३० १४३/४२७, यतो द्विसप्ततियोजनानि एकषष्ठ्या गुण्यन्ते ४३९२ एकपञ्चाशति क्षिप्ते जातम् ४४४३, तच्च सप्तगुणितमेकेन युतम् ३११०२, तच्च वर्गितं दशगुणितं च यथा- ९६७३३४४०४०, एतस्य करणीकरणे आगतम् ९८३५३, शेषाङ्काः ३१४३१ स्थितास्तैर्न किञ्चित् प्रयोजनम्। तत एकषष्टिः सप्तगुणिता जाताः ४२७ तैः कृत्वा लब्धानां भागहारे योजनानि २३० १४३/४२७। अयं परिरयो यदि चन्द्रस्य प्रथमादिमण्डलपरिरये क्षिप्यते तदा यथोत्तरं द्वितीयादिमण्डलपरिरयमागच्छति।

विष्कम्भवृद्ध्यानयनोपायश्चायम्—चन्द्रमण्डलान्तरं पञ्चत्रिंशद्योजनानि त्रिंशदेकषष्ठिभागाश्चत्वारश्च साप्तिका भागा इति, अत्र द्वयोः पार्श्वयोरपेक्षया योजनानां द्विगुणने[१] सप्ततियोजनानि ७०, तथा त्रिंशद्भागानां द्विगुणत्वे षष्ठिरेकषष्ठिभागाः, तथा साप्तिकाश्चत्वारो भागास्ते द्विगुणिता अष्टौ, तैः सप्तभिरे(क ए)कषष्ठिभागाः, सर्वे एकषष्ठिः, तैरेकं योजनम्, तच्च योजनराशिमध्ये क्षिप्तमेकसप्ततिः, साप्तिकश्चैकभागः स्थितः। चन्द्रविमानं तु षटपञ्चाशद्भागमितम्, तद्द्विगुणत्वे द्वादशोत्तरं शतम् ११२, एकषष्ठ्या भागैरेकं योजनं शेषा एकपञ्चाशद् भागाः, तद्योजनमेकसप्ततौ क्षिप्तम्, जातं पूर्वोक्तमानम् ७२ ५१/६१ १/७। एतच्चतुर्दशगुणितं जातम् एकोनविंशत्युत्तरं सहस्रं योजनानाम् १०१९, शेषा भागाः ४५/६१, तच्च यदा चन्द्रप्रथममण्डलविष्कम्भे ९९६४० योजनरूपे क्षिप्यन्ते तदा सर्वबाह्ये मण्डले द्वयोश्चन्द्रयोर्मिथोऽन्तरं योजनानि १००६५९ ४५/६१। तत्परिधियोजनानि ३१८३१५ किञ्चिदूनानि।

१ 'द्विगुणिते' इत्यपि।

तथा सर्वाभ्यन्तरे मण्डले द्वयोः सूर्ययोर्मिथोऽन्तरं योजनानि ९९६४०, तत्परिधियोजनानि ३१५०८९ किञ्चदधिकानि। द्वितीयादिसूर्यमण्डलेषु प्रतिमण्डले विष्कम्भवृद्धिर्योजनानि ५ ३५/६१। तत्परिधिजोनानि १७ ३८/६१ यतः पञ्च एकषष्ठ्या गुणिताः पञ्चत्रिंशत्सहिताश्च ३४०, ते वर्गिता दशगुणिताश्च जाताः ११५६०००, एतदङ्कानां करणीकरणे १०७५ आगताः शेषाः ३७५ स्थिताः, आगतानाम् ६१ भागहरणे १७ ३८/६१। अयं परिरयो यदि सूर्यस्य प्रथमादिमण्डलपरिरये क्षिप्यते तदा द्वितीयादिसूर्यमण्डलपरिधिप्रमाणम् आगच्छति।

अत्रापि विष्कम्भवृद्ध्यानयनोपायो यथा—सूर्यस्य मण्डलान्तरं योजने द्वे, तद्द्विगुणत्वे चत्वारि, सूर्यविमानं त्वष्टचत्वारिंशद्भागमितम्, तद्द्विगुणं षण्णवतिर्भागाः, तेषामेकषष्ठ्या भागैरेकं योजनं तच्चतुर्षु क्षिप्तं जातं योजनपञ्चकम्, शेषाः पञ्चत्रिंशद्भागाः ५ ३५/६१, एतच्च त्र्यशीत्यधिकशतेन गुण्यते जातं योजनानां विंशत्युत्तरं सहस्रम् १०२०, तच्च सर्वाभ्यन्तरमण्डलविष्कम्भे ९९६४० रूपे मील्यते तदा सर्वबाह्ये मण्डले द्वयोः सूर्ययोर्मिथोऽन्तरम् १००६६० भवति। तत्परिधियोजनानि ३१८३१५। चन्द्रयोरिव सर्वाभ्यन्तरे सर्वबाह्ये च मण्डले सूर्ययोरप्यबाधाप्रमाणमवसेयम्। नवरं चन्द्रस्य सूर्यापेक्षया षोडशभिरेकषष्ठिभागैर्न्यूनमन्तरम्, यद् एकोऽपि चन्द्रोऽष्टावेकषष्ठिभागान् सूर्यादभ्यन्तरमाक्रामति, एवमपरोऽपि तत्समश्रेणिस्थः, ततः षोडशभिः भागैः न्यूनता॥१७॥

### [सर्वाभ्यन्तरबाह्यपरिधी]

अथ सर्वाभ्यन्तरपरिधिं सर्वबाह्यपरिधिं च वृत्तावुक्तमपि सूत्रमध्ये गाथाद्वयेनाह—

**[मूल] तिन्नेव सयसहस्सा, पन्नरस हवंति जोअणसहस्सा।**
**एगुणनउआ परिहि, अब्भंतरमंडले तेसिं॥१८॥**
**लक्खतिगं अट्ठारससहस्सा, तिन्नि सय पंचदसअहिआ।**
**परिहीइ जोअणाइं, बाहिरए मंडले हुंति॥१९॥**

**[वृत्ति] तिन्नेव०।** त्रीणि लक्षाणि पञ्चदशसहस्राणि एकोननवत्यधिकानि ३१५०८९ योजनानां सर्वाभ्यन्तरे मण्डले परिधिः तयोः चन्द्रयोः सूर्ययोश्च।

**लक्ख०।** लक्षत्रिकमष्टादशसहस्राणि पञ्चदशाधिकानि त्रीणि शतानि योजनानाम् ३१८३१५ सर्वबाह्ये मण्डले परिधिरिति॥१८॥१९॥

### [चन्द्रस्य मुहूर्तगतिः]

अथ चन्द्रस्य सर्वमण्डलेषु प्रतिमुहूर्तं गतिप्रमाणमाह—

**[मूल] साहिअपणसहतिहुत्तुराइं, ससिणो मुहुत्तगइ मज्झे।**
**बावन्नहिआ सा बहि, रइमंडल पउणचउवुड्ढी॥२०॥**

**[वृत्ति] साहि०। मज्झे** इति सर्वाभ्यन्तरे मण्डले वर्तमानस्य जम्बूद्वीपे एकैकस्मिन्मुहूर्ते पञ्चसहस्राणि त्रिसप्तत्यधिकानि साधिकानि योजनानां गतिर्भवति, अङ्कतो यथा—५०७३ ७७४४/१३७२५। सैव सर्वाभ्यन्तरमण्डलगतिः द्विपञ्चाशद्योजनाधिका कृता सती सर्वबहिर्मण्डले चन्द्रस्यैकैकमुहूर्तगतिः जायते, अत्र कियद्भागानां न्यूनत्वं जातम्, अङ्कतो यथा—५१२५ ६९९०/१३७२५। प्रतिमण्डलं च किञ्चिदूनपादोनचतुर्योजनवृद्धिः क्रियते एतावता पूर्णं योजनत्रिकं पञ्चपञ्चाशदधिकाः षण्णवतिशतभागाश्चेत्यर्थः ३ ९६५५/१३७२५। एतच्चतुर्दशगुणितं द्वापञ्चाशत्॥२०॥

## [सूर्यस्य मुहूर्तगतिः]

अथ सूर्यस्य सर्वमण्डलेषु प्रतिमुहूर्तं गतिप्रमाणमाह—

**[मूल] मज्झि दुवन्निगवन्ना, सया य चउवन्नसंजुआ बाहिं।**
**सरस्स व अट्ठारस, सट्ठीभागाणमिह वुड्ढी॥२१॥**

**[वृत्ति] मज्झि०।** सर्वमध्यमण्डले वर्तमानस्य जम्बूद्वीपसत्कसूर्यस्य तु द्विपञ्चाशच्छतानि एकपञ्चाशदधिकानि योजनानामिति योगः, एकैकस्मिन्मुहूर्ते गतिरेतावती भवति ५२५१ २९/३०। ये चोपरितनांशाः सूत्रे स्तोकत्वात् नोक्तास्ते चन्द्रसूर्ययोर्मुहूर्तवर्णनावसरे चिन्तयिष्यन्ते। या च सर्वमध्यमण्डले मुहूर्तगतिः सूर्यस्य सैव चतुष्पञ्चाशद्योजनसंयुता कृता सती सर्वबाह्यमण्डले प्रतिमुहूर्तं गतिर्जायते, यथा—५३०५ १५/६०। अत्र प्रतिमण्डलं किञ्चिदूनानाम् अष्टादशषष्ठिभागानाम् १८/६० वृद्धिः, यतोऽष्टादशानां त्र्यशीत्यधिकशतगुणे ३२९४ जायन्ते, तेषां षष्ठ्या भागहारे लब्धानि चतुष्पञ्चाशद्योजनानीति॥२१॥

## [नक्षत्राणां मुहूर्तगतिः]

अथाधिकारान्नक्षत्राणां प्रतिमुहूर्तं गतिप्रमाणमाह-

**[मूल] पणसहसदुसयसाहिअ, पण्णट्ठी जोअणाण मज्झि गई।**
**चउपन्नहिआ सा बहिमंडलए होइ रिक्खाणं॥२२॥**

**[वृत्ति] पणस०। मज्झि** त्ति सर्वाभ्यन्तरे मण्डले वर्तमानानां नक्षत्राणमेकैकमुहूर्ते गतिः पञ्चसहस्राणि द्वे शते पञ्चषष्ठिश्च साधिका योजनानाम् ५२६५ १८२६३/२१९६०। सा च सर्वाभ्यन्तरमण्डलगतिः चतुष्पञ्चाशद्योजनाधिका क्रियते तदा सर्वबाह्ये मण्डले वर्तमानानां नक्षत्राणां प्रतिमुहूर्तं गतिः यथा—५३१९ १६३६५/२१९६०। अत्र प्रतिमण्डलवृद्धिः सम्यग् न ज्ञायते, यतो मण्डलानामन्तरं सर्वत्र तुल्यं नास्ति॥२२॥

## [चन्द्रस्य मण्डलभ्रमिमुहूर्तमानम्]

अथ मण्डलभ्रमिमुहूर्तज्ञानपूर्वकं पूर्वोक्तमपि चन्द्रादिमुहूर्तगतिपरिमाणं करणगाथाभिर्विवक्षुः प्रथमं

चन्द्रस्याह—

**[मूल] बावट्ठि पुण्णरूवा, तेवीसं अंसगा य बोधव्वा।**
**दो चेव इक्कवीसा, छेओ पुण तेसिं बोधव्वो॥२३॥**

**[वृत्ति] बावट्ठि०।** चन्द्रस्यैकैकमण्डले भ्रमिकालः द्वाषष्टिः पूर्णरूपाणि पूर्णा द्वाषष्टिर्मुहूर्ता इत्यर्थः, त्रयोविंशतिः अंशाश्चैकस्य मुहूर्तस्यैकविंशत्यधिकशतद्वयभागरूपा बोद्धव्याः ६२ २३/२२१, एतावत्कालप्रमाणं चन्द्रस्य एकैकमण्डले परिभ्रमतो लगति। अत्रांशस्वरूपं सूत्रेणैवाह—**छेओ त्ति** छेदो विभजनाङ्कः पुनः तेषां मुहूर्तानाम् एकविंशत्यधिकशतद्वयरूपो बोद्धव्यः॥२३॥

**[मूल] एएण य भइअव्वो, मंडलरासी हविज्ज जं लद्धं।**
**सा सोममुहुत्तगई, तहिं तहिं मंडले निअमा॥२४॥**

**[वृत्ति] एएण०।** एतेन च अनन्तरोक्तराशिना द्वाषष्टिमुहूर्तादिरूपेण मण्डलपरिधिराशिर्भक्तव्यः, भक्ते सति भवेद्यल्लब्धं सा सोमस्यैकैकमुहूर्ते गतिर्भवति तस्मिन् तस्मिन् मण्डले नियमात्। भावना यथा- सवर्णनार्थं द्वाषष्टिमुहूर्ता एकविंशत्यधिकशतद्वयगुणाः क्रियन्ते, जातम् १३७०२, उपरितनांशाः त्रयोविंशतिः क्षिप्यन्ते जातानि त्रयोदशसहस्राणि पञ्चविंशत्यधिकानि सप्तशतानि १३७२५, चन्द्रस्य सर्वाभ्यन्तमण्डलपरिधिर्योजनानि ३१५०८९ रूपः, सोऽपि २२१ गुणः क्रियते जातः षट्को नवकः षट्कःत्रिकःचतुष्कः षट्कः षट्को नवकश्चेति ६९६३४६६९, अस्य राशेः पूर्वोक्तेन त्रयोदशसहस्रविंशत्यधिकसप्तशतप्रमिताङ्केन १३७२५ भागहारे लब्धानि योजनानि ५०७३ अंशा ७७४४/१३७२५, एषा चन्द्रस्याभ्यन्तरमण्डले मुहूर्तगतिः।

द्वितीये चन्द्रमण्डले परिधिर्योजनानि ३१५३१९, सोऽपि २२१ गुणितो जातः षट्को नवकः षट्कोऽष्टकः पञ्चकः चतुष्को नवको नवकश्चेति ६९६८५४९९, अस्य राशेः पूर्वोक्तेन १३७२५ राशिना भागे लब्धानि योजनानि ५०७७ ३६७४/१३७२५, एषा द्वितीये मण्डले चन्द्रस्यैकैकमुहूर्ते गतिः।

एवं मण्डले मण्डले परिधिवृद्ध्या पूर्वपूर्वापेक्षया मुहूर्तगतिप्रमाणं प्रतिमण्डलं किञ्चिदूनपादोनचतुर्योजनवृद्ध्या तावन्नेयं यावत्सर्वबाह्यं मण्डलम्। तत्र च परिधियोजनानि ३१८३१५। अयमपि २२१ गुणितो जातः सप्तकः शून्यं त्रिकश्चतुष्कः सप्तकः षट्क एककः पञ्चकश्चेति ७०३४७६१५, अस्य राशेः १३७२५ भागे लब्धानि योजनानि ५१२५ ६९९०/१३७२५, एतावती सर्वबाह्ये मण्डले चन्द्रस्य प्रतिमुहूर्तं गतिः॥२४॥

## [सूर्यस्य मुहूर्तगतिकरणम्]

अथ सूर्यस्य मुहूर्तगतिकरणमाह—

**[मूल] मंडलपरिरयरासी, सट्ठी भइअम्मि होइ जं लद्धं।**
**सा सूरमुहुत्तगई, तहिं तहिं मंडले निअमा॥२५॥**

**[वृत्ति] मंडलपरिर०।** सूर्यस्य मण्डलपरिधिराशिः षष्ट्या ६० भज्यते, भक्ते सति यल्लब्धं भवति सा सूर्यस्यैकैकमुहूर्तगतिर्भवति तत्र तत्र मण्डले नियमात्। अत्र मण्डलपरिरयराशेः षष्ट्या भागकथनात् मण्डलभ्रमिकालस्य षष्टिमुहूर्तप्रमाणता ज्ञेया। भावना यथा—सूर्यस्य सर्वाभ्यन्तरे मण्डले परिधिः ३१५०८९, तस्य मण्डलभ्रमिमुहूर्ताङ्केन षष्ट्या ६० भागे लब्धानि ५२५१ २९/६०, एषा सर्वाभ्यन्तरे मण्डले सूर्यस्य प्रतिमुहूर्तं गतिः। पूर्वपरिधौ सप्तदशप्रक्षेपेऽन्ते षट्कः समायाति, तेन पञ्चत्रिंशत्षष्टिभागानां परिधेरधिकतायाश्च सम्मीलने एकं योजनं भवति, तत्प्रक्षेपे सप्तकः स्याद्, एवमन्यत्रापि योज्यम्, ततो द्वितीयमण्डले परिधिः ३१५१०७, तस्य षष्ट्या भागे लब्धानि योजनानि ५२५१ ४७/६०, एषा द्वितीयमण्डले सूर्यस्य प्रतिमुहूर्तं गतिः। एवं सर्वाभ्यन्तराद् बहिर्निष्क्रामतः सूर्यस्य मण्डले मण्डले पूर्वपूर्वानन्तरमुहूर्तगतिप्रमाणापेक्षया किञ्चिदूना अष्टादश षष्टिभागाः प्रवर्धमानाः तावद्वक्तव्या यावत्सर्वबाह्यमण्डलम्। तत्र परिधिः ३१८३१५, तस्य षष्ट्या भागे लब्धानि योजनानि ५३०५ १५/६०, एतावती सर्वबाह्ये मण्डले सूर्यस्य प्रतिमुहूर्तं गतिः। यथा यथा बहिर्निष्क्रामतोश्चन्द्रसूर्ययोः गतिर्वर्धते तथा तथा मध्ये प्रविशतोस्तेनैव प्रकारेण हीयत इत्यवसेयम्॥२५॥

## [नक्षत्रस्य मुहूर्तगतिकरणम्]

अथ सर्वनक्षत्राणां गाथाद्वयेन मुहूर्तगतिकरणमाह—

**[मूल] एगूणसट्ठिरूवा, सत्तहिं अहिगा उ तिन्नि अंससया।**
**तिन्नेव य सत्तट्ठा, छेओ पुण तेसि बोधव्वो॥२६॥**
**एएण य भइअव्वो, मंडलरासी हविज्ज जं लद्धं।**
**सा होइ मुहूत्तगई, रिक्खाणं मंडले नियमा॥२७॥**

**[वृत्ति] एगूणस०।** नक्षत्राणां मण्डलभ्रमिकालः एकोनषष्टिरूपाणि पूर्णा एकोनषष्टिमुहूर्ता इत्यर्थः, सप्ताधिकानि पुनः त्रिण्यंशशतानि एकस्य मुहूर्तस्य सप्तषष्ट्यधिकशतत्रयभागरूपाणि ५९ ३०७/३६७, इयता कालेन नक्षत्रं स्वं स्वं मण्डलं भ्रम्या पूरयति। अंशस्वरूपं सूत्रेणैवाह—छेदः पुनः तेषाम् मुहूर्तानां सप्तषष्ट्यधिकानि त्रिण्येव शतानि बोद्धव्यः॥२६॥

**एए०।** एतेन च अनन्तरोक्तराशिनैकोनषष्टिमुहूर्तादिरूपेण नक्षत्रमण्डलराशिर्भक्तव्यः, तत्करणे यल्लब्धं सा भवति प्रतिमुहूर्तं गतिः नक्षत्राणां मण्डले मण्डले नियमात्। भावना यथा—एकोनषष्टिर्मुहूर्ताः सवर्णनार्थं सप्तषष्ट्यधिकशतत्रयगुणाः क्रियन्ते जातम् २१,६५३, उपरितनानामंशानां च क्षेपे जातानि एकविंशतिसहस्राणि नवशतानि षष्ट्यधिकानि २१९६० सर्वाभ्यन्तरे नक्षत्रमण्डले परिधिः ३१५०८९। स च ३६७ गुणः क्रियते—एकक एककः पञ्चकः षट्कस्त्रिकः सप्तकः षट्कः षट्कस्त्रिकश्चेति ११५६३७६६३। अस्य पूर्वेण २१९६० भागे लब्धानि योजनानि पञ्चसहस्राणि पञ्चषष्ट्यधिके द्वे च शते एकस्य योजनस्य चैकविंशतिसहस्राणि

षष्ठ्यधिकानि नवशतानि, भागाः क्रियन्ते तत्सम्बन्धिनोऽष्टादशसहस्राणि त्रिषष्ट्यधिके द्वे च शते भागाः ५२६५ १८२६३/२१९६०, एतावती प्रतिमुहूर्तं सर्वाभ्यन्तरे मण्डले वर्तमानानाम् अभिजिदादिद्वादशनक्षत्राणां गतिः। एवं तृतीयादिचन्द्रमण्डलानां परिधिप्रमाणं परिभाव्य तत्तन्मण्डलस्थशेषनक्षत्राणामपि प्रतिमुहूर्तं गतिप्रमाणम् अवसातव्यम्, यतः प्रथमे चन्द्रमण्डलेऽभिजित् १श्रवण २ धनिष्ठा ३ शततारका ४ पूर्वभाद्रपद ५ उत्तरभाद्रपद ६ रेवती ७ अश्विनी ८ भरणी ९ पूर्वफाल्गुनी १० उत्तरफाल्गुनी ११ स्वाति १२ नक्षत्राणि भवन्ति (१)। तृतीये चन्द्रमण्डले पुनर्वसु १ मघा २ द्वे नक्षत्रे (२), षष्ठे चन्द्रमण्डले कृत्तिका (३), सप्तमे चन्द्रमण्डले रोहिणीचित्रे द्वे (४), अष्टमे चन्द्रमण्डले विशाखा (५), दशमे चन्द्रमण्डले अनुराधा (६), एकादशमे चन्द्रमण्डले ज्येष्ठा (७), पञ्चदशे चन्द्रमण्डले मृगशीर्ष १ आर्द्रा २ पुष्य ३ आश्लेषा ४ हस्त ५ मूल ६ पूर्वाषाढा ७ उत्तराषाढा ८ अष्टौ सन्ति, शेषेषु द्वितीयचतुर्थपञ्चमनवमद्वादशत्रयोदशचतुर्दशसङ्ख्येषु सप्तसु चन्द्रमण्डलेषु नक्षत्राणि न सन्ति। (८) तत्रान्तिमे नक्षत्रमण्डले परिधिः ३१८३१५, एषोऽपि ३६७ गुणं जातम्—एकक एककः षट्कोऽष्टको द्विक एककः षट्कः शून्यं पञ्चकश्चेति ११६८२१६०५, अस्य पूर्वोक्तेन २१९६० भागे लब्धानि योजनानि ५३१९ १६३६५/२१९६०, एषा बाह्ये मण्डले मृगशिरप्रभृतीनामष्टानां नक्षत्राणां प्रतिमुहूर्तं गतिः। ग्रहाणां तारकाणां च मण्डलमानभ्रमिकालमानमुहूर्तगतिमानादिकं वार्तमानिकशास्त्रेषु न दृश्यते।

किञ्च चन्द्रः साधिकैर्द्वाषष्ट्या मुहूर्तैर्मण्डलं पूरयति, सूर्योऽपि षष्ट्या मुहूर्तैर्मण्डलं पूरयति, नक्षत्रं साधिकैरेकोनषष्ट्या मुहूर्तैर्मण्डलं भ्रमणेन पूरयति। ततश्चन्द्रेभ्यः सूर्याः शीघ्रगतयः, तेभ्यो नक्षत्राणि शीघ्रगतीनि। ग्रहास्तु वक्रातीचारमन्दगतितो न नियतगतयस्तेन न तेषां गतिप्ररूपणोक्ता। यतः—

***चंदेहिं सिग्घयरा, सूरा सूरेहिं हुंति[१] णक्खत्ता[२]।***
***अणिअयगइपत्थाणा, हवंति सेसा गहा सव्वे॥[३]॥२७॥***

**[ज्योति. अधि. ८, गा.१४६]**

## [सर्वमण्डलेषु सूर्यस्योदयास्तान्तरं दिनमानं च]

अथ सर्वाभ्यन्तरे मण्डले वर्तमाने सूर्ये उदयास्तान्तरं दिनमानं चाह—

**[मूल] मज्झे उदयत्थंतर, चउणवइसहस्सपणसयछवीसा।**
**बायाल सट्ठिभागा, दिणं च (त) अट्ठारसमुहुत्तं॥२८॥**

**[वृत्ति] मज्झे०।** सर्वाभ्यन्तरे मण्डले वर्तमानस्य सूर्यस्य कर्काद्यदिने उदयास्तान्तरं चतुर्णवतिसहस्राणि पञ्चशतानि षड्विंशत्यधिकानि योजनानां द्विचत्वारिंशत्षष्ठिभागाश्च ९४५२६ ४२/६०। तदा तस्मिन् दिनेऽष्टादशमुहूर्तं दिनमानं भवतीति शेषः॥२८॥

१ **होंति** इति मु.

२ **नक्खत्ता** इति मु.

३ प्रतिज्ञातमेव निर्वाहयति-चन्द्रेभ्यः सूर्याः 'शीघ्रतराः' शीघ्रतरगतयः, सूर्येभ्यो नक्षत्राणि शीघ्रतराणि, ये तु ग्रहाः— अङ्गारकादयस्ते सर्वेऽपि वक्रानुवक्रगतिभावतोऽनियतगतिप्रस्थाना भवन्ति ज्ञातव्याः॥१४६॥

अथ प्रतिमण्डलं कियद्दिनमानं हीयते? सर्वबाह्ये मण्डले च गते सूर्ये कियद्दिनमानं सावशेषं तिष्ठति? इत्याह—

**[मूल] पइमंडल दिणहाणी, दुण्ह मुहूत्तेगसट्ठिभागाणं।**
**अंते बार मुहुत्तं, दिणं निसा तस्स विवरीआ॥२९॥**

**[वृत्ति] पइ०।** प्रतिमण्डलं द्वयोर्मुहूर्तैकषष्ठिभागयोर्दिनस्य हानिर्भवति। अयमर्थः- एकस्य मुहूर्तस्यैकषष्ठिभागाः क्रियन्ते तत्सम्बन्धिनौ द्वौ भागौ हीयेते। अंते इति सर्वबाह्यमण्डले वर्तमाने सूर्ये द्वादशमुहूर्तं दिनं भवति। अत्र त्रैराशिककरणं ज्ञेयम्—यद्यशीत्यधिकशतदिनैः षण्मुहूर्तानां हानिस्तदैकैकेन दिनेन का हानिः? इति, राशित्रयन्यासो यथा -१८३-६-१ मध्योऽन्त्यगुणः क्रियते, एकेन गुणितं तदेव भवति जाताः षट्, आदिना च भागाप्राप्तौ षडेकषष्ठिगुणाः क्रियन्ते जाताः ३६६, ते त्र्यशीत्यधिकशतेन भज्यन्ते, लब्धौ द्वौ मुहूर्तैकषष्ठिभागौ २/६१, एतौ कर्कात्प्रभृति प्रतिदिनं हीयते, मकरात्प्रभृति प्रतिदिनं च वर्धते।

यच्च भगवत्यामेकादशे शत एकादशोद्देशके[१]—एकस्य मुहूर्तस्य द्वाविंशत्यधिकं शतं भागाः क्रियन्ते तादृशाश्चत्वारो भागा हानौ वृद्धौ चोक्ताः, अत्रैकषष्ठिकौ द्वौ भागौ, उभयोर्नार्थभेदः। एतावता किञ्चिदूनं पलचतुष्कं जातम्, यथा पलानि ३ अक्षराणि ५६ एकाक्षरस्य भागाः १२/१८३, यतः १८३ दिनैः षण्मूहूर्ता वर्धन्ते प्रतिमुहूर्तं पलानि १२०, तानि च षड्गुणानि ७२०, तानि त्र्यशीत्यधिकेन शतेन भज्यन्ते लब्धानि त्रीणि ३ पलानि, शेषम् १७१, तानि भागाप्राप्तौ षष्ठ्यक्षरगुणितानि १०२६०, तेऽङ्काः १८३ भक्ता लब्धा ५६ वर्णाः, शेषा एकस्याक्षरस्य द्वादश भागाश्च[२]। १२/१८३। **[भग.सू.-श.११, उ.११, सू. ४२५]**

---

१ भगवतीसूत्र शतक ११, उद्देश ११, सूत्र ४२५।

२ उक्कोसिया अद्धपंचममुहुत्ता दिवसस्स वा राईण वा पोरिसी भवइ जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ, जदा णं भंते! उक्कोसिया अद्धपंचमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति तदा णं कतिभागमुहुत्तभागेणं परिहायमाणी परि० २ जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति?, जदा णं जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति तदा णं कतिभागमुहुत्तभागेणं परिवड्ढमाणी २ उक्कोसिया अद्धपंचमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ? सुदंसणा! जदा णं उक्कोसिया अद्धपंचमुहुत्ता दिवसस्स वा राईए पोरिसी भवइ तदा णं बावीससयभागमुहुत्तभागेणं परिहायमाणी परि० २ जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ, जदा णं जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ तया णं बावीससयभागमुहुत्तभागेणं परिवड्ढमाणी परि० २ उक्कोसिया अद्धपंचममुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति। कदा णं भंते! उक्कोसिआ अद्धपंचममुहुत्ता दिवसस्स राईए वा पोरिसी भवइ? कदा वा जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ?, सुदंसणा! जदा णं उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ जहन्निया दुवालसमुहुत्ता राई भवइ तदा णं उक्कोसिया अद्धपंचममुहुत्ता दिवसस्स पोरिसी भवइ जहन्निया तुमुहुत्ता राईए पोरिसी भवइ, जया णं उक्कोसिया अट्ठारसमुहुत्तिआराई भवति जहन्निए दुवालसमुहुत्ते दिवसे भवइ तदा णं उक्कोसिया अद्धपंचममुहुत्ता राईए पोरिसी भवइ जहन्निया तिमुहुत्ता दिवसस्स पोरिसी भवइ। कदा णं भंते! उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ जहन्निया दुवालसमुहुत्ता राई भवइ? कदा वा उक्कोसिया अट्ठारसमुहुत्ता राई भवति जहन्नए दुवालसमुहुत्ते दिवसे भवइ?, सुदंसणा! आसाढपुन्निमाए उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ जहन्निया दुवालसमुहुत्ता राई भवइ, पोसस्स पुन्निमाए णं उक्कोसिया अट्ठरसमुहुत्ता राई भवइ जहन्नए दुवालस मुहुत्ते दिवसे भवइ॥ अत्थि णं भंते! दिवसा य राईओ य समा चेव भवन्ति?, हंता! अत्थि, कदा णं भंते! दिवसा य राईओ य समा चेव भवन्ति?, सुदंसणा! चित्तासोयपुन्निमासु णं, एत्थ णं दिवसा य राईओ य समा चेव भवन्ति, पन्नरसमुहुत्ते दिवसे पन्नरसमुहुत्ता राई भवइ चउभागमुहुत्तभागूणा चउमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ, सेत्तं पमाणकाले॥ (सू. ४२५)

**'उक्कोसिये'** त्यादि, 'अद्धपंचममुहुत्त' त्ति अष्टादशमुहूर्तस्य दिवसस्य रात्रेर्वा चतुर्थो भागो यस्मादर्धपञ्चममुहूर्ता नवघटिका इत्यर्थः

तथा **निसा तस्स विवरीअ** त्ति। निशा रात्रिर्दिनाद्विपरीता ज्ञेया, कोऽर्थः? यदा दिनमानमष्टादशमुहूर्तं तदा निशा द्वादशमुहूर्ता, यदा दिनं द्वादशमुहूर्तं तदा निशाष्टादशमुहूर्ता। अत्रापि हानिवृद्धी दिनवज्ज्ञेये॥२९॥

अथ सर्वबाह्ये मण्डले तथा प्रथमवर्जसर्वमण्डलेषु सूर्यस्योदयास्तान्तरयोजनसङ्ख्यामाह—

**[मूल] उदयत्थंतर बाहिं, सहसा तेसट्ठि छसय तेसट्ठा।**
**तह इगससिपरिवारे, रिक्खडवीसाऽसीइ गहा॥३०॥**

**[वृत्ति] उद०। बाहिं** इति सर्वबाह्यमण्डले सूर्यस्योदयस्तान्तरं त्रिषष्ठिसहस्राणि षट्शतानि त्रिषष्ट्यधिकानि योजनानाम् ६३६६३। अत्र सूत्रेऽनुक्तापि द्वात्रिंशत्तमगाथावृत्तौ करणेन वक्ष्यमाणा प्रथममण्डलापेक्षया प्रतिदिनम् उदयास्तान्तरहानिः साधिकं द्विसप्ततिशतं योजनानाम् १७२ १०/६० १४४/१८३। पूर्वपश्चिमयोश्च तदर्धं साधिका षडशीतिर्योजनानां ज्ञेया। सर्वत्र दिनार्धयोजनैः सूर्य उदयास्तमनयोर्दृश्यत इति गाथापूर्वार्धः। **तह इग त्ति।** तथैकस्य शशिनः परिवारे ऋक्षाणि नक्षत्राण्यभिजिदादी न्यष्टाविंशतिः। अष्टाशीतिर्ग्रहा मङ्गलादयः, तन्नामानि चन्द्रप्रज्ञप्त्यादिभ्यो ज्ञेयानि॥३०॥

## [तारकसङ्ख्या]

अथ तारकसङ्ख्यामाह—

**[मूल] छावट्ठिसहस्साइं, सयाइं नव पंचहत्तरी अ तहा।**
**इगससिणो परिवारे, तारागणकोडिकोडीणं॥३१॥**

**[वृत्ति] छाव०।** एकस्य शशिनः परिवारे तारकाणां सम्बन्धिनीनां कोटाकोटीनां षट्षष्ठिसहस्राणि नवशतानि पञ्चसप्ततिश्च, अङ्कतो यथा ६६९७५ शू० १४। एतच्च ग्रह ८८ नक्षत्र २८ तारकराशित्रिकं नर लोकगतद्वात्रिंशदधिकशतचन्द्रैः१३२ गुणितमेतद्भवति, यथा—

***इक्कारस य सहस्सा, छप्पि अ सोला महग्गहाणं तु (११६१६)।***
***छच्च सया छन्नउआ, नक्खत्ता तिन्न अ सहस्सा (३६९६)॥***

---

ततोऽर्धपञ्चमा मुहूर्ता यस्यां सा तथा, **'तिमुहुत्त'** त्ति द्वादशमुहूर्तस्य दिवसादेश्चतुर्थो भागस्त्रिमुहूर्तो भवति अतस्त्रयो मुहूर्ताः —षट् घटिका यस्यां सा तथा, **'कइभागमुहुत्तभागेणं'** त्ति कतिभागः —कतिभागस्तद्रूपो मुहूर्तभागः कतिभागमुहूर्तभागस्तेन, कतिथेन मुहूर्तांशेनेत्यर्थः **'बावीससयभागमुहुत्तभागेणं'** त्ति इहार्धपञ्चमानां त्रयाणां च मुहूर्तानां विशेषःसार्धो मुहूर्तः, स च त्र्यशीत्यधिकेन दिवसशतेन वर्धते हीयते च, स च सार्धो मुहूर्तस्त्र्यशीत्यधिकशतभागतया व्यवस्थाप्यते, तत्र च मुहूर्ते द्वाविशत्यधिकं भागशतं भवत्यतोऽभिधीयते—**'बावीसे'** त्यादि, द्वाविशत्यधिकशततमभागरूपेण मुहूर्तभागेनेत्यर्थः। **'आसाढपुन्निमाए'** इत्यादि, इह 'आषाढपौर्णमास्या'मिति यदुक्तं तत् पञ्च संवत्सरिकयुगस्यान्तिमवर्षापेक्षयावसेयम्, यतस्तत्रैवाषाढपौर्णमास्यामष्टादशमुहूर्तो दिवसो भवति, अर्धपञ्चममुहूर्ता च तत्पौरुषी भवति, वर्षान्तरे तु यत्र दिवसे कर्कसङ्क्रान्तिर्जायते तत्रैवासौ भवतीति समवसेयमिति, एवं पौषपौर्णमास्यामप्यौचित्येन वाच्यमिति॥ अनन्तरं रात्रिदिवसयोर्वैषम्यमभिहितम्, अथ तयोरेव समतां दर्शयन्नाह— **'अत्थि ण'** मित्यादि, इह च **'चेत्तासोयपुन्निमाएसु ण'** मित्यादि यदुच्यते तद्व्यवहारनयापेक्षम्, निश्चयतस्तु कर्कमकरसङ्क्रान्तिदिनादारभ्य यद् द्विनवतितममहोरात्रं तस्यार्धे समा दिवरात्रिप्रमाणतेति, तत्र च पञ्चदशमुहूर्ते दिने रात्रौ वा पौरुषीप्रमाणं त्रयो मुहूर्तास्त्रयश्च मुहूर्तचतुर्भागा भवन्ति, दिनचतुर्भागरूपत्वात्तस्याः, एतदेवाह— **'चउभागे'** त्यादि, चतुर्भागरूपो यो मुहूर्तभागस्तेनोना चतुर्भागमुहूर्तभागोना चत्वारो मुहूर्ता यस्यां पौरुष्यां सा तथेति॥

***अट्ठासीइ लक्खा, चालीस सहस्स मणुअलोगम्मि।***
***सत्त य सया अणूणा, तारागणकोडिकोडीणं॥***

**[ज्योति.१२५,१२६]**

तथा समयक्षेत्रवर्तिनि द्वीपे समुद्रे यावन्तश्चन्द्राः तदङ्कराशिना एकचन्द्रसैन्याङ्के गुणिते तत्तद्वीपसमुद्रवर्तिग्रहादिसङ्ख्या स्वयं ज्ञेया यन्त्रकाद्वा अवधार्या। अत्र तारकाणां बहुत्वात्क्षेत्रस्य स्तोकत्वाच्च केचित्कोटाकोटिरिति सञ्ज्ञान्तरं मन्यन्ते। केचिच्च तारकविमानान्युत्सेधाङ्गुलप्रमाणेन मन्यन्ते। किञ्चैतत्सैन्यं सूर्यस्यापि साधारणम् चन्द्रस्येव तत्सैन्यस्य सूर्योऽप्यधिप इति। यदुक्तं जीवाभिगमे ज्योतिष्कोद्देशे—

***एगमेगस्स णं भन्ते! चन्दिमसूरिअस्स चन्दिमसूरिअस्स केवइओ परिवारो पन्नत्तो? त्ति सूत्रम्।*** **[जीवा.सू.१९४]**

अस्य वृत्त्येकदेशो यथा—***एकैकस्य भदन्त! चन्द्रसूर्यस्य चन्द्रसूर्यस्य अनेन च पदेन यथा नक्षत्रादीनां चन्द्रः स्वामी तथा सूर्यस्यापि तस्यापीन्द्रत्वादिति ख्यापयति।*** **[जीवा.मल.वृ.१९४]**

यद्वा समवायाङ्गवृत्तौ अष्टाशीतिस्थानकेऽपि अयमेवाभिप्रायोऽस्ति[१] तेन चन्द्रसूर्यौ ग्रहेभ्यो भिन्नौ तौ ग्रहाधिपौ ज्ञेयौ॥३१॥

| नामानि | जम्बूद्वीपे | लवणाब्धौ | धातकीखण्डे | कालोदे | पुष्करार्धे | सर्वसङ्ख्या |
|---|---|---|---|---|---|---|
| चन्द्रसूर्याः | २ | ४ | १२ | ४२ | ७२ | १३२ |
| ग्रहाः | १७६ | ३५२ | १०५६ | ३६९६ | ६३३६ | ११६१६ |
| नक्षत्राणि | ५६ | ११२ | ३३६ | ११७६ | २०१६ | ३६९६ |
| तारककोटि-कोटय | १३३९५ शू०१५ | २६७९ शू०१६ | ८०३७ शू०१६ | २८१२९५ शू०१५ | ४८२२२ शू०१६ | ८८४०७ शू०१६ |

## [सूर्यचन्द्रयोः प्रकाशक्षेत्रे हानिवृद्धी]

अथ चन्द्रसूर्याणां केन प्रकारेण कदा प्रकाशक्षेत्रं वर्धते? कदा च हीयते? तदाह—

**[मूल] तेसिं पविसंताणं, तावक्खित्तं तु वड्ढए निअमा।**
**तेणेव कमेण पुणो, परिहायइ निक्खमंताणं॥३२॥**

**[वृत्ति] तेसिं०।** तेषां सूर्याचन्द्रमसां सर्वबाह्यान्त् मण्डलादभ्यन्तरं प्रविशतां तापक्षेत्रं प्रतिदिवसं क्रमेण नियमाद् आयामतो वर्धते। येनैव क्रमेण परिवर्धते तेनैव क्रमेण सर्वाभ्यन्तरात् मण्डलाद्बहिर्निष्क्रामतां

---

१ एगमेगस्स णं चंदिमसूरियस्स अट्ठासीतिं अट्ठासीतिं महग्गहा परिवारो पण्णत्तो। [टी] अष्टाशीतिस्थानके किञ्चिद् विव्रियते, एकैकस्यासङ्ख्यातानामपि प्रत्येकमित्यर्थः, चन्द्रमाश्च सूर्यश्च चन्द्रमःसूर्यम्, तस्य चन्द्र-सूर्ययुगलस्य इत्यर्थः, अष्टाशीतिर्महाग्रहाः, एते च यद्यपि चन्द्रस्यैव परिवारोऽन्यत्र श्रूयते तथापि सूर्यस्यापीन्द्रत्वादेतद् एव परिवारतयावसेया इति।

परिहीयते। तथाहि—सर्वबाह्ये मण्डले चारं चरतां सूर्याचन्द्रमसां प्रत्येकं चतुर्णामपि दशधा प्रविभक्तस्य जम्बूद्वीपचक्रवालस्य द्वौ द्वौ भागौ तापक्षेत्रस्य भवतः। ततः सूर्यस्याभ्यन्तरं प्रविशतः प्रतिमण्डलं षष्ठ्यधिकषट्त्रिंशच्छत ३६६० प्रविभक्तस्य जम्बूद्वीपचक्रवालस्य द्वौ द्वौ भागौ तापक्षेत्रस्य वर्धेते। चन्द्रमसस्तु मण्डले मण्डले प्रत्येकं पौर्णमासीसम्भवे क्रमेण प्रतिमण्डलं षड्विंशतिः षडविंशतिर्भागाः सप्तविंशतितमस्य च भागस्यैकः सप्तभागः २६ १/७।

रवेरभ्यन्तरमण्डलपरिधिः३१५०८९, स च ३६६० भक्तो लब्धोः षडशीतिः ८६, शेषाः ३२९, ते षष्ठिगुणिताः १९७४० तेऽपि च ३६६० भक्ता लब्धाः पञ्च ५/६०शेषाः १४४०/३६६०। चन्द्रस्य तु २६ षड्विंशत्या गुण्यते २२३६, एकसप्तभागः षडशीतिगुणस्तदा ८६, स सप्तधा भक्तो लब्धाः १२, ते २२३६ मध्ये क्षिप्ताः २२४८ पञ्च भागाः षडविंशतिगुणा जाताः१३०,ते षष्ठ्या हृता लब्धौ द्वौ, तौ २२४८ मध्ये क्षिप्तौ जातौ २२५०। तेषां तापक्षेत्राकारास्त्वन्तः सङ्कुचिता बहिर्विस्तृताः कलम्बुकापुष्पसंस्थानसंस्थिताः, कोऽर्थः? मेरुदिशि सङ्कुचिता लवणदिशि विस्तृताः। उक्तं हि—

***तेसिं कलंबुआपुप्फसंठिआ हुंति तावखित्तपहा।***

***अंतेसंकुइआ बाहि वित्थडा चंदसूराणं[१]॥ ति॥३२॥***

**[जीवा.सू.प्र.३, उ.२, सू.१७७]**

### [सूर्यस्य तापक्षेत्रे भागाः]

अथोत्कृष्टदिवसे जम्बूद्वीपस्य दशभागकल्पनयैकैकसूर्यस्य तापक्षेत्रे कियन्तो भागाः? इत्याह—

**[मूल] दीवस्स य दसभागा, इगपासे हुंति तिन्नि दिवसस्स।**

**कक्कस्स य पढमदिणे, भागा पुण दुन्नि रयणीए॥३३॥**

**[वृत्ति] दीव०।** द्वीपस्य त्रयः दशभागा एकैकपार्श्वे दिवसस्य सूर्यतापक्षेत्रस्य कर्कसङ्क्रान्तिप्रथमदिने भवन्ति। कोऽर्थः? दशधा विभक्ते जम्बूद्वीपचक्रवाले यल्लब्धं तादृशाः त्रयो भागा एकस्मिन्पार्श्वे दक्षिणतः उत्तरतो वा। तदा रात्रेः पुनर्दशभक्तौ द्वौ भागौ भवतः। दिवससत्कभागत्रययोजनानि ९४५२६ ४२/६०, रात्रिसम्बन्धिभागद्वय-योजनानि ६३०१७ ४८/६०, उभयोर्मीलने १५७५४४ ३०/६०। एवं द्वितीयसूर्यस्यापि दिनं रात्रिश्च, सर्वमीलने ३१५०८९ सर्वाभ्यन्तरमण्डलपरिधिर्जातः।

अत्र मेरुं प्रति नवयोजनसहस्राणि चत्वारि शतानि षडशीत्यधिकानि नव च दश भागा योजनस्य इत्येतत्सर्वोत्कृष्टदशभागत्रयरूपं तापक्षेत्रप्रमाणं भवति ९४८६ ९/१०। कथम्? मन्दरपरिक्षेपस्य किञ्चिन्न्यू-

---

१ 'कदम्बपुष्पसंस्थितम्' कदम्बपुष्पवद् अधःसङ्कुचितमुपरि विस्तीर्णं उत्तानीकृतार्धकपित्थसंस्थितमिति भावः 'चारं चरति' चारं प्रतिपद्यते, तथा जगत्स्वाभाव्यात्, ताराग्रहणं चोपलक्षणम्, ततः सूर्यादयोऽपि यथोक्तसङ्ख्याका मनुष्यलोके तथाजगत्स्वाभाव्याच्चारं प्रतिपद्यन्त इति द्रष्टव्यम्॥

नत्रयोविंशत्युत्तरषट्शताधिकैकत्रिंशद्योजनसहस्रमानस्य ३१६२३ दशभिर्भागे हृते यल्लब्धं तस्य त्रिगुणत्वे एतस्य भावादिति। जघन्यदिवसे तु मेरुं प्रति भागद्वयं षड्योजनसहस्राणि त्रीणि शतानि चतुर्विंशत्यधिकानि षट्दशभागाः ६३२४ ६/६०॥३३॥




अथ क्रमेण हीयमानं जघन्यदिवसे यावत्प्रमाणं तापक्षेत्रमवशिष्यते तदाह—

**[मूल] मयरम्मि दुन्नि भागा, दिवसस्स य हुंति तिन्नि रयणीए।**
**एवं नायव्वाओ, दिणरत्तीवुड्ढिहाणीओ॥३४॥**

**[वृत्ति] मय०।** कर्कसङ्क्रान्तेर्द्वितीयदिनादारभ्य षड्भिर्मासैर्यावन्मकरसङ्क्रान्त्याद्यदिनं तत्र परिपूर्ण एको भागो न्यूनो जातः, तेन सर्वबाह्यमण्डले सञ्चरतः सूर्यस्य द्वौ भागौ तापक्षेत्रसम्बन्धिनौ भवतः, त्रयो भागा रात्रेश्चेति अवगन्तव्याः। अत्र दिनसत्कभागद्वयेन ६३६६३ योजनानि, रात्रिसत्कभागत्रयेण च ९५४९४ ३०/६०, दिनरात्रिमीलने १५९१५७। एवं द्वितीयसूर्यस्यापि। एतदङ्कमीलने सर्वबाह्यमण्डलपरिधिर्जातः ३१८३१५। तथा कर्काद्यदिने ९४५२६ १२/६० उदयास्तान्तरं, मकराद्यदिने च ६३६६३ योजनानि, उभयमीलने १५८१८९ ४२/६०, पुनरर्धे कृते यद्भवति तच्च बहिर्गच्छतस्तुलाद्यदिने। मध्ये प्रविशतश्च मेषाद्यदिने द्विनवतितममण्डले सूर्यस्योदयास्तान्तरम् ७९०९४ ५१/६०। द्वयोः सूर्ययोः दिनरात्र्यपेक्षयैतद्राशौ चतुर्गुणे कृते तन्मण्डलपरिधिर्जायते, यथा—३१६३७९ २४/६०,तदा पञ्चदशमुहूर्तं दिनम्, पञ्चदशमुहूर्ता रात्रिरपि। सार्धौ द्वौ भागौ जम्बूद्वीपचक्रवालदशभागानां तापक्षेत्रं भवति। एवं इति एवं पूर्वोक्तप्रकारेण दिनरात्रिवृद्धिहानी

ज्ञेये। वृद्धिहानियोजनानि प्रागुक्तानि। अत्र विशेषार्थिना भगवतीपञ्चमशतकवृत्तिरवगाह्या[१] उद्योतान्धकारयन्त्रं

---

१ तेणं कालेणं २ समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूतीणामं अणगारे गोयमगोत्तेणं जाव एवं वदासी— जंबूद्दीवे णं भंते! दीवे सूरिया उदीणपादीणमुग्गच्छ पादीणदाहिणमागच्छंति, पादीणदाहिणमुग्गच्छ दाहीणपडीणमागच्छंति, दाहिणपडीणमुग्गच्छ पडीणउदीणमागच्छंति पदीणउदीणं उग्गच्छ उदीचिपादीणमागच्छंति?, हंता! गोयमा! जंबूद्दीवे णं दीवे सूरिया उदीचिपाईणमुग्गच्छ जाव उदीचिपाईणमागच्छंति।। (सू. १७६) 'सूरिय' त्ति द्वौ सूर्यौ, जम्बूद्वीपे द्वयोरेव भावात् 'उदीणपाईणं' ति उदगेव उदीचीनं प्रागेव प्राचीनं उदीचीनं च तदुदीच्या आसन्नत्वात् प्राचीनं च तत्प्राच्याः प्रत्यासन्नत्वाद् उदीचीनप्राचीनं-दिगन्तरं क्षेत्रदिगपेक्षया पूर्वोत्तरदिगित्यर्थः 'उग्गच्छ' त्ति उद्गत्य क्रमेण तत्रोद्गमनं कृत्वेत्यर्थः 'पाईणदाहिणं' ति प्राचीनदक्षिणं दिगन्तरं पूर्वदक्षिणमित्यर्थः 'आगच्छंति' त्ति आगच्छतः क्रमेणैवास्तं यात इत्यर्थः, इह चोद्गमनमस्तमयं च द्रष्टृलोकविवक्षयावसेयं, तथाहि— येषामदृश्यौ सन्तौ दृश्यौ तौ स्यातां ते तयोरुद्गमनं व्यवहरन्ति येषां तु दृश्यौ सन्तावदृश्यौ स्तस्ते तयोरस्तमयं व्यवहरन्तीत्यनियतावुदयास्तमयौ, आह च—

"जह जह समए समए पुरओ संचरइ भक्खरो गयणे। तह तह इओवि नियमा जायइ रयणीय भावत्थो।।१।।

एवं च सइ नराणं उदयत्थमणाइं होंतऽनिययाइं। सइ देसभेए कस्सइ किंची ववदिस्सए नियमा।।२।।

सइ चेव य निद्दिट्ठो भद्दमुहुत्तो कमेण सव्वेसिं। केसिंचीदाणिंपि य विसयपमाणे रवी जेसिं।।३।।" इत्यादि, अनेन च सूत्रेण सूर्यस्य चतसृषु दिक्षु गतिरुक्ता, ततश्च ये मन्यन्ते सूर्यः पश्चिमसमुद्रं प्रविश्य पातालेन गत्वा पुनः पूर्वसमुद्रमुदेतीत्यादि तन्मतं निषिद्धमिति।। इह च सूर्यस्य सर्वतो गमनेऽपि प्रतिनियतत्वात्तत्प्रकाशस्य रात्रिदिवसविभागोऽस्तीति तं क्षेत्रभेदेन दर्शयन्नाह—

जया णं भंते! जंबूद्दीवे २ दाहिणड्ढे दिवसे भवति तदाणं उत्तरड्ढे दिवसे भवति तदा णं उत्तरड्ढेवि दिवसे भवति तदा णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं राती भवति?, हंता गो यमा! जया णं जंबूद्दीवे २ दाहिणड्ढेवि दिवसे जाव राती भवति। जदा णं भंते! जंबू० मंदरस्स पव्वयस्स पुरच्छिमेणं दिवसे भवति तदा णं पच्चत्थिमेणवि दिवसे भवति जया णं पच्चत्थिमेणं दिवसे भवति तदा णं जंबूद्दीवे २ मंदरस्स पव्वयस्स उत्तरदाहिणेणं राती भवति?, हंता गोयमा! जदा णं जंबू० मंदरपुरच्छिमेणं दिवसे जाव राती भवति, जदा णं भंते! जंबूद्दीवे २ दाहिणड्ढे उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति तदा णं उत्तरड्ढेवि उक्कोसए अट्ठरसमुहुत्ते दिवसे भवति जदा णं उत्तरद्धे उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति तदा णं जंबूद्दीवे २ मंदरस्स पुरच्छिमपच्चत्थिमेणं जहन्निया दुवालसमुहुत्ता राती भवति?, हंता गोयमा! जदा णं जंबू० जाव दुवालसमुहुत्ता राती भवति। जदा णं जंबू० मंदरस्स पुरच्छिमेणं उक्कोसए अट्ठारस जाव तदा णं जंबूद्दीवे २ पच्चत्थिमेणवि उक्को० अट्ठारसमुहुत्ते दिवसे भवति जया णं पच्चत्थिमेणं उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति तदा णं भंते! जंबूद्दीवे २ उत्तर० दुवालसमुहुत्ता जाव राती भवति?, हंता गोयमा! जाव भवति। जया णं भंते! जंबू० दाहिणड्ढे अट्ठारसमुहुत्ताणंतरे दिवसे भवति तदा णं उत्तरे अट्ठारसमुहुत्ताणंतरे दिवसे भवति जदा णं उत्तरे अट्ठारसमुहुत्ताणंतरे दिवसे भवति तदा णं जंबू० मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं सातिरेगा दुवालस मुहुत्ता राती भवति?, हंता गोयमा! जदा णं जंबू० जाव राती भवति। जदा णं भंते! जंबूद्दीवे २ पुरच्छिमेणं अट्ठारसमुहुत्ताणंतरे दिवसे भवति तदा णं पच्चत्थिमेणं अट्ठारसमुहुत्ताणंतरे दिवसे भवति जदा णं पच्चत्थिमेणं अट्ठारसमुहुत्ताणंतरे दिवसे भवति तदा णं जंबू० मंदरस्स पव्वयस्स दाहिणेणं साइरेगा दुवालसमुहुत्ता राती भवति?, हंता गोयमा! जाव भवति।। एवं एतेणं कमेणं ओसारेयव्वं सत्तरसमुहुत्ते दिवसे तेरसमुहुत्ता राती भवति सत्तरसमुहुत्ताणंतरे दिवसे सातिरेगा तेरसमुहुत्ता राती सोलसमुहुत्ते दिवसे चोद्दसमुहुत्ता राई सोलसमुहुत्ताणंतरे दिवसे सातिरेगचोद्दसमुहुत्ता राती पन्नरसमुहुत्ते दिवसे पुन्नरसमुहुत्ता राती भवति पन्नरसमुहुत्ताणंतरे दिवसे सातिरेगा-पन्नरसमुहुत्ता राती चोद्दसमुहुत्ते दिवसे सोलसमुहुत्ता राती चोद्दसमुहुत्ताणंतरे दिवसे सातिरेगा सोलसमुहुत्ता राती तेरसमुहुत्ते दिवसे सत्तरसमुहुत्ता राती तेरसमुहुत्ताणंतरे दिवसे सातिरेगा सत्तरसमुहुत्ता राती। तया णं जंबू० दाहिणड्ढे जहण्णए दुवालसमुहुत्ते दिवसे भवति तया णं उत्तरड्ढेवि, जया णं उत्तरड्ढे तया णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमेणं उक्कोसिया अट्ठारसमुहुत्ता राती भवति?, हंता गोयमा! एवं चेव उच्चारेयव्वं जाव राई भवति। जया णं भंते! जंबू० मंदरस्स पव्वयस्स पुरच्छिमेणं जहन्नए दुवालसमुहुत्ते दिवसे भवति तया णं पच्चत्थिमेणवि० तया णं जंबू० मंदरस्स उत्तरदाहिणेणं उक्कोसिया अट्ठारसमुहुत्ता राती भवति?, हंता गोयमा! जाव राती भवति।। (सू.१७७)।।

'जयाण' मित्यादि, इह सूर्यद्वयभावादेकदैव दिग्द्वये दिवस उक्तः, इह च यद्यपि दक्षिणार्धे तथोत्तरार्धे इत्युक्तं तथापि दक्षिणभागे उत्तरभागे चेति बोद्धव्यम्, अर्धशब्दस्य भागमात्रार्थत्वात्, यतो यदि दक्षिणार्धे उत्तरार्धे च समग्र एव दिवसः स्यात्तदा कथं पूर्वेणापरेण च रात्रिः स्यादिति वक्तुं युज्येत, अर्धद्वयग्रहणेन सर्वक्षेत्रस्य गृहीतत्वात्, इतश्च दक्षिणार्धादिशब्देन दक्षिणादिदिग्भागमात्रमेवावसेयं न त्वर्धम्, अतो

---

यदापि दक्षिणोत्तरयोः सर्वोत्कृष्टो दिवसो भवति तदापि जम्बूद्वीपस्य दशभागत्रयप्रमाणमेव तापक्षेत्रं तयोः प्रत्येकं स्याद्, दशभागद्वयमानं च पूर्वपश्चिमयोः प्रत्येकं रात्रिक्षेत्रं स्यात्, तथाहि— षष्ट्या मुहूर्तैः किल सूर्यो मण्डलं पूरयति, उत्कृष्टदिनं चाष्टादशभिर्मुहूर्तैरुक्तम्, अष्टादश च षष्टेर्दशभागत्रितयरूपा भवन्ति, तथा यदाष्टादशमुहूर्तो दिवसो भवति तदा रात्रिर्द्वादशमुहूर्ता भवति, द्वादश च षष्टेर्दशभागद्वयरूपा भवन्तीति, तत्र च मेरुं प्रति नव योजनसहस्राणि चत्वारि शतानि षडशीत्यधिकानि नव च दश भागायोजनस्येत्येतत्सर्वोत्कृष्टदिवसे दशभागत्रयरूपं तापक्षेत्रप्रमाणं भवति ९४८६, ९/१०, कथम्?, मन्दरपरिक्षेपस्य किञ्चिन्न्यूनत्रयोविंशत्युत्तरषट्शताधिकैकत्रिंशद्योजनसहस्रमानस्य ३१६-२३ दशभिर्भागे हृते यल्लब्धम् ३१६२, ३/१० तस्य त्रिगुणितत्वे एतस्य भावादिति। तथा लवणसमुद्रं प्रति चतुर्नवतिर्योजनानां सहस्राणि अष्टौ शतान्यष्टषष्ट्यधिकानि चत्वारश्च दशभागा योजनस्येत्येतदुत्कृष्टदिने तापक्षेत्रप्रमाणं भवति ९४८६८, ४/१०, कथम्? जम्बूद्वीपरिधेः किञ्चिन्न्यूनाष्टाविंशत्युत्तरशतद्वयाधिकषोडशसहस्रोपेतयोजनलक्षत्रयमानस्य ३१६२२८ दशभिर्भागे हृते यल्लब्धं तस्य त्रिगुणितत्वे एतस्य भावादिति। जघन्यरात्रिक्षेत्रप्रमाणं चाप्येवमेव, नवरं परिधेर्दशभागो द्विगुणः कार्यः, तत्राद्यं षड् योजनानां सहस्राणि त्रीणि शतानि चतुर्विंशत्यधिकानि षट् च दशभागा योजनस्य ६३२४, ६/१० द्वितीयं तु त्रिषष्टिः सहस्राणि द्वे पञ्चचत्वारिंशदधिके योजनानां शते षट् च दशभागा योजनस्य ६३२४५, ६/१० सर्वलघौ च दिवसे तापक्षेत्रमनन्तरोक्तरात्रिक्षेत्रतुल्यं रात्रिक्षेत्रं त्वनन्तरोक्ततापक्षेत्रतुल्यमिति, आयामतस्तु तापक्षेत्रं जम्बूद्वीपमध्ये पञ्चचत्वारिंशद्योजनानां सहस्राणीति, लवणे च त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशदधिकानि त्रिभागश्च योजनस्य ३३३३३, १/३, उभयमीलने त्वष्टसप्ततिः सहस्राणि त्रीणि शतानि त्रयस्त्रिंशदधिकानि योजनत्रिभागश्चेति ७८३३३, १/३। 'उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ' त्ति इह किल सूर्यस्य चतुरशीत्यधिकं मण्डलशतं भवति, तत्र किल जम्बूद्वीपमध्ये पञ्चषष्टिर्मण्डलानि भवन्ति, एकोनविंशत्यधिकं च तेषां शतं लवणसमुद्रस्य मध्ये भवति, तत्र च सर्वाभ्यन्तरे मण्डले यदा वर्तते सूर्यस्तदाष्टादशमुहूर्तो दिवसो भवति, कथम्? यदा सर्वबाह्ये मण्डले वर्ततेऽसौ तदा सर्वजघन्यो द्वादशमुहूर्तो दिवसो भवति, ततश्च द्वितीयमण्डलादारभ्य प्रतिमण्डलं द्वाभ्यां मुहूर्तैकषष्टिभागाभ्यां दिनस्य वृद्धौ त्र्यशीत्यधिकशततमे मण्डले षड् मुहूर्ता वर्धन्त इत्येवमष्टादशमुहूर्तो दिवसो भवति, अत एव द्वादशमुहूर्ता रात्रिर्भवति, त्रिंशन्मुहूर्तत्वादहोरात्रस्य। 'अट्ठारसमुहुत्ताणंतरे' त्ति यदा सर्वाभ्यन्तरमण्डलानन्तरे मण्डले वर्तते सूर्यस्तदा मुहूर्तैकषष्टिभागद्व यहीनाष्टादशमुहूर्तो दिवसो भवति, स चाष्टादशमुहूर्तोद्दिवसादनन्तरोऽष्टादशमुहूर्तानन्तरमिति व्यपदिष्टः, 'सातिरेगा दुवालसमुहुत्ता राइ' त्ति द्वाभ्यां मुहूर्तैकषष्टिभागाभ्यामधिका द्वादशमुहूर्ता 'राइ भवइ' त्ति रात्रिप्रमाणं भवतीत्यर्थः, यावता भागेन दिनं हीयते तावता रात्रिर्वर्धते, त्रिंशन्मुहूर्तत्वादहोरात्रस्येति॥ 'एवं एएणं कमेणं' एवमित्युपसंहारे 'एतेन' अनन्तरोक्तेन 'जया णं भंते! जम्बूद्दीवे २ दाहिणड्ढे' इत्यनेनेत्यर्थः, 'ओसारेयव्वं' ति दिनमानं ह्रस्वीकार्यं, तदेव दर्शयति— 'सत्तरसे' त्यादि, तत्र सर्वाभ्यन्तरमण्डलानन्तरमण्डलादारभ्यैकत्रिंशत्तम मण्डलार्धे यदा सूर्यस्तदा सप्तदशमुहूर्तो दिवसो भवति, पूर्वोक्तहानिक्रमेण त्रयोदशमुहूर्ता च रात्रिरिति। 'सत्तरसमुहुत्ताणंतरे' त्ति मुहूर्तैकषष्टिभागद्वयहीनसप्तदशमुहूर्तप्रमाणो दिवसः, अयं च द्वितीयादारभ्य द्वात्रिंशत्तममण्डलार्धे भवति, एवमनन्तरत्वमन्यत्राप्यूह्यम्, 'साइरेगतेरसमुहुत्ता राइ' त्ति मुहूर्तैकषष्टिभागद्वयेन सातिरेकत्वम्, एवं सर्वत्र 'सोलसमुहुत्ते दिवसे' त्ति द्वितीयादारभ्यैकषष्टितममण्डले षोडशमुहूर्तो दिवसो भवति, 'पन्नरसमुहुत्ते दिवसे' त्ति द्विनवतितममण्डलार्धे वर्तमाने सूर्ये, 'चोद्दसमुहुत्ते दिवसे' त्ति द्वाविंशत्युत्तरशततमे मण्डले, 'तेरसमुहुत्ते दिवसे' त्ति सार्धद्विपञ्चाशदुत्तरशततमे मण्डले, 'बारसमुहुत्ते दिवसे' त्ति त्र्यशीत्यधिकशततमे मण्डले सर्वबाह्य इत्यर्थः॥ कालाधिकारादिदमाह—

जया णं भंते! जंबू० दाहिणड्ढे वासाणं पढमे समए पडिवज्जइ तया णं उत्तरड्ढेवि वासाणं पढमे समए पडिवज्जइ जया णं उत्तरड्ढेवि वासाणं पढमे समए पडिवज्जइ तया णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं अणंतरपुरक्खडसमयंसि वासाणं प० स० प०?, हंता गोयमा! जया णं जंबू० २ दाहिणड्ढे वासाणं प० स० पडिवज्जइ तह चेव जाव पडिवज्जइ। जया णं भंते! जंबू० मंदरस्स पुरच्छिमेणं वासाणं पढमे स० पडिवज्जइ तया णं पच्चत्थिमेणावि वासाणं पढमे समए पडिवज्जइ, जया णं पच्चत्थिमेणवि वासाणं पढमे समए पडिवज्जइ तया णं जाव मंदरस्स पव्वयस्स उत्तरदाहिणेणं अणंतरपच्छाकडसमयंसि वासाणं प० स० पडिवन्ने भवति? हंता गोयमा! जया णं जंबू० मंदरस्स पव्वयस्स पुरच्छिमेणं, एवं चेव उच्चारेयव्वं जाव पडिवन्ने भवति॥ एवं जहा समएणं अभिलावो भणिओ वासाणं तहा आवलियाएवि २ भाणियव्वो, आणापाणुणवि ३ थोवेणवि ४ लवेणवि ५ मुहुत्तेणवि ६ अहोरत्तेणवि ७ पक्खेणवि ८ मासेणवि ९ उऊणावि १०, एएसिं सव्वेसिं जहा समयस्स अभिलावो तहा भाणियव्वो। जया णं भंते! जंबू० दाहिणड्ढे हेमंताणं पढमे समए पडिवज्जति जहेव वासाणं अभिलावो तहेव हेमंताणवि २० गिम्हाणवि ३० भाणियव्वो जाव उऊ, एवं एए तिन्निवि, एएसिं तीसं आलावगा भाणियव्वा॥ जया णं भंते! जंबू० मंदरस्स पव्वयस्स दाहिणड्ढे पढमे अयणे पडिवज्जइ तया णं उत्तरड्ढेवि पढमे अयणे पडिवज्जइ, जहा समएणं अभिलावो तहेव अयणेणवि भाणियव्वो जाव अणंतरपच्छाकडसमयंसि पढमे अयणे पडिवन्ने भवति, जहा अयणेणं अभिलावो तहा संवच्छरेणवि भाणियव्वो, जुएणवि

चावलोकनीयम्। तत्स्थापना चेयम्॥३४॥

---

वाससएणवि वाससहस्सेणवि वाससयसहस्सेणवि पुव्वंगेणवि पुव्वेणवि तुडियंगेणवि तुडिएणवि, एवं पुव्वे २ तुडिए २ अडडे २ अववे २ हूहूए २ उप्पले २ पउमे २ नलिणे २ अच्छणिउरे २ अउए २ णउए २ पउए २ चूलिया २ सीसपहेलिया २ पलिओवमेणवि सागरोवमेणवि भाणियव्वो। जया णं भंते! जंबूद्दीवे २ दाहिणड्ढे पढमाओसप्पिणी पडिवज्जइ तया णं उत्तरड्ढेवि पढमाओसप्पिणी पडिवज्जइ, जया णं उत्तरड्ढेवि पडिवज्जइ तदा णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणवि, णेवत्थि ओसप्पिणी नेवत्थि उस्सप्पिणी अवट्ठिए णं तत्थ काले पन्नत्ते? समणाउसो!, हंता गोयमा! तं चेव उच्चारेयव्वं जाव समणाउसो!, जहा ओसप्पिणीए आलावओ भणिओ एवं उस्सप्पिणीएवि भाणियव्वो॥ (सू.१७८) लवणेणं भंते! समुद्दे सूरिया उदीचिपाईणमुग्गच्छ जच्चेव जंबूद्दीवस्स वत्तव्वया भणिया सच्चेव सव्वा अपरिसेसिया लवणसमुद्दस्सवि भाणियव्वा, नवरं अभीलावो इमो णेयव्वो— जया णं भंते! लवणे समुद्दे दाहिणड्ढे दिवसे भवति तं चेव जाव तदा णं लवणे समुद्दे पुरच्छिमपच्चत्थिमेमं राई भवति, एएणं अभिलावेणं नेयव्वं। जदा णं भंते! लवणसमुद्दे दाहिणड्ढे पढमाओस्सप्पिणी पडिवज्जइ तदा णं उत्तरड्ढेवि पढमाओस्सप्पिणी पडिवज्जइ, जदा णं उत्तरड्ढे पढमाओसप्पिणी पडिवज्जइ तदा णं लवणसमुद्दे पुरच्छिमपच्चत्थिमेणं नेवत्थि ओसप्पिणी २ समणाउसो!?, हंता गोयमा! जाव समणाउसो!॥ धायईसंडे णं भंते! दीवे सूरिया उदीचिपादीणमुग्गच्छ जहेव जंबूद्दीवस्स वत्तव्वया भणिया सच्चेव धायइसंडस्सवि भाणियव्व, नवरं इमेणं अभिलावेणं सव्वे आलावगा भाणियव्वा। जया णं भंते! धायइसंडे दीवे दाहिणड्ढे दिवसे भवति तदा णं उत्तरड्ढेवि जया णं उत्तरड्ढि तदा णं धायइसंडे दीवे मंदराणं पव्वयाणं पुरच्छिमपच्चत्थिमेणं राती भवति?, हंता गोयमा! एवं चेव जाव राती भवति। जदा णं भंते! धायइसंडे दीवे मंदराणं पव्वयाणं पुरच्छिमेण दिवसे भवति तदा णं पच्चत्थिमेणवि, जदाणं पच्चत्थिमेणवि तदा णं धायइसंडे दीवे मंदराणं पव्वयाणं उत्तरेणं दाहिणेणं राती भवति?, हंता गोयमा! जाव भवति, एवं एएणं अभिलावेणं नेयव्वं जाव जया णं भंते! दाहिणड्ढे पढमाओस्स० तया णं उत्तरड्ढे जया णं उत्तरड्ढे तया णं धायइसंडे दीवे मंदराणं पव्वयाणं पुरच्छिमच्चत्थिमेणं नत्थि ओस० जाव? समणाउसो!, हंता गोयमा! जाव समणाउसो!, जहा लवणसमुद्दस्स वत्तव्वया तहा कालोदस्सवि भाणियव्वा, नवरं कालोदस्स नामं भाणियव्वं। अब्भिंतरपुक्खरद्धे णं भंते! सूरिया उदीचिपाईणमुग्गच्छ जहेव धायइसंडस्स वत्तव्वया तहेव अब्भिंतरपुक्खरद्धस्सवि भाणियव्वा नवरं अभिलावो जाव जाणेयव्वो जाव तया णं अब्भिंतरपुक्खरद्धे मंदराणं पुरच्छिमपच्चत्थिमेणं नेवत्थि ओस० नेवत्थि उस्सप्पिणी अवट्ठिए णं तत्थ काले पन्नत्ते समणाउसो! सेवं भंते २ ॥ (सू.१७९) पंचमसए पढमो उद्देसो समत्तो॥५-१॥

'जया णं भंते! जंबूद्दीवे २ दाहिणड्ढे वासाणं पढमे समए पडिवज्जइ' इत्यादि, 'वासाणं' ति चतुर्मासप्रमाणवर्षाकालस्य सम्बन्धी 'प्रथमः' आद्यः 'समयः क्षणः 'प्रतिपद्यते' सम्पद्यते भवतीत्यर्थः, 'अणंतरपुरक्खडे समयंसि' त्ति अनन्तरो-निर्व्यवधानो दक्षिणार्धे वर्षाप्रथमतापेक्षया स चातीतोऽपि स्यादत आह— पुरस्कृतः पुरोवर्ती भविष्यन्नित्यर्थः, समयः प्रतीतः, ततः पदत्रयस्य कर्मधारयोऽतस्तत्र, 'अणंतरपच्छाकडसमयंसि' त्ति पूर्वापरविदेहवर्षाप्रथमसमयापेक्षया योऽनन्तरपश्चात्कृतोऽतीतः समयस्तत्र दक्षिणोत्तरयोर्वर्षाकालप्रथमसमयो भवतीति॥ 'एवं जहा समएण'मित्यादि, आवलिकाभिलापश्चैवम्— 'जया णं भंते! जंबूद्दीवे २ दाहिणड्ढे वासाणं पढमा आवलिया पडिवज्जति तया णं उत्तरड्ढेवि, जया णं उत्तरड्ढे वासाणं पढमावलिया पडिवज्जति तया णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं अणंतरपुरक्खडसमयंसि वासाणं पढमा आवलिया पडिवज्जइ?, हंता गोयमा! इत्यादि। एवमानप्राणादिपदेष्वपि, आवलिकाद्यर्थः पुनरयम्— आवलिका असङ्ख्यातसमयात्मिका आनप्राणः— उच्छ्वासनिःश्वासकालः स्तोकः— सप्तप्राणप्रमाणः लवस्तु सप्तस्तोकरूपः मुहूर्तः पुनर्लवसप्तसप्ततिप्रमाणः ऋतुस्तु मासद्वयमानः, 'हेमंताणं' ति शीतकालस्य 'गिम्हाण व' त्ति उष्णकालस्य 'पढमे अयणे' त्ति दक्षिणादित्वात्संवत्सरस्य 'जुएणवि' त्ति युगं पञ्चसंवत्सरमानं 'पुव्वंगेणवि' त्ति पूर्वाङ्गं चतुरशीतिर्वर्षलक्षणां 'पुव्वेणवि' त्ति पूर्वं पूर्वाङ्गमेव चतुरशीतिवर्षलक्षेण गुणितम्, एवं चतुरशीतिवर्षलक्षगुणितमुत्तरोत्तरं स्थानं भवति, चतुर्नवत्यधिकं चाङ्कशतमन्तिमे स्थाने भवतीति। 'पढमा ओसप्पिणि' त्ति अवसर्पयति भावानित्येवंशीलावसर्पिणी तस्याः प्रथमो विभागः प्रथमावसर्पिणी 'उस्सप्पिणि' त्ति उत्सर्पयति भावानित्येवंशीला उत्सर्पिणीति॥ पञ्चमशते प्रथमः॥५—१




अथ तत्रैवानयोः सूर्ययोः समुदितयोः सूत्रे एव तापक्षेत्रभागान् गाथाद्वयेनाह—

**[मूल] इह छ च्चिअ दसभाए, जंबूदीवस्स दुन्नि दिवसयरा।**
**ताविंति दित्तलेसा, अब्भंतरमंडले संता॥३५॥**

**चत्तारि अ दसभाए, जंबूदीवस्स दुन्नि दिवसयरा।**
**ताविंति मंदलेसा, बाहिरए मंडले संता॥३६॥**

**[वृत्ति] इह०।** इह अस्मिन् जम्बूद्वीपे षडेव दशभागान् जम्बूद्वीपस्य द्वौ दिवसकरौ सर्वाभ्यन्तरे सन्तौ दीप्तलेश्यौ भास्वत्तेजसौ तापयतः। एकैकसूर्यस्य भागत्रयप्रमिततापक्षेत्राभिधानात्॥

**चत्ता०।** तथा चतुरो दशभागान् जम्बूद्वीपस्य द्वौ दिवसकरौ सर्वबाह्ये सन्तौ मन्दलेश्यौ मन्दतेजसौ ताप यतस्तथाजगत्स्वाभाव्यात्॥३५॥३६॥

अथ सर्वाभ्यन्तरे दशभागानां मध्यादेकैकभागस्य योजनकरणं गाथाद्वयेनाह—

**[मूल] एगारस अडतीसे, वज्जित्तु सयाइ दीवपरिहीए।**
**सेस दसेहि विभत्ते, जं लद्धं तं इमं होइ॥३७॥**

**इगतीससहस्साइं, सयाइमट्ठाहिआइँ तह पंच।**
**चउपन्नसट्ठिभागा, छहि गुणणे अंसछेआणं॥३८॥**

**[वृत्ति] एगा०।** एकादशशतान्यष्टात्रिंशदधिकानि ११३८ जम्बूद्वीपपरिधेः ३१६२२७ वर्जयित्वा जम्बूद्वीपपरिधिमध्यात् ११३८ कृष्यन्त इत्यर्थः, शेषे सर्वाभ्यन्तरमण्डलपरिधिरूपे ३१५०८९ दशभिर्भक्ते यल्लब्धं तद् इदं वक्ष्यमाणं भवति। यतः सर्वाभ्यन्तरं मण्डलं जगतीतोऽशीत्यधिकयोजनशतेनार्वाग्, तद्

उभयोः पार्श्वयोरपेक्षया तदङ्कं द्विगुणीकृत्य ३६०, तच्च वर्गयित्वा दशगुणं क्रियते, तदनु करणीकरणे ११३८ भवन्तीति॥

**इग०।** एकत्रिंशत्सहस्राण्यष्टाधिकानि पञ्चशतानि योजनानां चतुष्पञ्चाशच्च षष्ठिभागा योजनस्य। ते च कथं जाताः? **छहि गुणणे अंसछेआणं ति।** सर्वाभ्यन्तरमण्डलपरिधिदशमभागयोजनराश्यागमनानन्तरम् अवस्थितयोः अंशच्छेदराश्योर्नवकदशरूपयोः ९/१० षड्भिर्गुणने जाताः ५४/६०, ततो दशस्वपि भागेषु प्रत्येकं योजनान्यंशाश्च भवन्ति ३१५०८ ५४/६०, तद्दशगुणने मण्डलपरिधिर्भवति। एवं द्वितीयादिसर्वमण्डलेषु तत्तन्निजनिजपरिधेरनुसारेण दशभागाः स्वबुद्ध्या विचार्याः॥३७॥३८॥

**[उत्कृष्टदिवसे जम्बूद्वीपे सूर्योदयः]**

अथोत्कृष्टदिवसे जम्बूद्वीपवर्तिनो मनुष्याः कियद्दूरतः सूर्यमुदयन्तं पश्यन्ति ? इति गाथाद्वयेनाह—

**[मूल] एअस्स य रासिस्स य, तिगुणत्ते जो पुणो हवइ रासी।**
**कक्कडचारो रविणो, उदयत्थमणेसु तस्सद्धा॥३९॥**

**सीआलीससहस्सा, दो अ सया जोअणाण तेवट्ठा।**
**इगवीससट्ठिभागा, कक्कडमाइम्मि पिच्छ नरा॥४०॥**

**[वृत्ति] एअ०।** एतस्य अनन्तरोक्त[स्य] राशेः ३१५०८ ५४/६० त्रिगुणकरणेन यो राशिर्भवति ९४५२६ ४२/६० स रवेः कर्कसङ्क्रान्त्याद्यदिनसत्कश्चारो ज्ञेयः। उदयास्तसमये च **तस्सद्ध त्ति** तस्यार्धात्प्रातरुद्गच्छन् सायम् अस्तमयँश्च सूर्यो दृश्यते॥

तद्योजनान्याह—**सीआ०।** सप्तचत्वारिंशत्सहस्राणि त्रिषष्ट्यधिके द्वे च शते एकविंशतिषष्ठिभागाश्च ४७२६३ २१/६०। एतावद्योजनेभ्यो दूरतः सर्वाभ्यन्तरे मण्डले सूर्यमुदयन्तमस्तमयन्तं च कर्काद्यदिने जम्बूद्वीपसत्कपूर्वविदेहभरतपश्चिमविदेहैरावतादिषु वासिनो नराः पश्यन्ति। यच्चेहोदयमानः सूर्यो भूमिलग्नो दृश्यते तत्तु दूरत्वात्। परं भूमितः सर्वत्रोच्चैस्त्वेन समो वर्तते। यदुक्तं भगवत्यामष्टमशतेऽष्टमोद्देशके—

***जम्बूदीवेणं भंते! सूरिआ उग्गमणमुहुत्तंसि मज्झंतिअमुहुत्तंसि अत्थमणमुहुत्तंसि सव्वत्थ उच्चत्तेण समा? हंता गोअमा!*** इत्यादि[1] ॥३९॥४०॥ **[भग.सू.श.८, उ.८, सू.३७]**

**[सूर्यस्य पश्चादग्रे च तापक्षेत्रम्]**

अथोत्कृष्टदिवसे सूर्यस्य पश्चादग्रे च मिलितं कियत्तापक्षेत्रं स्यात्? तदाह—

**[मूल] एअं चेव य दुगुणं,उभओ पासेसु तावखित्तं तु।**
**एअं चेव य सव्वं, दट्ठव्वं बीअरविणो वि॥४१॥**

---

१ जम्बूदीवेणं भंते! दीवे सूरिआ उग्गमणमुहुत्तंसि मज्झंतिअमुहुत्तंसि य अत्थमणमुहुत्तंसि सव्वत्थ समा उच्चत्तेण? हंता गोअमा! जम्बूदीवेणं दीवे सूरिआ उग्गमणमुहुत्तंसि मज्झंतिअमुहुत्तंसि अत्थमणमुहुत्तंसि सव्वत्थ उच्चत्तेण समा।

**[वृत्ति] एअं०।** एतद् अनन्तरोक्तं तापक्षेत्रप्रमाणम् ४७२६३ २१/६०, पश्चादप्येतावदग्रतोऽप्येतावत्सूर्यस्य उभयपार्श्वाभ्यां कृत्वा द्विगुणं भवति ९४५२६ ४२/६०, कर्कस्य प्रथमदिने। तथैतदेव सर्वं पूर्वोक्तस्वरूपं जम्बूद्वीपवर्तिद्वितीयरवेरपि द्रष्टव्यम्॥४१॥

## [जम्बूद्वीपे प्रतिदिवसं तेजसः हानिवृद्धी]

अथ कर्काद्यदिनवर्जशेषदिवसेषु प्रतिदिवसं तेजसः का हानिः? मकरात्का वृद्धिर्वा? द्वात्रिंशत्तमगाथावृत्तौ करणेनोक्तापि साक्षादक्षरेणाह—

**[मूल] जंबूदीवे पइदिणमुभओ पासेसु तावखित्तस्स।**
**छासीइ जोअणाइं, अहिआइं वुड्ढिहाणीसु॥४२॥**

**[वृत्ति] जंबू०।** जम्बूद्वीपे सूर्यस्य पूर्वापरयोरेकैकपार्श्वे तापक्षेत्रस्य साधिकानि षडशीतिः षडशीतिर्योजनानि कर्काद्धानौ मकराच्च वृद्धौ भवन्ति। यतः त्र्यशीत्यधिकेन दिनशतेन दशभागीकृतस्य सर्वाभ्यन्तरमण्डलपरिधेः अष्टोत्तरपञ्चशतसमधिकैकत्रिंशत्सहस्रप्रमित एको दशभागभागो हीयते वर्धते च तदैकैकेन दिनेन का हानिर्वृद्धिर्वा? अत्र त्रैराशिकन्यासः १८३। ३१५०८।१। एकेनान्त्येन गुणितो मध्यराशिस्तदेव भवति। ततो मध्य आद्येन भज्यते लब्धं च द्विसप्ततं शतम्, शेषा द्वात्रिंशत्स्थिताः, ते च षष्टिगुणिताः १९२०, चतुष्पञ्चाशच्च षष्टिभागा मीलिताः १९७४ भवन्ति, तेऽपि १८३ भक्ता लब्धा दश १० शेषाः १४४/१८३, द्विसप्तत्यधिकशतस्य चार्धं षडशीतिर्योजनानि ८६ ५/६० ७२/१८३, उक्तोऽप्ययमर्थो दशमभागविभजनार्थमुक्तः। चन्द्रस्याप्येष राशिः ३१५०८ ५४/६० चतुर्दशविभक्तो द्वे सहस्रे सार्धे च द्वे शते सप्तत्रिंशच्च षष्टिभागाः २२५० ३७/६०॥४२॥

## [शेषमनुष्यलोकस्थसर्वसूर्यवक्तव्यता]

अथ मनुष्यलोकचारिशेषसूर्याणां वक्तव्यतामाह—

**[मूल] एवं सेसरवीण य, पयासखित्तं दसंसकप्पणया।**
**ता नेअं जा चरमो पुक्खरदीवड्ढभाणु त्ति॥४३॥**

**[वृत्ति] एवं०।** एवम् अमुना प्रकारेण शेषरवीणामपि नरलोकवर्तिजम्बूवर्जद्वीपद्वयसमुद्रद्वयचक्रवाल दशांशकल्पनया दशभागविभजनया प्रकाशक्षेत्रयोजनप्रमाणं स्वस्वद्वीपसमुद्रमध्यबाह्यपरिधिनामनुसारेण तावज्ज्ञेयं यावत्पुष्करार्धे चरमभानुरेकैकपङ्क्तिगतषट्षष्टितमः सूर्य इति, परं तेषामन्तरालसूर्याणां नैश्चयिकस्थानं परस्परमन्तरं च शास्त्रेष्वदर्शनाद्योजनादिमितिर्न लिखिता। जीवाभिगमे लवणोदवक्तव्यतायां द्वितीयखण्डे जम्बूद्वीपगतसमश्रेणिप्रतिबद्धो दक्षिणतः सूर्यः शिखायामभ्यन्तरं चारं चरति, द्वितीयः शिखायाः परतः। एवमुत्तरतोऽपि शिखाया आरतः परतः सूर्यौ। चन्द्रचतुष्कमप्येवमेव॥४३॥

## [पुष्करार्धे चरमसूर्यस्य तेजःप्रसरः]

अथ पुष्करार्धे चरमभानोः कियाँस्तेजःप्रस्तरस्तदाह—

**[मूल] लक्खेहिं एगवीसाइ साइरेगेहिं पुक्खरद्धम्मि।**
**उदए पिच्छंति नरा, सूरं उक्कोसए दिवसे॥४४॥**

**[वृत्ति] लक्खे०।** सातिरेकैकविंशतिलक्षयोजनैः सर्वान्तिमं सूर्यमुपलक्षणाच्चन्द्रमप्युदयन्तमस्तमयन्तं च सर्वाभ्यन्तरे मण्डले उत्कृष्टेऽष्टादशमुहूर्ते दिवसे पुष्करार्धे मनुजाः पश्यन्ति। तत्र परिधिरेवम्—

***एगा जोअणकोडी, बायालीसं हवन्ति लक्खाइं।***
***तीसं चेव सहस्सा, दो चेव सया अउणवन्ना॥***

**[देवेन्द्रस्तवप्र. २८०]**

१४२३०२४९ इति परिधेर्दशभागाः क्रियन्ते ताद्द(दृ)शः सार्धभागस्तेजःप्रसरः २१३४५३७ भवति। प्रवचनसारोद्धारवृत्तिगताष्टशीत्यधिकशततमेन्द्रियविषयविचार १८८ द्वारे—

***इगवीसं खलु लक्खा, चउतीसं चेव तह सहस्साइं।***
***पंच य सयाइं[१] भणिआ, सत्ततीसाइ अइरित्ता॥***
***इह नयणविसयमाणं, पुक्खरदीवड्ढवासिणो मणुआ[२]।***
***पुव्वेण य अवरेण य, पिहं पिहं तह दिणुक्किट्ठे[३]॥***

**[प्रव.सारो.वृ.११९५]**

उत्कृष्टदिवसे एतावद्योजनत उदितं पश्यन्ति, तत्रैतावत्क्षेत्रपरिधिसद्भावात्। परमिदं सर्वाभ्यन्तरमण्डलं मानुषोत्तरादर्वाक् सम्भवति, येन शेषमण्डलानामवकाशो दशोत्तरपञ्चशतयोजनान्तर्विलोक्यत इति, तेनोक्ततेजःप्रसरः कतिचित्सहस्रैर्न्यूनो ज्ञेयः।

नवरमियान् विशेषः—जम्बूद्वीपगतसूर्ययोर्दक्षिणोत्तरयोः करप्रसरेभ्यो लवणसमुद्रगतचन्द्रसूर्याणां दक्षिणोत्तरयोः करप्रसरः स्तोकः, पूर्वपश्चिमयोश्च भूयान्, क्षेत्रस्य परिधिबाहुल्यात्। धातकीखण्डे च षण्णां पङ्क्तिगतसूर्याणामुत्तरोत्तरं दक्षिणोत्तरयोः तेजःप्रसरः स्तोकः पूर्वपश्चिमयोश्च वर्धते। एवं कालोदे पुष्करार्धेऽपि पूर्वपश्चिमयोरतिबहुलो वर्धत इति स्थितिः। परं यो यः सूर्यो यत्र चरति तदधोवासिनो जनास्तमेव सूर्यं पश्यन्ति नान्यं तथा जगत्स्वाभाव्याद् व्यवस्थाभङ्गदोषप्रसङ्गाच्च। एवं चन्द्रग्रहादीनामपि व्यवस्था भावनीया॥४४॥

---

१ **तह पंच सया** इति मु.
२ **पुक्खरदीवड्ढवासिमणुयाणं** इति मु.
३ **नायव्वम्** इति मु..

## [सूर्याणां दशभागादिस्वरूपम्]

अथ तेषां रवीणां दशभागादिस्वरूपमाह—

**[मूल] सव्वपरिहीण एवं, सव्वे वि अ भाणुणो दसंसतिगं।**
**तावंतुक्कोसदिणे, जहन्नए दुन्नि उ दसंसे॥४५॥**

**[वृत्ति] सव्व०।** लवणधातकीकालोदपुष्करार्धेषु सर्वपरिधीनाम् एवम् अमुना प्रकारेण जम्बूद्वीपन्यायेन सर्वेऽपि भानवः दशांशत्रिकम् इति त्रीन् दशभागान् कर्कस्था युगपत्सर्वाभ्यन्तरमण्डले सञ्चरन्त उत्कृष्टदिवसे तापयन्ति, तदा दिनमानमष्टादशमुहूर्तम्, रात्रिर्द्वादशमुहूर्ता। जघन्यदिवसे समकं सर्वबाह्यमण्डलस्था मकरे द्वौ दशभागौ तापयन्ति, तदा दिनमानं द्वादशमुहूर्तम्, रात्रिरष्टादशमुहूर्ता। सर्वेषां सूर्याणां चतुरशीत्याधिकशतमण्डलेषु प्रत्येकं षष्ट्या मुहूर्तैरेव समकं परिभ्रमणात्॥४५॥

## [सूर्याणां तापक्षेत्रवृद्धिहानी]

अथ तेषामपि सूर्याणां चारक्षेत्रतः सञ्चरतां कियद्दिनैस्तापक्षेत्रं वर्धते हीयते च? इत्याह—

**[मूल] एवं च सइ दसंसे, तेसिं पइसंतनीहरंताणं।**
**वड्ढइ हायइ तेसीसएण दिवसाण अणुकमसो॥४६॥**

**[वृत्ति] एवं०।** एवं पूर्वोक्तप्रकारे सति तेषां सूर्याणां मकरे सर्वबाह्यान्मण्डलान्मध्ये प्रविशतां कर्के च सर्वाभ्यन्तराद् बहिर्निस्सरतां दिवसानां त्र्यशीत्यधिकशतेनानुक्रमश एकैको दशांशो वर्धते हीयते च। वृद्धिहानियोजनसङ्ख्या दशमभागयोजनसङ्ख्या च तत्तद्वीपसमुद्राणां मध्यबाह्यपरिध्यनुसारेण वाच्या॥४६॥

## [जम्बूद्वीपबाह्यसूर्याणां मण्डलसङ्ख्या मण्डलान्तरप्रमाणं चारक्षेत्रविष्कम्भमानं च]

अथ जम्बूद्वीपादन्यरवीणां मण्डलसङ्ख्या मण्डलान्तरप्रमाणं चारक्षेत्रविष्कम्भमानं चाह—

**[मूल] सव्वेसिं पि रवीणं, सव्वेसिं मंडलाण अन्नुन्नं।**
**दोजोअणंतरालं, पंचसयदहुत्तरो चारो॥४७॥**

**[वृत्ति] सव्वे०।** सर्वेषां रवीणां चतुरशीत्यधिकशतसङ्ख्यानां मण्डलानामन्तरं प्रत्येकं द्वे योजने, चारक्षेत्रविष्कम्भस्तु दशोत्तराणि पञ्चशतयोजनानि ज्ञेयानि। अष्टचत्वारिंशदेकषष्ठिभागास्तु स्तोकत्वान्नोक्ताः। अथवा प्रथममण्डलस्यान्त्यमण्डलस्य वा चाराभावादष्टचत्वारिंशन्नोक्ताः जम्बूद्वीपाधिकारे चोक्ताः, परमार्थतस्त्वेक एव॥४७॥

## [जम्बूद्वीपबाह्यचन्द्राणां मण्डलसङ्ख्या मण्डलान्तरप्रमाणं चारक्षेत्रविष्कम्भमानं च]

अथ शेषचन्द्राणां चारक्षेत्रमानादिस्वरूपमाह—

**[मूल] इगसट्ठसतिवन्ना, चंदाणं पंचनवहिअसयाइं।**
**अट्ठहिं भागेहि जओ, अब्भहिअं मंडलं ससिणो॥४८॥**

**[वृत्ति] इग०।** जम्बूद्वीपचन्द्राणामपि प्रत्येकं मण्डलानि पञ्चदशैव, तेषां मण्डलानां भूमिरन्तरं च सातिरेकाणि पञ्चत्रिंशद्योजनानि ३५ ३०/६१ ४/७, एतस्मिन् चतुर्दशगुणे कृते समस्तं चारक्षेत्रं नवाधिकपञ्चशतयोजनमितं त्रिपञ्चाशच्चैकषष्टिभागयुतम् ५०९ ५६/६१, यतः कारणादष्टभिर्भागैरधिकं सूर्यबिम्बाच्चन्द्रबिम्ब(स्य) षट्पञ्चाशद्भागमानत्वात्। अत्रापि विमानक्रान्तभूमेरगणनाद् अष्टचत्वारिंशद्भागानामकथनेऽपि पूर्वोक्तेन सह न विरोधः॥४८॥

## [जम्बूद्वीपादिषु दिङ्निर्णयः]

अथ सर्वेषु क्षेत्रेषु दिक्चतुष्कनिर्णयस्वरूपं गाथायुगलेनाह—

**[मूल] जस्स जओ आइच्चो, उदेइ सा तस्स होइ पुव्वदिसा।**
**जत्थ वि अ अत्थमेई, अवरदिसा सा उ नायव्वा॥४९॥**

**दाहिणपासम्मि अ दाहिण उ वामेण उत्तरा होइ।**
**एआओ तावदिसा, सव्वेसिं उत्तरो मेरू॥५०॥**

**[वृत्ति] जस्स०।** यस्य लोकस्य यतः स्थानादादित्य उदयमेति दृग्गोचरमायाति तस्य लोकस्य सैव पूर्वदिग् ज्ञेया। तथा यत्र स्थाने सूर्योऽस्तमेति अदृश्यतायोगात्सा अपरा पश्चिमा च ज्ञातव्या॥

**दाहि०।** उदयमानसूर्याभिमुखस्य सतस्तस्य लोकस्य दक्षिणपार्श्वे दक्षिणा भवति वामपार्श्वे तूत्तरा। भावना यथा—पूर्वविदेहानां लोकानां या पश्चिमा सा भरतसम्बन्धिनां पूर्वा, भरते या पश्चिमा सा पश्चिमविदेहेषु पूर्वा, पश्चिमविदेहेषु या पश्चिमा सा ऐरवते पूर्वा, ऐरवते या पश्चिमा सा पूर्वविदेषु पूर्वेत्यादि। सूक्ष्मेक्षिकया यौगलिकक्षेत्रवर्षधरादिषु सर्वत्र पूर्वादयो दिशो विचार्याः। यतो जम्बूद्वीपप्रज्ञप्त्याम्—

***जंबुद्दीवे णं भंते! सूरिआ उदीणपाईणमुग्गच्छ पाईणदाहिणमागच्छंति? १ पाईणदाहिणमुग्गच्छ दाहिणपडीणमागच्छंति? २ दाहिणपडीणमुग्गच्छ पडीणउदीणमागच्छंति? ३ पडीणउदीणमुगच्छ उदीणपाईणमुग्गच्छंति? ४ हंता गोअमा!।***

**[जम्बूद्वीपप्रज्ञ. सू.१५०]**

इत्यादि, काक्वा प्रश्नः।

तथा तापयतीति तापः- सूर्यस्तदाश्रिता दिक् तापदिक्, एताः पूर्वोक्तस्तापदिशोऽवगन्तव्याः, सूर्यप्रभवा इत्यर्थः। क्षेत्रदिशस्तु मेरुरुचकप्रभवा भवन्ति, रुचका अपि मेरुसर्वमध्यस्थिता अष्टौ प्रदेशाः समभूतलस्थाने गोस्तनाकाराः। तत्र चतस्रो द्विप्रदेशादयो द्व्युत्तराः शकटोद्धीसंस्थाना महादिशः पूर्वाद्याः, चतस्र एवैकप्रदेशाः मुक्तावलीनिभा विदिशः, द्वे च चतुष्प्रदेशात्मिके ऊर्ध्वाधोदिशाविति। तेन जम्बूद्वीपजगत्यां विजयनामद्वारि

पूर्वा दिक्, एवं वैजयन्तद्वारि दक्षिणा, जयन्तद्वारि पश्चिमा, अपराजिते उत्तरा। एवं च सर्वत्र द्वीपे जगती द्वाराणि एतन्नामानि एव सन्तीति क्षेत्रदिङ्निर्णयः।

अथ तापदिगपेक्षया सर्वेषां कर्माकर्मभूमिजनानां मेरुः औतरः उत्तरस्याम्, लवणोदधातकीखण्डकालोदपुष्करार्धेष्वनेनैव क्रमेण जम्बूद्वीपसूर्यवद्दिग्विभागो ज्ञेयः, सर्वेषां समकं सञ्चरणात्। एतत्कथनेन सूर्यस्य मेरुसमन्ताच्चतसृषु (दिक्षु) गतिरुक्ता। ततश्च ये मन्यन्ते सूर्यः समुद्रं प्रविश्य पाताले गत्वा पुनः पूर्वसमुद्रे उदेतीति तन्मतमपास्तम्॥४९॥५०॥

## [सूर्यस्य दिशः]

अथ सूर्यस्य दिशः सामान्येनाह—

**[मूल] पिट्ठे पुव्वा पुरओ, अवरा वलए भमंतसूरस्स।**
**दाहिणकरम्मि मेरु, वामकरे होइ लवणोही॥५१॥**

**[वृत्ति] पिट्ठे०।** मेरुं परितः प्रदक्षिणावर्तेन सूर्यस्य भ्रमतः पृष्ठे पृष्ठे पूर्वा दिक्, पुरतः अपरा इति पश्चिमा। सूर्यस्य दक्षिणहस्ते मेरुः, वामकरे लवणोदधिर्भवति। एताः सूर्यदिशो न तु जनानाम्, जनानां सूर्यापेक्षया दिशो भवन्तीत्युक्तम्॥५१॥

## [षट्सु दिक्षु जम्बूद्वीपगतसूर्ययोः करप्रसरः]

अथ षट्सु दिक्षु जम्बूद्वीपगतसूर्ययोः करप्रसरं गाथाषट्केनाह—

**[मूल] सगचत्तसहस दुसई, तेवट्ठा तहिगवीस सट्ठंसा।**
**पुव्वावकरपसरो, कक्के सूरा अहुत्तरओ॥५२॥**

**[वृत्ति] सग०।** कर्काद्यदिने योजनानां सप्तचत्वारिंशत्सहस्राणि द्वे च शते त्रिषष्ठ्यधिके एकविंशतिश्च षष्ठिभागाः४७२६३ २१/६० एतावान्सूर्यात् पूर्वस्यामेतावानेव सूर्यादपरस्यां करप्रसरः। इदं तु पूर्वमुक्तमपि षड्दिक्करप्रसराधिकारात् पुनः कथितम्। **अहुत्तरओ त्ति।** अथोत्तरतो मेरुदिशि करप्रसर उच्यते॥५२॥

तदाह—

**[मूल] असिइसऊण सहस्सा,पणयालीसाह जम्मओ दीवे।**
**असिइसयं लवणे वि अ, तित्तीससहस्स सतिभागा॥५३॥**

**[वृत्ति] असि०।** सर्वाभ्यन्तरे मण्डले वर्तमानस्य सूर्यस्य द्वीपान्तर्जगतीतोऽशीत्यधिकयोजनशतप्रवेशात्तदूनः १८० पञ्चचत्वारिंशत्सहस्राणि करप्रसरः, एतावता चतुश्चत्वारिंशत्सहस्राणि विंशत्यधिकान्यष्टौ शतानि ४४८२० मेरुं यावत्करप्रसरः। मेरुमध्यभागस्थरुचकप्रदेशं यावत्करप्रसरः सूर्यस्यास्ति परं तत्रावकाशाभावान्मेर्वन्तर्न प्रविशति। यद्यपि मण्डलसमश्रेणेर्मेरोर्विष्कम्भो योजनदशसहस्रात्मको न लभ्यते किन्तु किञ्चिन्न्यूनस्तथापि व्यवहारेणैतावान् ग्राह्याः। **अह जम्मओ त्ति।** अथ याम्यतः लवणदिशि

द्वीपसम्बन्ध्यशीत्यधिकं शतम् १८०, लवणे च त्रयस्त्रिंशत्सहस्राणि **सतिभाग त्ति।** सहस्रतृतीयांशयुतानि योजनानि ३३३३३ १/३, अशीत्यधिकशतमीलने जातः ३३५१३ १/३ करप्रसर एवमेतत्समश्रेणिस्थस्य द्वितीयरवेरपि करप्रसरो भाव्यः॥५३॥

अथ ततः प्रतिदिनं हीयमानो मकरे यावानवशिष्यते तदाह—

**[मूल] इगतीससहसअडसयइगतीसा तह य तीस सट्ठंसा।**
**मयरे रविरस्सीओ, पुव्वावरेण अह उदीणे॥५४॥**

**[वृत्ति] इग०।** सर्वाभ्यन्तरान्मण्डलाद्बहिर्निष्क्रामन् सूर्यः क्रमेण पूर्वापराभ्यां प्रतिदिनं षडशीत्या षडशीत्या योजनैः करप्रसरतो हीयमानैर्मकरे सर्वबाह्यमण्डलमागच्छति। तत्र चैकत्रिंशत्सहस्राण्यष्टौशतानि एकत्रिंशदधिकानि त्रिंशच्च षष्टिभागा योजनस्य ३१८३१ ३०/६०, एतावत्प्रमाणो मकराद्यदिने पूर्वस्यामपरस्यां च करप्रसरो भवति, पूर्वापरमीलने तद्दिनोदयास्तान्तरं जातम् ६३६६३। ॥५४॥

अथोदीच्यां तदाह—

**[मूल] लवणे तिसई तीसा, दीवे पणचत्तसहस अह जम्मे।**
**लवणम्मि जोअणतिगं, सतिभाग सहस्स तित्तीसा॥५५॥**

**[वृत्ति] लव०।** सर्वबाह्ये मण्डले सूर्यो लवणसमुद्रे त्रिंशद्योजनाधिकां त्रिशतीं याति, तेन लवणसम्बन्धीनि त्रीणि शतानि त्रिंशदधिकानि ३३०, द्वीपे, च पञ्चचत्वारिंशत्सहस्राणि ४५०००, उभयमीलने ४५३३०, उत्तरस्यां करप्रसरः। **अह जम्मे त्ति।** अथ याम्ये लवणदिशि त्रयस्त्रिंशत्सहस्राणि योजनस्य तृतीयांशयुतयोजनत्रयाधिकानि ३३००३ १/३ करप्रसरः॥५५॥

अथ याम्योत्तरयोः सर्वदा सर्वाग्रमाह—

**[मूल] पइदिणमवि जम्मुत्तर, अडसत्तरिसहस सहसतइअंसो।**
**उड्ढह गुणवीससया, अठिआ पुव्वावरा रस्सी॥५६॥**

**[वृत्ति] पइ०।** सर्वसङ्क्रान्तिषु प्रतिदिनं याम्योत्तरयोः करप्रसरमीलनेऽष्टसप्ततिसहस्राः सहस्रतृतीयांशश्च ७८३३३ १/३। अपि शब्दः सर्वदाप्येतावत्प्रमाणस्थिरत्वसूचकः। तथोर्ध्वाधश्च मीलने एकोनविंशतिशतानि समवायाङ्गेऽप्येकोनविंशतिस्थाने तथोक्तत्वात्। तथा पूर्वास्यामपरस्यां च रवे रश्मयः सूर्यकिरणानि सर्वदिनेष्वस्थिताः, सर्वमण्डलेषु हानि-वृद्धिसद्भावात्॥५६॥

अथोर्ध्वाधस्तेजःप्रसरः पृथक्त्वमाह—

**[मूल] मयरम्मि वि कक्कम्मि वि, हिट्ठा अट्ठारजोअणसयाइं।**
**जोअण सयं च उड्ढं, रविकर एवं छसु दिसासु॥५७॥**

**[वृत्ति] मय०।** मकरे इति दक्षिणायनसर्वदिनेषु कर्के इत्युत्तरायणसर्वदिनेषु च सूर्यादधोऽष्टादशयोजनशतानि तेजःप्रसरः। यतः सूर्यादधोऽष्टयोजनशतैः समभूतलम्, समभूतलापेक्षया

योजनसहस्रमधोग्रामाः, ते हि जम्बूद्वीपापरविदेहेषु मेरोरारभ्य जगत्यभिमुखं द्विचत्वारिंशद्योजनसहस्रैः क्रमेण क्षेत्रस्यातिनिम्नीभवनाद् अन्तिमविजयद्वयप्रदेशे सन्ति। उक्तं हि लघुक्षेत्रसमासे—

***जोअणसयदसगंते, समधरणीओ अहे अहोगामा।***

***बायालीससहस्सेहिं गंतुं मेरुस्स पच्छिमओ।।*** **[लघुक्षेत्र.१६७]**

तत्रैवाष्टादशशतानि, अन्यत्र यथासम्भवम्। अयं चाधः करप्रसरो जम्बूद्वीपगतसूर्ययोरेव। अन्ये सूर्यास्तु अधोऽष्टशतान्येव तपन्ति, क्षेत्रस्य समत्वादिति। ऊर्ध्वं तु सर्वेषां शतमेकं करप्रसरः, यदुक्तं भगवत्यामष्टमशतेऽष्टमोद्देशके—

**जंबुद्दीवे दीवे णं भंते! केवइअं खित्तं उड्ढं तवेंति केवइअं खित्तं अहो तवेंति केवइअं खित्तं तिरिअं तवेंति? गोअमा! एगं जोअणसयं उड्ढं तवेंति हेट्ठा अट्ठारसजोअणसयाइं तवेंति इत्यादि।**

**[भग.सू. श.८, उ.८, सू.४५]**

एवम् अमुना प्रकारेण षट्सु दिक्षु रविकरप्रसरः।।५७।।

## [दिवसरात्रिस्थानानि]

अथ गाथाद्विकेन दिवसरात्रिस्थानान्याह—

**[मूल] जइआ जंबूमंदरनगाउ पुव्वावरेण होइ दिणं।**
**तइआ रयणी नेआ, नरलोए दाहिणुत्तरओ।।५८।।**
**उत्तरदाहिणओ पुण, दिवसे पुव्वावरेण किर रयणी।**
**भणिअमिणं पंचमसयपढमुद्देसे भगवईए।।५९।।**

**[वृत्ति] जइआ०।** यदा जम्बूद्वीपमध्यवर्तिमन्दराद्रेः पूर्वस्यामपरस्यां च मानुषाद्रिं यावत्सर्वत्र सम्बद्धं दिनं भवति तदा सकले नरलोके रात्रिर्दक्षिणोत्तरयोर्ज्ञेया।।

**उत्त०।** यदा चोत्तरदक्षिणयोः पुनर्द्वाभ्यां सूर्याभ्यां दिवसः स्यात्तदा पूर्वस्यामपरस्यां च किल निश्चितं सर्वत्र सम्बद्धा मानुषोत्तरं यावद्रात्रिर्भवति, जात्येकवचनम्, इति भणितं दिनरात्रिस्वरूपं पञ्चमशतकप्रथमोद्देशके भगवत्याः, तदालापकश्चायम्—

***जया णं भंते! जंबुद्दीवे दीवे दाहिणड्ढे दिवसो भवइ तया णं उत्तरड्ढे दिवसो भवइ?, जया णं दाहिणड्ढउत्तरड्ढे वि दिवसो भवइ तया णं पुरच्छिमपच्चच्छिमे णं राई भवइ? जया णं भंते! लवणसमुद्दे दाहिणड्ढे दिवसो भवइ तया णं उत्तरड्ढे दिवसो भवइ? जया णं दाहिणड्ढउत्तरड्ढे दिवसो भवइ तया णं पुरच्छिमपच्चच्छिमे णं राई भवइ?, जया णं भंते! धायइसंडे दीवे दाहिणड्ढे दिवसो भवइ तया णं उत्तरड्ढे वि दिवसो भवइ?, जया णं धायइसंडे दाहिणड्ढउत्तरड्ढे दिवसो भवइ***

*तया णं पुरच्छिमपच्चच्छिमे णं राई भवई?, हंता गोयमा! एवं कालोए वि पुक्खरड्ढे वि। इत्यादि।*
**[भग.सू.श.५, उ.१,सू.५]**

काक्वा उद्देशकोऽवगाह्यः॥५८॥५९॥

## [प्रतिद्वीपं प्रतिसमुद्रं च दिवसो रात्रिश्च]

अथ प्रतिद्वीपं प्रतिसमुद्रं कति दिवसाः कति रात्रयश्च भवन्ति? इत्याह—

**[मूल] दीवसमुद्देसु सया, रविप्पमाणा य वासरा हुंति।**
**रयणीउ चंदसंखा, समसेणीए मणुअलोए॥६०॥**

**[वृत्ति] दीव०।** नरलोकवर्तिसार्धद्वयद्वीपे समुद्रद्वये च यावन्तः सूर्यास्तावन्तो वासरा भवन्ति। भावना यथा —जम्बूद्वीपे मेरोरुभयतः समश्रेण्या द्वौ वासरौ, एवं लवणे एकैकपार्श्वे उभय(द्वय)सम्भवाच्चत्वारः, धातकीखण्डे द्वादश, कालोदे द्विचत्वारिंशत्, पुष्करार्धे द्वासप्ततिः, एवं सर्वेऽपि द्वात्रिंशदधिकं शतं वासराः सम्बद्धा समश्रेण्या भवन्ति, सर्वेषां सूर्याणां समकं चलनात् षष्ट्या मुहूर्तैरेव मण्डलपूरणाच्च। तेषां मुहूर्तगतिमानादिकं मण्डलपरिधेः षष्ठिभागहारैर्बोध्यम्। तथा चन्द्रप्रमाणा रात्रयोऽपि द्वात्रिंशदधिकं शतम्। तेषां मुहूर्तगतिमानादिकं साधिकद्वाषष्टिमुहूर्तैर्ज्ञेयम्॥६०॥

## [पश्चिममहाविदेहैरावतपूर्वमहाविदेहेषु दिनरात्रिमानम्]

अथ यदा कर्कसङ्क्रान्तौ भरतेऽष्टादशमुहूर्तं दिनमानं तदा पश्चिमविदेहैरावतपूर्वविदेहादिष्वियन्मानमुतान्यथा? इति प्रश्नस्योत्तरं गाथाद्वयेनाह—

**[मूल] पुव्वविदेहे सेसे, मुहुत्तगिरि वासरे निरिक्खंति।**
**भरहनरा उदयंतं, सूरं कक्कस्स पढमदिणे॥६१॥**
**भरहे वि मुहुत्ततिगे, सेसे पच्छिमविदेहमणुआ वि।**
**एरवए वि अ एवं, तेण दिणं सव्वओ तुल्लं॥६२॥**

**[वृत्ति] पुव्व०।** पुर्वविदेहक्षेत्रे मुहूर्तत्रिकप्रमाणदिने सति कर्काद्ये दिने सूर्यमुदयन्तं भरतनराः भरतक्षेत्रवासिनो जनाः पश्यन्ति।

**भर०।** भरतक्षेत्रेऽपि मुहूर्तत्रिकप्रमाणे शेषे अवशिष्यमाणे दिने सति कर्काद्ये दिने पश्चिमविदेहमनुष्याः सूर्यमुदयन्तं पश्यन्ति। एवम् अमुना प्रकारेण पश्चिमविदेहक्षेत्रे मुहूर्तत्रिके सति ऐरवतवासिनो नरा उदितं पश्यन्ति, ऐरवतेष्वपि मुहूर्तत्रिके पूर्वविदेहमनुष्याश्च, ततोऽग्रेतनक्षेत्रे मुहूर्तत्रिके दिने चटिते पाश्चात्यक्षेत्रे सूर्योऽस्तमेतीत्यर्थः। यथोदयवेलासम्बन्धिमुहूर्तत्रिकं लब्धं तथास्तसमयादर्वाग् मुहूर्तत्रिकं लभ्यते, अतः सर्वत्र क्षेत्रे सर्वाभ्यन्तरे वर्तमाने सूर्येऽष्टादशमुहूर्तं तुल्यमेव, रात्रिश्च सर्वत्र द्वादश मुहूर्ताः।

तदा च पूर्वपश्चिमविदेहभरतैरावतेषु चतुर्षु स्थानेषु मुहूर्तत्रिकं यावद्दिवसो युगपत्प्राप्यते, परं पूर्वपश्चिमविदेहक्षेत्रयोः सन्ध्याकालिकं मुहूर्तत्रिकं भरतैरावतक्षेत्रेषु प्राभातिकम्, यदा च भरतैरावते सायन्तनं

तदा च पूर्वपश्चिमविदेहेषु प्राभातिकमित्येवमभ्यूह्यम्। कर्कसङ्क्रान्त्याद्यदिनव्यतिरिक्तशेषेषु दिनेषु प्रतिमण्डलं किञ्चन्न्यूनचतुष्पलैरुदयास्तमयाभ्यां हानिवृद्धी ज्ञेये॥६१॥६२॥

**[रात्रिमाननिर्णयः]**

अथ सर्वत्राष्टादशमुहूर्ता रात्रिः कथं स्यात्? इत्याह—

**[मूल] जंबुद्दीवे मयरे, रयणीइ मुहुत्ततिगि अइक्कंते।**
**उदयइ तहेव सूरो, मुहुत्ततिगसेसि अत्थमए॥६३॥**

**[वृत्ति] जंबु०।** जम्बूद्वीपे सर्वाभ्यन्तरात्क्रमेण दिने हीयमाने सूर्यो यदा सर्वबाह्ये मण्डले गच्छति तदा पूर्वविदेहेषु मकराद्यदिने रात्रेर्मुहूर्तत्रिकेऽतिक्रान्ते सूर्यो भरते उदयमेति, तथैव मुहूर्तत्रिके च शेषे सत्येवास्तमेति। तथा भरते रात्रेर्मुहूर्तत्रिके गते सति पश्चिमविदेहक्षेत्रे सूर्योदयः, अवशिष्टे रात्रेर्मुहूर्तत्रिके सूर्यस्यास्तमयनं स्यात्। एवमैरवते पूर्वविदेहेष्वपि भाव्यम्। रात्रिः सर्वत्राष्टादशमुहूर्ताः। यदुक्तं भगवत्यां पञ्चमशतकप्रथमोद्देशके—

***जया णं भन्ते! जंबुद्दीवे दीवे दाहिणड्ढे उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ तया णं उत्तरड्ढे वि उक्कोसए अट्ठारसमुहुत्ते दिवसे?, जया णं दाहिणड्ढे उत्तरड्ढे उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ तया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमे णं जहन्निया दुवालसमुहुत्ता राई भवइ?, जया णं पुरच्छिमपच्चच्छिमे णं अट्ठारसमुहुत्ते दिवसे तया णं दाहिणड्ढे उत्तरड्ढे वि दुवालसमुहुत्ता राई भवइ?, हंता गोअमा!।***

**[भग.सू.श.५, उ.१, सू.७]**

एवमष्टादशमुहूर्तरात्रेरप्यालापको ज्ञेयः। ततो भरतैरावतविदेहद्वयादिषु सर्वत्र द्वादशमुहूर्तं दिनम्, द्वादश चतुर्गुणिता अष्टचत्वारिंशद्भवन्ति। मण्डलेषु भ्रमिकालः सूर्याणां मुहूर्ताः षष्टिरेव, तेन द्वादशमुहूर्ता रात्रावेव सम्मताः इति सिद्धं सर्वत्र दिनरात्रिमानं तुल्यम्। यदा द्वादशमुहूर्तं दिनं तदा बाह्यमण्डलेषु गतत्वेन सूर्ययोः करप्रसरहानेस्तावत्कालमदर्शनात्तथाजगत्स्वाभाव्यादिति॥६३॥

**[शेषमनुष्यलोके दिनरात्रिप्रमाणम्]**

अथ शेषमनुष्यलोके दिनरात्रिप्रमाणमाह—

**[मूल] णरलोगम्मि अ सेसे, एवं दिणरयणिमाणमवि नेअं।**
**नवरं बहिआ बहिआ, ससिसूराणं गई सिग्घा॥६४॥**

**[वृत्ति] णर०।** एवम् अनेन न्यायेन शेषे नरलोके दिनरात्रिमानमपि जम्बूद्वीपवज्ज्ञेयम्, तत्रत्यपूर्वविदेहपश्चिमविदेहभरतैरावतादिषु सर्वाभ्यन्तरमण्डले चारिषु सूर्येषु दिनमष्टादशमुहूर्तं रात्रिः द्वादशमुहूर्ता इत्यादिकं तथैव परिभावनीयम्। यतो येषु दिनेषु जम्बूद्वीपे मध्यबाह्यमण्डलेषु सूर्यौ भवतः तेष्वेव दिनेषु तेऽपि सूर्याः तत्रत्यमध्यबाह्यमण्डलेष्वेव भवन्ति। उत्तरचारित्वं दक्षिणचारित्वं च सर्वेषाम् १३२ समकं भवति,

एकनामकनक्षत्रराशिषु सर्वेषां सूर्याणामवस्थानात्। **नवरं** इत्ययं विशेषः लवणादिषु ये येभ्यो बहिः सूर्यास्तेषां गतिः चलनं शीघ्रा शीघ्रतरा॥६४॥

## [जम्बूद्वीपादिष्वष्टप्रहरकालनिर्णयः]

अथ सर्वत्र क्षेत्रेषु दिनरात्रिसम्बन्ध्यष्टप्रहरकालस्वरूपमाह—

**[मूल] पढमपहराइकाला, जंबुद्दीवम्मि दोसु पासेसु।**
**लब्भंति एगसमयं, तहेव सव्वत्थ णरलोए॥६५॥**

**[वृत्ति] पढ०।** प्रथमप्रहरादिका उदयकालादारभ्य रात्रेश्चतुर्थयामान्त्यकालं यावन्मेरोः समन्तादहोरात्रस्य सर्वे कालाः समकालं जम्बूद्वीपे पृथक् पृथक् क्षेत्रे लभ्यन्ते। भावना यथा—भरते यदा यतः स्थानात्सूर्य उदेति तत्पाश्चात्यानां दूरतराणां लोकानामस्तकालः, उदयस्थानाधोवासिनां जनानां मध्याह्नः, एवं केषाञ्चित्प्रथमः प्रहरः, केषाञ्चिद्द्वितीयः प्रहरः, केषाञ्चित्तृतीयः प्रहरः, क्वचिन्मध्यरात्रः क्वचित्सन्ध्या, एवं विचारणया अष्टप्रहरसम्बन्धी कालः समकं प्राप्यते। तथैव नरलोके सर्वत्र जम्बूद्वीपगतमेरोः समन्तात् सूर्यप्रमाणेन अष्टप्रहरकालसम्भावनं चिन्त्यम्॥६५॥

## [चन्द्रस्य विशेषस्वरूपम्]

सूर्यचन्द्रयोः स्वरूपमुक्त्वाथ चन्द्रस्य किञ्चिद्विशेषमाह—

**[मूल] केणं वड्ढइ चंदो, परिहाणी होइ केण चंदस्स।**
**केण सिअकिण्हपक्खा, दिणे अ रत्तिम्मि केणुदओ॥६६॥**

**[वृत्ति] केणं०।** केन प्रकारेण चन्द्रः शुक्लपक्षे वर्धते? (१) केन प्रकारेण कृष्णपक्षे चन्द्रस्य परिहानिर्भवति? (२) केन प्रकारेण शुक्लपक्षो भवति? (३) केन प्रकारेण कृष्णपक्षोऽपि? (४) केन प्रकारेण कदाचिच्चन्द्रस्य रात्रावुदयः स्यात्? (५) केन दिवाप्युदयोऽपि? (६)॥६६॥

## [राहुस्वरूपम्]

अथैतान् षट् प्रश्नान् विवृण्वन् प्रथमं राहुस्वरूपमाह—

**[मूल] किण्हं राहुविमाणं, निच्चं चंदेण होइ अविरहिअं।**
**चउरंगुलमप्पत्तं, हिट्ठा चंदस्स तं चरइ॥६७॥**

**[वृत्ति] किण्हं०।** इह द्विधा राहुः नित्यराहुः पर्वराहुश्च। तत्र यो नित्यराहुस्तस्य विमानं कृष्णम्, तच्च जगत्स्वाभाव्यात् नित्यम् आकालं चन्द्रेण सार्धमविरहितं चतुर्भिरङ्गुलैरप्राप्तं सच्चन्द्रविमानस्याधस्ताच्चरति॥६७॥

## [चन्द्रस्य वृद्धिहानिस्वरूपं चन्द्रस्य आवरणमोचनस्वरूपे मतत्रयं च]

अथ चन्द्रस्य वृद्धिहानिस्वरूपमाह—

**[मूल] बावट्ठिं बावट्ठिं, दिवसे दिवसे उ सुक्कपक्खस्स।**
**जं परिवड्ढइ चंदो, खवेइ तं चेव कालेण[१]॥६८॥**

[वृत्ति] बाव०। द्वाषष्ठिभागीकृतचन्द्रविमानस्य द्वौ भागावुपरितनौ सदाप्यनावार्यस्वभावत्वात्तावपाकृत्य शेषाः षष्ठिभागाः पञ्चदशभागैर्ह्रियन्ते चत्वारो लभ्यन्ते। अवयवे समुदायोपचाराच्छुक्लपक्षस्य दिवसे दिवसे चतुरो द्वाषष्ठिभागान् यान् परिवर्धते कालेन कृष्णपक्षेण पुनर्दिवसे दिवसे तानेव द्वाषष्ठिभागान् क्षपयति परिहायति। उक्तं हि—

*पन्नरसाभागेण[२] य, चंदं पन्नरसमेव तं वरइ।*
*पन्नरसविभागेण य, तेणेव कमेणऽवक्कमइ[३]॥* [सूर्यप्र.सू.७५]

व्याख्या—कृष्णपक्षे प्रतिदिवसं राहुविमानं स्वकीयेन पञ्चदशभागेन तं चन्द्रमिति चन्द्रविमानस्य पञ्चदशमेव भागं वृणोति आच्छादयति। शुक्लपक्षे पुनस्तमेव प्रतिदिवसं पञ्चदशभागमात्मीयेन

---

१ सम्प्रति चन्द्रमसमधिकृत्य गौतमः पश्नयति— केन कारणेन शुक्लपक्षे वर्धते? केन वा कारणेन चन्द्रस्य कृष्णपक्षे परिहानिर्भवति? केन वा 'अनुभावेन' प्रभावेण चन्द्रस्यैकः पक्षः कृष्णो भवति एकः 'ज्योत्स्नः' शुक्ल? इति, एवमुक्ते भगवानाह— इह द्विविधो राहुस्तद्यथा— पर्वराहुर्नित्यराहुश्च, तत्र पर्वराहुः स उच्यते यः कदाचिदकस्मात्समागत्य निजविमानेन चन्द्रविमानं सूर्यविमानं वान्तारितं करोति, अन्तरिते च कृते लोके ग्रहणमिति प्रसिद्धिः, स इह न गृह्यते, यस्तु नित्यराहुस्तस्य विमानं कृष्णं तथाजगत्स्वाभाव्याच्चन्द्रेण सह 'नित्यम्' सर्वकालमविरहितं तथा 'चउरंगुलेन' चतुर्ङ्गुलैरप्राप्तं सत् 'चन्द्रस्य' चन्द्रविमानस्याधस्ताच्चरति, तच्चैवं चरत् शुक्लपक्षे शनैः शनैः प्रकटीकरोति चन्द्रमसं कृष्णपक्षे च शनैः शनैरावृणोति, तथा चाह— इह द्वाषष्टिभागीकृतस्य चन्द्रविमानस्य द्वौ भागावुपरितनौ सदानावार्यस्वभावत्वाद् अपाकृत्य शेषस्य पञ्चदशभिर्भागे हृते ये चत्वारो भागा लभ्यन्ते ते द्वाषष्टिशब्देनोच्यते, अवयवे समुदायोपचारात्, एतच्च व्याख्यानमेतस्यैव चूर्णमुपजीव्य कृतं न स्वमनीषिकया, तथा च तद्ग्रन्थः— "चन्द्रविमानं द्वाषष्टिभागीक्रियते, ततः पञ्चदशभिर्भागोऽपह्रियते, तत्र चत्वारो भागा द्वाषष्टिभागानां पञ्चदशभागेन लभ्यन्ते शेषौ द्वौ, एतावद् दिने दिने शुक्लपक्षस्य राहुणा मुच्यत" इति एवं च सति यत्समवायाङ्गसूत्रम्— "सुक्कपक्खस्स दिवसे दिवसे बावट्ठिं बावट्ठिं भागे परिवड्ढइ" इति, तदप्येवमेव व्याख्येयम्, सम्प्रदायवशाद्धि सूत्रं व्याख्येयम्, न स्वमनीषिकया, अन्यथा महदाशतनाप्रसक्तेः, सम्प्रदायश्च यथोक्तस्वरूप इति, तत्र शुक्लपक्षस्य दिवसे यद्— यस्मात्कारणाच्चन्द्रो द्वाषष्टिद्वाषष्टिभागान्— द्वाषष्टिभागसत्कान् चतुरश्चतुरो भागान् यावत्परिवर्धते, कालेन— कृष्णपक्षेण पुनर्दिवसे दिवसे तानेव द्वाषष्टिभागसत्कान् चतुरश्चतुरो भागान् 'प्रक्षपयति' परिहापयति, एतदेव व्याचष्टे— कृष्णपक्षे प्रतिदिवसं राहुविमानं स्वकीयेन पञ्चदशेन भागेन तं 'चन्द्रम्' चन्द्रविमानं पञ्चदशमेव भागं 'वृणोति' आच्छादयति, शुक्लपक्षे पुनस्तमेव प्रतिदिवसं पञ्चदशभागमात्मीयेन पञ्चदशेन भागेन 'व्यतिक्रामति' मुञ्चति, किमुक्तं भवति?— कृष्णपक्षे प्रतिपद आरभ्यात्मीयेन पञ्चदशेन पञ्चदशेन भागेन प्रतिदिवसमेकैकं पञ्चदशभागमुपरितनभागादारभ्यावृणोति, शुक्लपक्षे तु प्रतिपद आरभ्य तेनैव क्रमेण प्रतिदिवसमेकैकं पञ्चदशभागं प्रकटीकरोति, तेन जगति चन्द्रमण्डलस्य वृद्धिहानी प्रतिभासेते, स्वरूपतः पुनश्चन्द्रमण्डलमवस्थितमेव, तथा चाह— एवं राहुविमानेन प्रतिदिवसं क्रमेणानावरणकरणतो 'वर्धते' वर्धमानः प्रतिभासते चन्द्रः, एवं राहुविमानेन प्रतिदिवसं क्रमेणावरणकरणतः परिहानिप्रतिभासो भवति चन्द्रस्य विषये, एतेनैव 'अनुभावेन' कारणेनैकः पक्षः 'कालः' कृष्णो भवति यत्र चन्द्रस्य परिहानिः प्रतिभासते, एकस्तु 'ज्योत्स्नः' शुक्लो यत्र चन्द्रविषयो वृद्धिप्रतिभासः॥

२ **पन्नरसइ** इति मु.।

३ **तिक्कमइ** इति मु.।

पञ्चदशभागेन व्यतिक्रामति मुञ्चतीत्यर्थः। जीवाभिगमवृत्ति[१]गतमिदम्। समवायाङ्गवृत्तौ तु द्विषष्टिस्थाने— ***बावट्ठिं बावट्ठिं इत्यत्र चन्द्रविमानस्यैकत्रिंशदुत्तरनवशतविभक्तस्य ९३१ एको अंशोऽविशष्यते, शेषाः प्रतिदिवसं द्विषष्टिर्द्विषष्टिर्वर्धन्ते, एकत्रिंशदुत्तरनवशताङ्कस्य पञ्चदशदिनरूपभागैर्हृतस्य द्वाषष्टेर्लभ्यमानत्वात्, एकः शेषः, ततः पञ्चदशदिनैः सर्वे समुदिता भवन्ति। कृष्णपक्षे पुनस्तथैव हीयन्त इति व्याख्यातम्॥६८॥*** **[सम.वृ.सू.६२.६२]**

अथ तृतीयं मतं सूर्यप्रज्ञप्तिगतमुच्यते—

**[मूल] सोलसभागे काऊण उडुवई हायएत्थ पन्नरसं।**
**तत्तियमित्ते भागे, पुणो वि परिवड्ढए जोण्हा[२]॥६९॥**

**[सूर्यप्र.प्रा.२०, सू.१०५]**

**[वृत्ति] सोल०।** षोडशभागान् कृत्वा उडुपतिः चन्द्रः कृष्णपक्षे प्रतिदिनमेकैकं पञ्चदशभागं

---

१ जीवाभिगमसूत्रवृत्तिः प्र.३, उ.२, सू.१७७।

२ कतिविधे णं राहू पं०?, दुविहे पं० तं— ता धुवराहू य पव्वराहू य, तत्थ णं जे से धुवराहू से णं बहुलपक्खस्स पाडिवए पण्णरसइ भागेणं भागं चंदस्स लेसं आवरेमाणे० चिट्ठति, तं० पढमाए पढमं भागं जाव पन्नरसमं भागं, चरमे समए चंदे रत्ते भवति अवसेसे समए चंदे रत्ते य विरत्ते य भवइ, तमेव सुक्कपक्खे उवदंसेमाणे २ चिट्ठति, तं० पढमाए पढमं भागं जाव चंदे विरत्ते य भवइ, अवसेसे समए चंदे रत्ते विरत्ते य भवति, तत्थ णं जे ते पव्वराहू से जहण्णेणं छण्हं मासाणं, उक्कोसेणं बायालीसाए मासाणं चंदस्स अडतालीसाए संवच्छराणं सूरस्स (सू.१०५)॥

अथ राहोर्भेदं जिज्ञासिषुः प्रश्नयति— 'ता कइविये ण'मित्यादि, सुगमं, भगवानाह— 'दुविहे'इत्यादि, द्विविधो राहुः प्रज्ञप्तः, तद्यथा— ध्रुवराहुः पर्वराहुश्च, तत्र यः सदैव चन्द्रविमानस्याधस्तात् सञ्चरति स ध्रुवराहुः, यस्तु पर्वणि-पौर्णमास्याममावास्यां वा यथाक्रमं चन्द्रस्य सूर्यस्य वा उपरागं करोति स पर्वराहुः, तत्र योऽसौ ध्रुवराहुः स बहुलपक्षस्य कृष्णपक्षस्य-सम्बन्धिन्याः प्रतिपद आरभ्य प्रतितिथि आत्मीयेन पञ्चदशेन भागेन पञ्चदशभागं २ चन्द्रस्य लेश्यामावृण्वन् तिष्ठति, तद्यथा— प्रथमायां-प्रतिपल्लक्षणायां तिथौ प्रथमं पञ्चदशभागं द्वितीयस्यां द्वितीयं तृतीयस्यां तृतीयं यावत्पञ्चदश्यां पञ्चदशम्, ततः पञ्चदश्यां तिथौ चरम समये रक्तो भवति-राहुविमानेनोपरक्तो भवति, सर्वात्मना राहुविमानेनाच्छादितो भवतीत्यर्थः, अवशेषे समये प्रतिपद्द्वितीयातृतीयादिकाले चन्द्रो रक्तश्च भवति विरक्तश्च भवति, देशेन राहुविमानेनाच्छादितो भवति देशतश्चानाच्छादित इत्यर्थः, शुक्लपक्षस्य प्रतिपद आरभ्य पुनस्तमेव पञ्चदशं २ भागं प्रतितिथि उपदर्शयन्-प्रकटीकुर्वन् तिष्ठति तद्यथा— प्रथमायां प्रतिपल्लक्षणायां तिथौ प्रथमं पञ्चदशभागं प्रकटीकरोति द्वितीयायां द्वितीयम् एवं यावत् पञ्चदश्यां पौर्णमास्यां पञ्चदशं पञ्चदशभागम्, चरमसमये-पौर्णमासीचरमसमये चन्द्रः सर्वात्मना विरक्तो भवति, सर्वात्मना प्रकटीभवतीत्यर्थः, लेशतोऽपि राहुविमानेनानाच्छादितत्वात्, आह— शुक्लपक्षे कृष्णपक्षे वा कतिपयान् दिवसान् यावत् राहुविमानं वृत्तमुपलभ्यते, यथा ग्रहणकाले पर्वराहुः, कतिपयांश्च दिवसान् यावन्न तथा, ततः किमत्र कारणमिति?, उच्यते, इह येषु दिवसेष्वतिशयेन तमसाभिभूयते शशी तेषु तद्विमानं वृत्तमाभाति, चन्द्रप्रभया बाहुल्येन प्रसराभावतो राहुविमानस्य यथावस्थिततयोपलम्भात्, येषु पुनश्चन्द्रो भूयान् प्रकटो भवति तेषु न चन्द्रप्रभा राहुविमानेनाभिभूयते, किन्त्वतिबहुलतया चन्द्रप्रभयैव स्तोकं २ राहुविमानप्रभाया अभिभवस्ततो न वृत्ततोपलम्भः, पर्वराहुविमानं च ध्रुवराहुविमानादतीव तमोबहुलं ततस्तस्य स्तोकस्यापि न चन्द्रस्य प्रभयाभिभवसम्भव इति तस्य स्तोकरूपस्यापि वृत्तत्वेनोपलब्धिः, तथा चाह विशेषणवत्यां जिनभद्रगणिक्षमाश्रमणः—

"वट्टच्छेओ कइवयदिवसे धुवराहुणो विमाणस्स। दीसइ परं न दीसइ जह गहणे पव्वराहुस्स॥१॥"

आचार्य आह—

अच्चत्थं नहि तमसाभिभूयते जं ससी विमुच्चंतो। तेणं वट्टच्छेओ गहणे उ तमो तमोबहुलो॥२॥

'तत्थ णं जे से' इत्यादि, तत्र योऽसौ पर्वराहुः स जघन्येन षण्णां मासानामुपरि चन्द्रस्य सूर्यस्य चोपरागं करोति, उत्कर्षतो द्वाचत्वारिंशतो मासानामुपरि चन्द्रस्य अष्टाचत्वारिंशतः संवत्सराणामुपरि सूर्यस्य।

परिहापयति, एवं पञ्चदशदिनैः पञ्चदशभागा भवन्ति, एकोऽनावृतोऽवशिष्यते। शुक्लपक्षे त्वेकैकः पञ्चदशभागो वर्धते तेन राकायां पूर्णाः षोडशभागा भवन्ति। ज्योतिष्करण्डकेऽपीत्थमेव। अनेन भणितत्रयानुसारेण स्तोको वा घनो चन्द्र उद्घाटः तिष्ठति, न च सर्वः कदापि नित्यराहुणा चन्द्र आव्रियते। आह च—चन्द्रविमानस्य पञ्चैकषष्ठिभागोनयोजनमानत्वाद् राहुविमानस्य ग्रहविमानत्वेनार्धयोजनमात्रत्वाच्च कथं सर्वात्मनावरणस्य सम्भवः?, उच्यते, ग्रहविमानानामुक्तप्रमाणस्य प्रायिकत्वाद्राहुविमानमधिकप्रमाणमपि सम्भाव्यते। अन्ये त्वाहुः—लघीयसोऽपि राहुविमानस्यात्यन्तबहुलेन प्रसर्पता तमिस्ररश्मिजालेन महदपि चन्द्रविमानमाव्रियते। अथवा महदपि चन्द्रविमानमर्वाक्स्थायिना लघुनापि राहुविमानेनाच्छादितमधस्तनैर्लोकैर्न दृश्यत इति॥६९॥

## [सितकृष्णपक्षस्वरूपम्]

अथ श्वेतकृष्णाभिधे तृतीयचतुर्थे द्वारे आह—

**[मूल] एवं वड्ढइ चंदो, परिहाणी होइ एवं चंदस्स।**
**कालो वा जोण्हा वा, तेणणुभावेण चंदस्स॥७०॥**

**[वृत्ति] एवं व०।** इत्थं राहुविमानेन प्रतिदिनं क्रमेणानावरणकरणतश्चन्द्रः वर्धते वर्धमानः प्रतिभासते, एवं राहुविमानेन प्रतिदिवसं क्रमेणावरणकरणतः परिहानिप्रतिभासो भवति। चन्द्रस्य विषये तेनानुभावेन तेन कारणेन एकः पक्षः कालः कृष्णो भवति यत्र चन्द्रस्य परिहानिप्रतिभासः, एकस्तु ज्योत्स्नावान् शुक्लपक्षः यत्र चन्द्रविषया वृद्धिः प्रतिभासते। **कालो वा जोण्हा** वा इत्यत्र द्वौ वा शब्दौ तुल्यकक्षताद्योतकौ। अत्र श्वेतपक्षात्पूर्वं कृष्णपक्षाख्यानं तद्व्यत्ययकारणं जीवाभिगमेऽपि नोक्तम्[१]॥७०॥

---

१ "चन्द्रविमानं द्वाषष्टिभागीक्रियते, ततः पञ्चदशभिर्भागोऽपह्नियते, तत्र चत्वारो भागा द्वाषष्टिभागानां पञ्चदशभागेन लभ्यन्ते शेषौ द्वौ, एतावद् दिने दिने शुक्लपक्षस्य राहुणा मुच्यते" इति, एवं च सति यत्समवायाङ्गसूत्रम्—"सुक्कपक्खस्स दिवसे दिवसे बावट्ठिं बावट्ठिं भागे परिवड्ढइ" इति, तदप्येवमैव व्याख्येयम्, सम्प्रदायवशाद्धि सूत्रं व्याख्येयम्, न स्वमनीषिकया, अन्यथा महदाशातनाप्रसक्तेः, सम्प्रदायश्च यथोक्तस्वरूप इति, तत्र शुक्लपक्षस्य दिवसे यद्—यस्मात्कारणाच्चन्द्रो द्वाषष्टिद्वाषष्टिभागान्—द्वाषष्टिभागसत्कान् चतुरश्चतुरो भागान् यावत्परिवर्धते, कालेन—कृष्णपक्षेण पुनर्दिवसे दिवसे तानेव द्वाषष्टिभागसत्कान चतुरश्चतुरो भागान् 'प्रक्षपयति' परिहापयति, एतदेव व्याचष्टे—कृष्णपक्षे प्रति दिवसं राहुविमानं स्वकीयेन पञ्चदशेन भागेन तं 'चन्द्रम्' चन्द्रविमानं पञ्चदशमेव भागम् 'वृणोति' आच्छादयति, शुक्लपक्षे पुनस्तमेव प्रतिदिवसं पञ्चदशभागमात्मीयेन पञ्चदशेन भागेन 'व्यतिक्रामति' मुञ्चति, किमुक्तं भवति?—कृष्णपक्षे प्रतिपद आरभ्यात्मीयेन पञ्चदशेन पञ्चदशेन भागेन प्रतिदिवसमेकैकं पञ्चदशभागमुपरितनभागादारभ्यावृणोति, शुक्लपक्षे तु प्रतिपद आरभ्य तेनैव क्रमेण प्रतिदिवसमेकैकं पञ्चदशभागं प्रकटीकरोति, तेन जगति चन्द्रमण्डलस्य वृद्धिहानी प्रतिभासेते, स्वरूपतः पुनश्चन्द्रमण्डलमवस्थितमेव, तथा चाह—एवं राहुविमानेन प्रतिदिवसं क्रमेणानावरणकरणतो 'वर्धते' वर्धमानः प्रतिभासते चन्द्रः, एवं राहुविमानेन प्रतिदिवसं क्रमेणावरणकरणतः परिहानिप्रतिभासो भवति चन्द्रस्य विषये, एतेनैव 'अनुभावेन' कारणे नैकः पक्षः 'कालः' कृष्णो भवति यत्र चन्द्रस्य परिहानिः प्रतिभासते, एकस्तु 'ज्योत्स्नः' शुक्लो यत्र चन्द्रविषयो वृद्धिप्रतिभासः॥ 'अन्तः' मध्ये 'मनुष्यक्षेत्रे' मनुष्यक्षेत्रस्य पञ्चविधा ज्योतिष्कास्तद्यथा—चन्द्राः सूर्या ग्रहगणाः चशब्दान्नक्षत्राणि तारकाश्च भवन्ति 'चारोपगाः' चारयुक्ताः, 'तेने' ति प्राकृतत्वात्पञ्चम्यर्थे तृतीया ततो मनुष्यक्षेत्रात्परं यानि शेषाणि 'चन्द्रादित्यग्रहतारानक्षत्राणि' चन्द्रादित्यग्रहतारानक्षत्रविमानानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वान्, तेषां नास्ति गतिः—न स्वस्मात्स्थानाच्चलनं नापि 'चारः' मण्डलगत्या परिभ्रमणं किन्त्ववस्थितान्येव तानि ज्ञातव्यानि॥ [जीवा.वृ.प्र.३ सू.३२२ गा.१५-१८]

**[चन्द्रस्य दिनरात्र्युदयस्वरूपम्]**

अथ चन्द्रस्य कदा रात्रावुदयः कदा दिवसेऽप्युदयस्तद्द्वारद्वयं व्याचिख्यासुर्गाथाषट्केनाह—

**[मूल] सूरेण समं उदओ, चंदस्स अमावसीदिणे होइ।**
**तेसिं मंडलमिक्कं, रासी रिक्खं तहिक्कं च॥७१॥**

**[वृत्ति] सूरेण०।** सूर्येण सार्धं सर्वास्वप्यमावास्यासु प्रातश्चन्द्रस्योदयो भवति, तस्मिन् दिने चन्द्रसूर्ययोर्मण्डलमेकं भवति, यस्मिन्मण्डले सूर्यस्तदूर्ध्वमेव चन्द्रोऽपि निजमण्डले चरति। तथा तयो राशिर्नक्षत्रं चैकमेव, यस्मिन् राशौ नक्षत्रे च सूर्यस्तस्मिंश्चन्द्रोऽपि॥७१॥

ततः किं भवति ? इत्याह—

**[मूल] तत्तो पडिवयबीआइदिणेसु रिक्खाइभेअमावहइ।**
**इक्किक्कमुहुत्तेण य, सूरा पिट्ठे पडइ चंदो॥७२॥**

**[वृत्ति] तत्तो प०।** ततः तद्दिनानन्तरममावास्यातः प्रतिपद्द्वितीयादिदिनेषु चन्द्रो ऋक्षादीनां भेदम् अन्तरमावहति, नक्षत्रराशिमण्डलेभ्योऽन्तरं प्राप्नोतीत्यर्थः, तथा च प्रतिदिनमेकैकमुहूर्तेन सूर्यात्पृष्ठे पतति॥७२॥

पुनः किं भवति? इत्याह—

**[मूल] राहू वि अ पइदिअहं, ससिणो इक्किक्कभागमुज्झइ अ।**
**इअ चंदो बीआइअदिणेसु, पयडो हवइ तम्हा॥७३॥**

**[वृत्ति] राहू वि०।** राहुरपि प्रतिदिवसमेकैकं पञ्चदशभागं **उज्झइ त्ति** त्यजति, इति अमुना प्रकारेण चन्द्रोऽपि द्वितीयादिषु दिनेषु तस्मात्प्रकटो भवति। भावना यथा—शुक्लप्रतिपद्युदयस्तथैव, अमावास्यातो मण्डलादीनाम् अन्तरं जायते, मन्दगतित्वेन सूर्यान्मुहूर्तेनैकेन चन्द्रः पृष्ठे पतति, राहुरप्येकं भागं मुञ्चति, परं सायं सूर्यकिरणावृतत्वेन न तथा सम्यग्दृग्गोचरमायाति। द्वितीयादिने सूर्योदयादनूदयेन द्वितीयभागमोचनेन मुहूर्तद्विकगम्यक्षेत्रपृष्ठपतनेन च सायं सूर्याद् दूरत्वाद् दृश्यते, एवं सर्वासु शेषतिथिषु ज्ञेयं पूर्णिमां यावत्। गतेः शीघ्रविभागस्त्वेवम्—***सर्वमन्दगतिश्चन्द्रः, तस्माच्छीघ्रो रविः, तस्माद् ग्रहाः, तेभ्यो नक्षत्राणि, ततस्ताराः। ग्रहमध्ये तु बुधाच्छुक्रः शुक्रान्मङ्गलः, मङ्गलाद् बृहस्पतिर्बृहस्पतेः शनिः शीघ्र*** इति सङ्ग्रहणीवृत्तिगतम्॥७३॥ **[सङ्ग्र.वृ. ४४]**

अथ पूर्णिमायां यत्स्यात्तदाह—

**[मूल] सयलो वि ससी दिसइ, राहुविमुक्को अ पुण्णिमादिअहे।**
**सूरत्थमणे उदओ, पुव्वे पुव्वुत्तजुत्तीए॥७४॥**

**[वृत्ति] सयलो०।** पूर्णिमायां सकलोऽपि शशी राहुविमुक्तः सन् दृश्यते। सूर्यास्ते पूर्वस्यामुदयं प्राप्नोति, पूर्वोक्तयुक्त्या पञ्चदशमुहूर्तैः सूर्यात्पृष्ठे पतितत्वेन॥७४॥

पूर्णिमायां विशेषमाह—

**[मूल] ससिसूरामिह पुण्णिमि, हुंति उ रासीण उभयसत्तमगे।**
**बहुलपडिवयनिसाए, गए मुहुत्ते हवइ उदओ॥७५॥**

**[वृत्ति] ससिसू०।** सर्वास्वपि पूर्णिमासु शशिसूर्यौ परस्परं सप्तमराशौ भवतः, सूर्यभोग्यात्सप्तमराशौ चन्द्रः चन्द्रभोग्यात् सप्तमराशौ सूर्यः। शुक्लपक्षे दिनोदयस्वरूपं प्रोच्याथ सार्धगाथया कृष्णपक्षे चन्द्रस्य रात्रावुदयस्वरूपमाह—**बहुल त्ति।** कृष्णपक्षप्रतिपन्निशाया मुहूर्ते गते चन्द्रस्योदयो भवति॥७५॥

ततः किं स्यात्? इत्याह—

**[मूल] एवं मुहुत्तवुड्ढी, भागं चावरइ पइदिणं राहू।**
**तेण अमावस्साए, होइ तहा जं पुरा वुत्तं॥७६॥**

**[वृत्ति] एवं मु०।** एवम् अमुना प्रकारेण मुहूर्तवृद्धिर्भवति, यथा कृष्णद्वितीयायां मुहूर्तद्वये गते चन्द्रोदयो यावदमावास्यायां पञ्चदशमुहूर्तवृद्धिः। राहुरपि प्रतिदिवसं पञ्चदशमेकैकं भागमावृणोति तेन कारणेनामावास्यायां तथा भवति तत्पुरा प्रोक्तम्—सूर्येण सममुदयमित्यादिकं सर्वम्। अत्र किञ्चिद्दिनमानापेक्षया उदयवेलायाः स्तोकत्वमधिकत्वं वा चिन्त्यम्। किञ्च रात्रेर्यावद्भिः मुहूर्तैरुदयः तावद्भिः मुहूर्तैर्द्वितीयदिवसेऽस्तमयनमपि भाव्यम्॥७६॥

## [पर्वराहुस्वरूपम्]

अथ पर्वराहुस्वरूपमाह—

**[मूल] ससिसूराणं गहणं, सड्ढतिवरिसाडयालवरिसेहिं।**
**उक्कोसओ कमेणं, जहन्नओ मासछक्केणं॥७७॥**

**[वृत्ति] ससिसू०।** यः पर्वराहुः स पूर्णिमारात्रौ चन्द्रविमानं तथामावास्यादिने सूर्यविमानं तिरोधत्ते, तस्मिन् तिरोहिते ग्रहणमिति रुढिः। तच्च ग्रहणं चन्द्रसूर्ययोः क्रमेणोत्कृष्टतः सार्धवर्षत्रयेण चन्द्रस्याष्टचत्वारिंशद्वर्षैः सूर्यस्य च भवति। जघन्यतः पुनरुभयोः मासषट्केनैवेति स्थितिः॥७७॥

## [ग्रहणस्वरूपम्]

ग्रहणस्य पुनर्विशेषमाह—

**[मूल] ससिणो वा रविणो वा, जइआ गहणं तु होइ एगस्स।**
**तइआ तं सव्वेसिं, ताणं नेअं मणुअलोए॥७८॥**

**[वृत्ति] ससिणो०।** यदा कदाचिदेकस्य शशिनो रवेर्वा ग्रहणं भवति तदा सर्वेषां चन्द्राणां सूर्याणां च मनुष्यलोके समकं जायते, एकस्य चन्द्रस्य तदा सर्वेषां चन्द्राणाम्, एकस्य सूर्यस्य तदा सर्वेषां सूर्याणां नरक्षेत्रवर्तिनां भवति। यतः सर्वेषामप्येकनक्षत्रराशिस्थितिकत्वात् समश्रेणिव्यवस्थिततत्वाच्च। न चेदं स्वमनीषया लिखितं किन्त्वनुयोगद्वारवृत्त्यादौ तथैव दर्शनात्, तथा च तद्वृत्तिः—***चन्द्रसूर्योपरागाः राहुग्रहणानि, बहुवचनं***

*चात्रार्धतृतीयद्वीपसमुद्रवर्तिचन्द्रार्काणां युगपदुपरागभावान्मन्तव्यमिति।* [अनु.वृ.सू. २४९]

यच्च जीवाभिगमादौ[१] अन्तरद्वीपादियौगलिकक्षेत्रेषु चन्द्रार्कोपरागाभावः प्रोक्तः तत्तु तज्जयाजन्यासम्भवः तत्र ज्ञायते। यद्वा तेषां पुण्यानुभावाद् ग्रहणादर्शनमपि सम्भाव्यते, परं न ग्रहणासम्भवः, तत्रापि चन्द्रादित्यानां चारत्वेन॥७८॥

**[चन्द्रसूर्याणां दक्षिणोत्तरचारः]**

अथ चन्द्रार्काः कदा दक्षिणचारिणः कदोत्तरचारिणश्च भवन्ति? इत्याह—

**[मूल] कक्काइमिआइसु छसु, रासीसुं दाहिणुत्तरा कमसो।**
**मासेण हुंति ससिणो, सूरा संवच्छरेण पुणो॥७९॥**

**[वृत्ति] कक्का०।** कर्कादिषट्सु राशिषु—कर्क-सिंह-कन्या-तुला-वृश्चिक-धनुर्षु वर्तमानाश्चन्द्रार्का दक्षिणचारिणो भवन्ति, उत्तरमण्डलेभ्यः क्रमेण दक्षिणमण्डलेषु गच्छन्ति। मृगादिषट्सु च—मकर-कुम्भ-मीन-मेष-वृष-मिथुनेषु वर्तमानाश्चन्द्रार्का उत्तरचारिणो भवन्ति। बहुवचनमत्र सकलचन्द्रार्कापेक्षम्, यतः सर्वेऽपि सूर्याश्चन्द्रा वा दक्षिणोत्तरचारिणः समकालमेव भवन्ति, एकराश्यवस्थानात्। तत्र विशेषमाह—एकेन मासेन चन्द्रा दक्षिणोत्तरचारिणः, सूर्याः पुनः संवत्सरेण दक्षिणोत्तरचारिणो भवन्ति । अत्र मासो नक्षत्रमासो ग्राह्यः, स च सप्तविंशतिर्दिनानि एकविंशतिसप्तषष्टिभागाश्चेति २७ २१/६७ प्रमाणः, तदर्धेन १३ ४४/६७ चन्द्रस्य दक्षिणायनमर्धेन चोत्तरायणम्। यतश्चन्द्र-चन्द्राभिवर्धित-चन्द्राभिवर्धितनामानः संवत्सराः , ते च त्रिंशदधिकाष्टादशशतदिनसङ्ख्ये युगे पञ्च भवन्ति। तत्रैकोनत्रिंशद्दिनमानाः सद्वा(सार्ध)त्रिंशद्द्वाषष्टिभागाः चन्द्रमासा द्वाषष्टिः, सार्धत्रिंशद्दिनमानाः सूर्यमासाः षष्टिः, सप्तविंशतिदिनमानाः सैकविंशतिः सप्तषष्टिभागा नक्षत्रमासाः सप्तषष्टिर्युगे। तेन युगे चन्द्रस्य दक्षिणायनानि सप्तषष्टिः, उत्तरायणान्यपि सप्तषष्टिः सर्वाणि युगे १३४ चन्द्रायणानि। तथा सूर्यस्य युगे दशायनानि, तत्र पञ्च दक्षिणायनानि पञ्चैवोत्तरायणानि। त्र्यशीत्यधिकशतदिनानाम् एकैकमयनम् १३८, तद्दशगुणं युगम् १८३० दिनप्रमाणम्। तथा सूर्यः सर्वाभ्यन्तरे मण्डले दिनमेकं चरति, सर्वबाह्येऽपि दिनमेकम्, शेषेषु मण्डलेषु प्रवेशनिर्गमाभ्यां दिनद्वयम्, अतः प्रथमचरमदिनन्यूनत्वे सूर्यसंवत्सरे ३६६ दिनानि, स च पञ्चगुणितोऽष्टादशशतानि। युगस्य चादिः श्रावणासितप्रतिपदि, उक्तं हि—

***सावणबहुलपडिवए, बालवकरणे अभीइनक्खत्ते।***
***सव्वत्थ पढमसमए, जुगस्स आइं विआणाहि[२]॥* [ज्योति.५५]**

सर्वत्रेति भरतैरावतविदेहेषु भाव्यम्। अवसर्पिण्यां षण्णामरकाणामप्यादिरत्रैव। विदेहेषु यद्यप्यरकाणाम् अभावस्तथापि पञ्चवत्सरात्मकस्य युगस्य सद्भावात्। मासपञ्चकवर्षपञ्चकस्वरूपं श्रीमुनिचन्द्रसूरिकृतका

---

1 जीवाजीवाभिगमसूत्रं प्र.३, उ.२, सू.१४७।

2 'सर्वत्र' भरतैरवते महाविदेहेषु च श्रावणमासे 'बहुलपक्षे' कृष्णपक्षे प्रतिपदि तेथौ बालवकरणेऽभिजिन्नक्षत्रे प्रथम समये युगस्यादिं विजानीहि, किमुक्तं भवति? एतावान् युगस्यादौ (दिः) सर्वेष्वपि क्षेत्रष्वव्यभिचारी, अमीषां च यथा युगादिता तथा प्रागेव भावितम्॥५५॥

लशतक[1] प्रवचनसारोद्धारादि[2] ग्रन्थेभ्योऽवसेयम्। दिनादिसङ्ख्या तु यन्त्रकद्वयादवधार्या—

१ द्रष्टव्यं परिशिष्टं षष्ठम्।

२ मासा य पंच सुत्ते नक्खत्तो चंदिओ य रिउमासो। आइच्चोऽविय इयरोऽभिवड्ढिओ तह य पंचमओ॥८९७॥

अहरत्त सत्तवीसं तिसत्तसत्तट्ठिभाग नक्खत्तो चंदो। उणत्तीसं विसट्ठिं भाया य बत्तीसं॥८९८॥

उउमासो तीसदिणो आइच्चो तीस होइ अद्धं च। अभिवड्ढिओ य मासो चउवीससएण छेएणं॥८९९॥

भागाणिगवीससयं तीसा एगाहिया दिणाणं तु। एए जह निप्फत्तिं लहंति समयाउ तह नेयं॥९००॥

**'मासा य पंच'** गाहा, मासा नक्षत्रादयः पञ्च 'सूत्रे' पारमेश्वरे प्रवचने प्रतिपादिता इति शेषः। तत्र नक्षत्रेषु भवो नाक्षत्रः, किमुक्तं भवति?— चन्द्रश्चारं चरन् यावता कालेनाभिजित आरभ्योत्तराषाढानक्षत्रपर्यन्तं गच्छति तत्कालप्रमाणो नाक्षत्रो मासः। यदि वा चन्द्रस्य नक्षत्रमण्डले परिवर्तयतो निष्पन्न इत्युपचारान्मासोऽपि नक्षत्रम्, तथा चन्द्रे भवश्चान्द्रः युगादौ श्रावणे मासे बहुलपक्षप्रतिपद आरभ्य यावत्पौर्णमासीपरिस माप्तिस्तावत्कालप्रमाणश्चान्द्रो मासः। एकपौर्णमासीपरावर्तश्चान्द्रो मास इति यावत्, अथवा चन्द्रचारनिष्पन्नत्वादुपचारतो मासोऽपि चन्द्रः। चः समुच्चये। तथा ऋतुमासः इह किल ऋतुर्लोकरूढ्या षष्ट्यहोरात्रप्रमाणो मासद्वयात्मकः, तस्यार्धमपि मासोऽवयवे समुदायोपचारात्, ऋतुः स चार्थात्परिपूर्णत्रिंशदहोरात्रप्रमाणः। एष एव च ऋतुमासः कर्ममास इति वा सावनमास इति वा व्यवह्रियते। उक्तञ्च— "एस चेव उउमासो कम्ममासो सावणमासो भन्नइ" इति।

तथा आदित्यस्यायमादित्यः स च एकस्य दक्षिणायनस्योत्तरायणस्य वा त्र्यशीत्यधिकदिनशतप्रमाणस्य षष्ठभागमानः यदि वा आदित्यचारनिष्पन्नत्वादुपचारतो मासोऽप्यादित्यः। तथा पञ्चमो मासोऽभिवर्धितः। अभिवर्धितो नाम मुक्यतस्त्रयोदशचन्द्रमासप्रमाणः संवत्सरः। द्वादशचन्द्रमासप्रमाणात्संवत्सरादेकेन मासेनाभिवर्धितत्वात्, परं तद्द्वादशभागप्रमाणो मासोऽप्यवयवं समुदायोपचारादभिवर्धितः। तदेवमुक्ता नामतो नक्षत्रादयः पञ्चापि मासाः॥८९७॥

साम्प्रतमेतेषामेव मासानां दिनपरिमाणमाह— 'अहरत्ते' गाहा, 'उउ' गाहा, 'भागा' गाहा, नाक्षत्रो-नक्षत्रसम्बन्धी मासः सप्तविंशतिरहोरात्राः एकस्य चाहोरात्रस्य सप्तषष्टिर्भागास्त्रिः सप्त-एकविंशतिरित्यर्थः। तथा चान्द्रः— चन्द्रमासः एकोनत्रिंशदहोरात्रा द्वाषष्टिभागाश्च अहोरात्रस्य द्वात्रिंशत्। तथा ऋतुमासः परिपूर्णानि त्रिंशद्दिनानि। तथा आदित्यः— आदित्यमासो भवति त्रिंशदहोरात्रा अर्ध चाहोरात्रस्य। तथा अभिवर्धितमासो दिनानामेकेनाधिका त्रिंशत्, एकत्रिंशदहोरात्रा इत्यर्थः, एकस्य चाहोरात्रस्य चतुर्विंशत्युत्तरशतरूपेण छेदेन भागेन विभक्तस्य एकविंशत्यधिकं शतं भागानां भवतीति। एते पञ्चापि मासा यथा निष्पत्तिं लभन्ते तथा 'समयात्' सिद्धान्ताद् 'ज्ञेयम्' ज्ञातव्यमिति॥ स च निष्पत्तिप्रकारः सिद्धान्तानुसारेण विनेयजनानुग्रहाय किञ्चिद् दर्श्यते— इह किल चन्द्रचन्द्राभिवर्धितचन्द्राभवर्धितलक्षणसंवत्सरपञ्च कप्रमाणे युगे अहोरात्रराशिस्त्रिंशदधिकाष्टादशशतप्रमाणो भवति। कथमेतदवसीयते? इति चेदुच्यते— इह सूर्यस्य दक्षिणमुत्तरं वा अयनं त्र्यशीति अधिकदिनशतात्मकं युगे च पञ्च दक्षिणायनानि पञ्चोत्तरायणानीति सर्वसङ्ख्यया दशायनानि ततस्त्र्यशीत्यधिकं दिनशतं दशकेन गुण्यते इत्यागच्छति यथोक्तो दिनराशिः। एवंप्रमाणं दिनराशिं स्थापयित्वा नक्षत्रचन्द्रऋत्वादित्यमासानां दिनमानानयनाय यथाक्रमं सप्तषष्टिद्वाषष्ट्येकषष्टिषष्टिलक्षणैर्भागहारैर्भागं हरेत्, ततो यथोक्तं नक्षत्रादिमासगतदिनपरिमाणमागच्छति। तथाहि— युगदिनराशिस्त्रिंशदधि काष्टादशशतप्रमाणो ध्रियते। तस्य सप्तषष्टिर्युगे नक्षत्रमासा इति सप्तषष्ट्या भागो ह्रियते लब्धाः सप्तविंशतिरहोरात्राः, एकविंशतिरहोरात्रस्य सप्तषष्टिभागाः, एष नक्षत्रमासः। तथा तस्यैव युगदिनराशेस्त्रिंशदधिकाष्टादशशतमानस्य युगे चन्द्रमासा द्वाषष्टिरिति द्वाषष्ट्या भागे हृते यल्लभ्यते तच्चन्द्रमाससमानम्। तथास्यैव युगदिनराशैरेकषष्टिर्युगे ऋतुमासाः, इत्येकषष्ट्या भागहरणे लब्धं यथोक्तमृतुमाससमानम्। तथा युगे सूर्यमासाः षष्टिरिति षष्ट्या ध्रुवराशेर्भागहारे यल्लब्धमेतत्सूर्यमासपरिमाणम्, उक्तं च—

रिक्खाईमासाणं करणमिणमं तु आणणोवाओ। जुगदिणरासिं ठाविय अट्ठार सयाइं तीसाइं॥१॥

ताहे हराहि भायं रिक्खाईयाण दिणकरंताणं। सत्तट्ठीबावट्ठीएगट्ठीसट्ठिभागेहिं॥२॥" [व्य. भा. उ.१, गा.१६-१७]

तथा यस्मिन् वर्षे अभिवर्धितरूपे तृतीये पञ्चमे वा त्रयोदश शशिमासा भवन्ति तद्वर्षं द्वादशभागीक्रियते तत एकैको भागोऽभिवर्धितमास इत्युच्यते। इह किलाभिवर्धितसंवत्सरस्य त्रयोदशचन्द्रमाससमानस्य दिनपरिमाणं त्र्यशीत्यधिकानि त्रीणि शतानि चतुश्चत्वारिंशच्च द्वाषष्टिभागा रात्रिन्दिवस्य ३८३ ४४/६२ तथाहि— एकस्मिन् चन्द्रमासे एकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागाः। मासाश्च त्रयोदश इति तानि दिनानि तदंशाश्च त्रयोदशभिर्गुण्यन्ते जातानि सप्तसप्तत्युत्तराणि दिनानां त्रीणि शतानि, अंशानां च षोडशाधिकानि चत्वारि शतानि। ते च दिनस्य द्वाषष्टिभागाः। ततो दिनानयनाय द्वाषष्ट्या भागो ह्रियते लब्धानि षट् दिनानि। तानि च पूर्वोक्तदिनेषु मील्यन्ते। ततो जातानि त्रीणि शतानि त्र्यशीत्यधिकानि दिनानां चतुश्चत्वारिंशच्च द्वाषष्टिभागाः। तत ' वर्षे मासा द्वादश' इति मासानयनाय द्वादशभिर्भागो ह्रियते, लब्धा

| | | | | | |
|---|---|---|---|---|---|
| २९ | ३० | २७ | ३१ | ३० | दिनसङ्ख्या. |
| ३२ | ३१ | २१ | १२१ | ० | भागाः |
| ६२ | ६२ | ६७ | १२४ | ० | भागकरणाङ्काः |
| चन्द्रमास. ६२ | सूर्यमास. ६० | नक्षत्रमास. ६७ | अभिवर्धितमास. २ | ऋतुमास. ६१ | पञ्चमासनाम. युगे मासानां सङ्ख्या. |
| ३५४ | ३५४ | ३८३ | ३५४ | ३८३ | दिनसङ्ख्या. |
| १२ | १२ | ४४ | १२ | ४४ | आगतभागसङ्ख्या. |
| ६२ | ६२ | ६२ | ६२ | ६२ | भागकरणाङ्काः |
| चन्द्रसंवत्सरः | चन्द्रसंवत्सरः | अभिवर्धित-संवत्सरः | चन्द्रसंवत्सरः | अभिवर्धित-संवत्सरः | पञ्चवर्षैरेको युगः तत्र. |
| मास १२ | मास १२ | मास १३ | मास १२ | मास १३ | दिन १८३० |

किञ्च सर्वबाह्यमण्डलस्थस्य पुष्यस्य भोगः सूर्याचन्द्रमसोः सर्वाभ्यन्तरमण्डलस्थयोः स्यात्। तथा सर्वाभ्यन्तरमण्डलस्थिताभिजिद्भोगः सर्वबाह्ये मण्डले तयोः स्यादित्यत्रायनापेक्षो भोगो, न तु मण्डलैकत्वं कारणम्। स्थानाङ्गे नवमाध्ययनप्रान्तेऽपि—

---

एकत्रिंशदहोरात्राः, शेषास्तिष्ठन्त्यहोरात्रा एकादश। ते च चतुर्विंशत्युत्तरशतभागकरणार्थं चतुर्विंशत्युत्तरशतेन गुण्यन्ते। जातानि त्रयोदश शतानि चतुष्षष्ट्यधिकानि, येऽपि च उपरितनाश्चतुश्चत्वारिंशद्द्वाषष्टिभागास्तेऽपि चतुर्विंशत्युत्तरशतभागकरणार्थं द्वाभ्यां गुण्यन्ते जाता अष्टाशीतिः, सानन्तरभागराशौ प्रक्षिप्यते, जातानि च चतुर्दश शतानि द्विपञ्चाशदधिकानि, तेषां द्वादशभिर्भागे हृते लब्धमेकविंशत्युत्तरं शतं चतुर्विंशत्युत्तरशतभागानाम्, एतावदभिवर्धितमासप्रमाणम् ३१/१२१/१२८। उक्तं च—

"जम्मि वरिसम्मि तेरस ससिणो मासा हवंति सो वरिसो। बारसभाए कज्जइ अभिवड्ढियमास सो भागो॥१॥" त्ति॥८९८-९००॥ द्वा.१४१॥

सम्प्रति वरिसाण पंच भेय' त्ति द्विचत्वारिंशदधिकशततमं द्वारमाह—

संवच्छरा उ पंच उ चंदे चंदेऽभिवड्ढिए चेव। चंदेऽभिवड्ढिए तह बिसट्ठिमासेहिं जुगमाणं॥९०१॥

'संवच्छराउ' गाहा, चान्द्रश्चान्द्रोऽभिवर्धितः चान्द्रोऽभिवर्धितश्चेत्येवं क्रमेण पञ्च संवत्सरा भवन्ति। एते च पञ्चाप्यनेन क्रमेण भवन्तो मिलित्वा एकं युगं निष्पादयन्तीति युगसंवत्सरा इत्युच्यन्ते। तत्र पूर्वोक्तस्वरूपचन्द्रमासनिष्पन्नत्वात्संवत्सरोऽपि चान्द्रः। यस्य च प्रमाणं त्रीणि शतानि चतुष्पञ्चाशदुत्तराणि दिनानां द्वादश च द्वाषष्टिभागाः ३५४,१२/६२। तथाहि— एकोनत्रिंशद्दिनानि द्वाषष्टिभागीकृतस्याहोरात्रस्य च द्वात्रिंशदंशाश्चन्द्रमासः २६, ३२/६२ स च द्वादशभिर्गुण्यते ततो यथोक्तं चन्द्रसंवत्सरप्रमाणं भवति। एवं द्वितीयचतुर्थावपि संवत्सराविति। तथा चन्द्रसंवत्सरादेकेन मासेनाभिवर्धितत्वादभिवर्धितसंवत्सरः। तस्य च प्रमाणं त्रीणि शतानि अह्नां त्र्यशीत्यधिकानि चतुश्चत्वारिंशच्च द्वाषष्टिभागाः ३८३,४४/६२ तथाहि— एकत्रिंशदहोरात्राश्चतुर्विंशत्युत्तरशतभागानां चैकविंशं शतमभिवर्धितमासप्रमाणम्। तत्रैकत्रिंशद्दिनानि द्वादशभिर्गुण्यन्ते जातानि द्वासप्तत्युत्तराणि त्रीणि शतानि। यच्चैकविंशत्यधिकं भागशतं तदपि द्वादशभिर्गुण्यते जातानि द्विपञ्चाशदधिकानि चतुर्दश शतानि। तेषां च चतुर्विंशत्यधिकशतेन भागहरणे लब्धान्येकादश दिनानि तानि च पूर्वोक्तदिनेषु प्रक्षिप्यन्ते। भवन्ति च त्रीणि शतानि त्र्यशीत्यधिकानि। शेषस्य चाष्टाशीतिरूपभाज्यराशेश्चतुर्विंशत्युत्तरशतरूपभाजकराशेश्च यथोक्तभागानयनाय द्विकेनापवर्तना क्रियते। लब्धाश्चतुश्चत्वारिंशत् द्वाषष्टिभागाः, एषोऽभिवर्धितसंवत्सरः। एवं पञ्चमोऽपि। एभिश्चान्द्रादिभिः पञ्चभिः संवत्सरैरेकं युगं भवति। तच्च द्विषष्टिचन्द्रमासप्रमाणम्। तथा हि— युगे त्रयश्चन्द्रसंवत्सराः, एकैकस्मिंश्च चन्द्रसंवत्सरे द्वादश चन्द्रमासाः, ततस्त्रयो द्वादशभिर्गुण्यन्ते जाताः षट्त्रिंशत्, अभिवर्धितसंवत्सरौ च युगे द्वावेव एकैकस्मिंश्चाभिवर्धितसंवत्सरे त्रयोदश चन्द्रमासाः, अधिकमासकस्य तत्र सद्भावात्, ततो द्वौ त्रयोदशभिर्गुण्येते जाताः षड्विंशतिः, उभयमीलने च द्वाषष्टिश्चन्द्रमासा इति॥९०१॥ द्वा.१४२॥ द्रष्टव्यं प्र.सा.भाग २ पत्र १३८ द्वार १४१-१४२ गा.८९७-९०१

*अभिई सवण धणिट्ठा, रेवइ असिणी मिगसिरं पूसो।*
*हत्थो चित्ता य तहा, पच्छं भागा णव हवंति*[१] *॥*

**[स्थाना. अ.९, सू.६९४, गा.१४९]**

एतद्वृत्तिः—***पच्छं भाग त्ति पश्चाद्भागश्चन्द्रेण भोगो येषां तानि पश्चाद्भागानि, चन्द्रोऽतिक्रम्य यानि भुङ्क्ते पृष्ठं दत्त्वेत्यर्थः इत्यादि दृश्यम्॥७९॥*** **[स्थाना.वृ. अ.९, सू.६९४]**

**[नक्षत्रतारकयोः स्वरूपम्]**

चन्द्रसूर्ययोर्मण्डलादिस्वरूपं प्रकाश्याथ नक्षत्रतारकयोः स्वरूपमाह—

**[मूल] अट्ठेव मंडलाइं, णक्खत्ताणं जिणेहिं भणिआइं।**
**दो मंडलाइं दीवे, मंडलछक्कं च लवणम्मि॥८०॥**

**[वृत्ति] अट्ठे०।** अष्टावेव मण्डलानि नक्षत्राणां जिनेन्द्रैर्भणितानि। तत्र द्वे मण्डले जम्बूद्वीपे, मण्डलषट्कं च लवणोदे। यच्चन्द्रमसः सर्वाभ्यन्तरमण्डलं तन्नक्षत्राणामपि सर्वाभ्यन्तरं मण्डलम्, यच्चन्द्रमसः सर्वबाह्यं मण्डलं तन्नक्षत्राणाम् अपि सर्वबाह्यं मण्डलम्। यदुक्तं जम्बूद्वीप्रज्ञप्त्याम्—

***जम्बुद्दीवे दीवे णं भंते! केवइअं ओगाहेत्ता नक्खत्तमंडला, पण्णत्ता? गोअमा! जंबुद्दीवे दीवे असीइसयं ओगाहेत्ता एत्थ णं दो नक्खत्तमंडला, लवणसमुद्दे वि तिन्नि तीसे जोअणसए ओगाहेत्ता एत्थ णं छ नक्खत्तमण्डला पन्नत्ता। सव्वब्भंतराओ णं णक्खत्तमंडलाओ केवइए अबाहाए सव्वबाहिरए णक्खत्तमंडले पन्नते? गोअमा! पंचदसुत्तरजोअणसए अबाहाए णक्खत्तमंडले पन्नत्ते[२] इति ॥८०॥*** **[जम्बूद्वीपप्र.वक्षस्कार ७, सू.१८२]**

---

१ महापद्मजिनो हि महावीरवदुत्तरफाल्गुनीनक्षत्रजन्मादिव्यतिकर इति नक्षत्रसम्बन्धान्नक्षत्रसूत्रं कण्ठ्यं च, नवरं पच्छंभाग त्ति पश्चाद्भागश्चन्द्रेण भोगो येषां तानि पश्चाद्भागानि चन्द्रोऽतिक्रम्य यानि भुङ्क्ते, पृष्ठं दत्त्वेत्यर्थः, अभिई गाहा, अस्सोइ त्ति अश्विनी, मतान्तरं पुनरेवम्—

अस्सिणि भरणी समणो अणुराह धणिट्ठ रेवई पूसो। मियसिर हत्थो चित्ता पच्छिमजोगा मुणेयव्वा॥ इति।

२ 'कइ णं भन्ते!' इत्यादि, कति भदन्त! नक्षत्रमण्डलानि प्रज्ञप्तानि?, गौतम! अष्ट नक्षत्रमण्डलानि प्रज्ञप्तानि, अष्टाविंशतेरपि नक्षत्राणां प्रतिनियतस्वस्वमण्डलेष्वेतावत्स्वेव सञ्चरणात्, यथा चैतेषु सञ्चरणं तथा निरूपयिष्यति, एतदेव क्षेत्रविभागेन प्रश्नयति— जम्बूद्वीपे द्वीपे कियत्क्षेत्रमवगाह्य कियन्ति नक्षत्रमण्डलानि प्रज्ञप्तानि?, गौतम! जम्बूद्वीपे द्वीपे अशीतमशीत्यधिकं योजनशतमवगाह्यात्रान्तरे द्वे नक्षत्रमण्डले प्रज्ञप्ते, लवणसमुद्रे कियदवगाह्य कियन्ति नक्षत्रमण्डलानि प्रज्ञप्तानि?, गौतम! लवणसमुद्रे त्रीणि त्रिंशदधिकानि योजनशतान्यवगाह्यात्रान्तरे षट् नक्षत्रमण्डलानि प्रज्ञप्तानि, अत्रोपसंहारवाक्येनोक्तसङ्ख्यां मीलयति— एवमेव सपूर्वापरेण जम्बूद्वीपे द्वीपे लवणसमुद्रे चाष्टौ नक्षत्रमण्डलानि भवन्ति इत्याख्यातम्, मकारोऽत्रागमिकः। अथ मण्डलचारक्षेत्रप्ररूपणा— 'सव्वब्भन्तरा' इत्यादि, सर्वाभ्यन्तराद् भदन्त! नक्षत्रमण्डलात् कियत्या अबाधया सर्वबाह्यं नक्षत्रमण्डलं प्रज्ञप्तम्?, गौतम! पञ्चदशोत्तराणि योजनशतान्यबाधया सर्वबाह्यं नक्षत्रमण्डलं प्रज्ञप्तम्, इदं च सूत्रं नक्षत्रजात्यापेक्षया बोद्धव्यम्, अन्यथा सर्वाभ्यन्तरमण्डलस्थायिनामभिजिदादिद्वादशनक्षत्राणामवस्थितमण्डलकत्वेन सर्वबाह्यमण्डलस्यैवाभावात्, तेनायमर्थः सम्पन्नः— सर्वाभ्यन्तरनक्षत्रमण्डलजातीयात् सर्वबाह्यं नक्षत्रमण्डलजातीयं इयत्या अबाधया प्रज्ञप्तमिति बोध्यम्।

### [मण्डलेषु नक्षत्राणि]

अथ केषु मण्डलेषु नक्षत्राणि सन्ति? इति गाथापञ्चकेनाह—

**[मूल] अभिइ सवण धणिट्ठा, सयभिस पुव्वुत्तरा य भद्दवया।**
**रेवइ अस्सिणि भरणी, पुव्वुत्तरफग्गुणीओ अ॥८१॥**
**तह साई बारसमा, अब्भंतरए उ मंडले ससिणो।**
**तइए पुणव्वसु मघा, छट्ठे पुण कत्तिआ एक्का॥८२॥**
**रोहिणि चित्त सत्तमि, विसाहिया होइ अट्ठमे एगा।**
**दसमे पुण अणुराहा, एगारसमे पुणो जेट्ठा॥८३॥**
**मिगसिर अद्दा पुस्सो, अस्सेसा तह य हत्थमूलाणि।**
**पुव्वुत्तरसड्ढाओ, इमाणि अड हुंति पनरसमे॥८४॥**

**[वृत्ति] अभि०।** अभिजित् श्रवण धनिष्ठा शतभिषक् पूर्वभद्रपदा उत्तरभद्रपदा रेवती अश्विनी भरणी पूर्वाफाल्गुनी उत्तराफाल्गुनी॥

**तह०।** तथा स्वातिर्द्वादश, एतानि द्वादश नक्षत्राणि चन्द्रस्य सर्वाभ्यन्तरे मण्डले सन्ति, इदं नक्षत्रमण्डलं प्रथमं सर्वाभ्यन्तरम् (१)। तृतीये चन्द्रमण्डले पुनर्वसु मघा द्वे नक्षत्रे, द्वितीयं नक्षत्रमण्डलम्। षष्ठे चन्द्रमण्डले एका कृत्तिका, तृतीयं नक्षत्रमण्डलमेतत्॥

**रोहि०।** सर्वाभ्यन्तरात्सप्तमे चन्द्रमण्डले रोहिणी चित्रे द्वे, नक्षत्रमण्डलं चतुर्थम्। सर्वाभ्यन्तरादष्टमे चन्द्रमण्डले एका विशाखा, नक्षत्रमण्डलं पञ्चमम्। सर्वाभ्यन्तरान्मण्डलात्पुनर्दशमेऽनुराधा, नक्षत्रमण्डलं षष्ठम्। एकादशे चन्द्रमण्डले ज्येष्ठा, नक्षत्रमण्डलं सप्तमम्॥

**मिग०।** मृगशीर्ष आर्द्रा पुष्य अश्लेषा हस्त मूल पूर्वाषाढा उत्तराषाढा एतान्यष्टौ नक्षत्राणि सर्वबाह्ये पञ्चदशे चन्द्रमण्डले सन्ति, नक्षत्रमण्डलमष्टमम्॥८१॥८२॥८३॥८४॥

अथ येषु चन्द्रमण्डलेषु नक्षत्राणि न सन्ति तान्याह—

**[मूल] सेसेसु मंडलेसुं, सत्तसु ससिणो न हुंति रिक्खाणि।**
**अट्ठसु हवंति ताणं, अट्ठेव य मंडलाणि तओ॥८५॥**

**[वृत्ति] सेसे०।** शेषेषु द्वितीयचतुर्थपञ्चमनवमद्वादशत्रयोदशचतुर्दशसञ्ज्ञेषु सप्तसु चन्द्रमण्डलेषु नक्षत्राणि न सन्ति। पूर्वोक्तेष्वष्टसु चन्द्रमण्डलेषु नक्षत्राणि सन्ति, ततः तस्मात्कारणात् तेषामष्टावेव मण्डलानि भवन्ति॥८५॥

### [नक्षत्रमण्डलानाम् अवस्थितत्वम्]

अथ नक्षत्रमण्डलानामवस्थितत्वमाह—

**[मूल] रिक्खाणि मंडले जम्मि जाणि वुत्ताणि ताणि तत्थेव।**
**निच्चं चरंति चंदाईणं भोगं तह उ बिंति॥८६॥**

**[वृत्ति] रिक्खा०।** यानि नक्षत्राणि यस्मिन्मण्डले उक्तानि तानि तत्रैव नित्यम् आकालं चरन्ति, तत्तन्निजं निजं मण्डलं त्यक्त्वा नान्यत्र मण्डले गच्छन्ति। चन्द्रादीनामुपभोग्यानि, आदिशब्दात्सूर्यग्रहाणां ग्रहः। अष्टाविंशतिनक्षत्राणां मध्ये द्वादश नक्षत्राणि सर्वाभ्यन्तरमण्डलस्थानि चन्द्रस्योत्तरेणोत्तरस्यां दिशि व्यवस्थितानि सदा योगं युञ्जन्ति। योगः किम्? उच्यते, नक्षत्रसीमावर्तिना चन्द्रेण सह नक्षत्राणां सम्बन्धो योगः। अष्टौ नक्षत्राणि सर्वबाह्यमण्डलस्थानि चन्द्रस्य दक्षिणस्यां दिशि व्यवस्थितानि सदा योगं युञ्जन्ति। सर्वाभ्यन्तरसर्वबाह्ये नक्षत्रमण्डले त्यक्त्वा शेषाणि षण्मध्यमण्डलस्थान्यष्टौ नक्षत्राणि कदाचिदुत्तरयोगीनि कदाचिद्दक्षिणयोगीनि कदाचित्प्रमर्दयोगीन्यपि। प्रमर्दमिति कोऽर्थः? तेषां नक्षत्राणां मध्येन भूत्वा चन्द्रो व्रजति गच्छतीति समवायाङ्गे[१] प्रोक्तम्॥८६॥

## [नक्षत्राणां चन्द्रेण सह कालयोगः]

अथ किं नक्षत्रं कति मुहूर्तानि चन्द्रेण सह चरति? तत्र प्रथममभिजिन्नक्षत्रमाह—

**[मूल] अभिइस्स चंदजोगो, सत्तट्ठीखंडिओ अहोरत्तो।**
**ते हुंति नव मुहुत्ता, सत्तावीसं कलाओ अ॥८७॥**

**[वृत्ति] अभिइस्स०।** अभिजिन्नक्षत्रस्य चन्द्रेण सह योगः सप्तषष्ठिभागीकृतमहोरात्रगम्य-क्षेत्रं तस्यैकविंशतिर्भागाः क्षेत्रतः, कालतो नव मुहूर्ता एकस्य मुहूर्तस्य च सप्तविंशतिः सप्तषष्ठिभागाः। तथाहि— सर्वेषामपि नक्षत्राणां सीमाविष्कम्भतः पूर्वापरतश्चन्द्रस्य नक्षत्रभुक्तिक्षेत्रविस्तारो नक्षत्रेणाहोरात्रगम्यक्षेत्रस्य सप्तषष्ट्या भागैः भाजितो विभक्तः समच्छेदः प्रज्ञप्तः। भागान्तरेण तु भज्यमानस्य नक्षत्रसीमाविष्कम्भस्य विषमच्छेदता भवति, भागान्तरेण भागान्तरेण न वक्तुं शक्यत इत्यर्थः। ततो नक्षत्रेणाहोरात्रगम्यक्षेत्रस्य सप्तषष्टिभागीकृतस्य एकविंशतिर्भागा अभिजिन्नक्षत्रस्य क्षेत्रतः सीमाविष्कम्भो भवति, एतावति क्षेत्रे चन्द्रेण सह तस्य योगो व्यपदिश्यते। तदनु श्रवणेन सह योगः, शीघ्रगामित्वेनाभिजितोऽग्रे गमनात्। तथास्यामेवैकविंशतौ त्रिंशन्मुहूर्तत्वाद् अहोरात्रस्य त्रिंशता गुणितायां जातानि षट् शतानि त्रिंशदधिकानि ६३०, तेषां सप्तषष्ट्या भागहारे नव मुहूर्ताः सप्तविंशतिश्च सप्तषष्ठिभागाः ९ २७/६७॥८७॥

## [पञ्चदशमुहूर्तानि नक्षत्राणि]

अथ पञ्चदशमुहूर्तयोगीनि षण्नक्षत्राण्याह—

---

१ तथा अष्टौ नक्षत्राणि चन्द्रेण सार्धं प्रमर्दं 'चन्द्र मध्येन तेषां गच्छति' इत्येवंलक्षणं योगं सम्बन्धं योजयन्ति कुर्वन्ति, अत्रार्थेऽभिहितं लोकाश्रियाम्—
पुणव्वसु रोहिणी चित्ता मह जेट्ठणुराह कित्तिय विसाहा। चंदस्स उभयजोग [लोकश्री] त्ति। यानि च दक्षिणोत्तरयोगीनि तानि प्रमर्दयोगीन्यपि कदाचिद् भवन्ति, यतो लोकश्रीटीकाकृतोक्तम्— एतानि नक्षत्राण्युभययोगीनि चन्द्रस्योत्तरेण दक्षिणेन च युज्यन्ते, कदाचिच्चन्द्रेण भेदमप्युपयान्ति [लोकश्रीटीका] इति। [सम.अ.८, सू.२]

**[मूल] सयभिसया भरणीओ, अद्दा अस्सेस साइ जिट्ठा य।**
**एए छन्नक्खत्ता, पन्नरसमुहुत्तसंजोगा॥८८॥**

**[वृत्ति] सय०।** शतभिषक् भरणी आर्द्रा अश्लेषा स्वातिः ज्येष्ठा चैतानि षट् नक्षत्राणि प्रत्येकं चन्द्रेण सह पञ्चदशमुहूर्तसंयोगीनि। तथाहि—एतेषां नक्षत्राणां प्रत्येकं सप्तषष्टिखण्डीकृतस्याहोरात्रस्य सार्धस्त्रयस्त्रिंशद्भागान् ३३.६७ १/२ यावच्चन्द्रेण सह योगः। ततः कालमानाय मुहूर्तभागकरणार्थं त्रयस्त्रिंशत्त्रिंशता गुण्यते जातम् ९९०, अर्धस्त्रिंशद्गुणितः पञ्चदश भवन्ति, तेषां पञ्चदशानां क्षेपे जातं पञ्चोत्तरं सहस्रम् १००५, एतस्य सप्तषष्ठ्या भागहरणे लब्धाः पञ्चदश मुहूर्ताः १५, तदेषां कालसीमा॥८८॥

**[पञ्चचत्वारिंशन्मुहूर्तानि नक्षत्राणि]**

अथ पञ्चचत्वारिंशन्मुहूर्तयोगीनि षण्णक्षत्राण्याह—

**[मूल] तिन्नेव उत्तराइं, पुणव्वसू रोहिणी विसाहा य।**
**एए छन्नक्खत्ता, पणयालमुहुत्तसंजोगा॥८९॥**

**[वृत्ति] तिन्ने०।** तिस्र उत्तरा उत्तराफाल्गुन्यः उत्तराषाढाः उत्तराभद्रपदाश्च पुनर्वसुः रोहिणी विशाखा एतानि षण्णक्षत्राणि प्रत्येकं चन्द्रेण सह पञ्चचत्वारिंशन्मुहूर्तसंयोगीनि भवन्ति। तथाहि—एतेषां सप्तषष्टिखण्डीकृतस्य अहोरात्रस्य सम्बन्धिनां भागानां शतमेकमेकभागस्यार्धं क्षेत्रसीमायोगः। तत्रैषां भागानां मूहूर्तगतकरणार्थं भागशतं भागस्यैकस्यार्धम् १००/६७ १/२ त्रिंशता गुण्यते जातानि पञ्चदशोत्तराणि त्रीणि सहस्राणि ३०१५, एतेषां सप्तषष्ठ्या भागहारे लब्धाः पञ्चचत्वारिंशन्मुहूर्ताः, तदेषां कालसीमा॥८९॥

**[त्रिंशन्मुहूर्तानि नक्षत्राणि]**

अथ त्रिंशन्मुहूर्तचन्द्रयोगीनि पञ्चदशनक्षत्राण्याह—

**[मूल] अवसेसा नक्खत्ता, पन्नरस हवंति तीसइ मुहूत्ता।**
**चंदम्मि एस जोगो, णक्खत्ताणं मुणेयव्वो॥९०॥**

**[वृत्ति] अव०।** अवशेषाणि उक्तत्रयोदशव्यतिरिक्तानि श्रवण धनिष्ठा पूर्वभद्रपदा रेवती अश्विनी कृत्तिका मृगशिरः पुष्य मघा पूर्वफाल्गुन्यः हस्त चित्रा अनुराधा मूल पूर्वाषाढा एतन्नामानि पञ्चदशापि नक्षत्राणि चन्द्रेण सह प्रत्येकं त्रिंशन्मुहूर्तसंयोगीनि भवन्ति। तथाहि—एतेषां नक्षत्राणां प्रत्येकं परिपूर्णानां सप्तषष्ठिभागानां क्षेत्रसीमाविष्कम्भः, ते च त्रिंशद्गुणिता जाते द्वे सहस्रे दशोत्तरे, ते च सप्तषष्ठ्या भागे हृते लब्धास्त्रिंशदेव, तदेषां त्रिंशन्मुहूर्ताः कालसीमाप्रमाणम्। सूर्यस्यापि नक्षत्रयोगो गाथाभिरिमाभिर्ज्ञेयः-

***अभिइ छच्च मुहूत्ते, चत्तारि अ केवले अहोरत्ते। सूरेण समं ग[1]च्छइ, इत्तो[2] सेसाण वुच्छामि॥***

---

१ व इति मु.

२ एत्तो इति मु.

*सयभिसया भरणीओ, अद्दा[1] साइ जिट्ठा य। वच्चंति मुहूत्तेकवीसइ छ च्चेव अहोरत्तो[2]॥*
*तिन्नेव उत्तराइं, पुणव्वसू रोहिणी विसाहा य। वच्चंति मुहुत्ततिगे[3], चेव वीसं अहोरत्ते॥*
*अवसेसा णक्खत्ता, पन्नरस[4] सूरसहगया जंति। बारस चेव मुहुत्ते, तेरस पुण्णे[5] अहोरत्ते॥[6]॥९०॥*

**[ज्योति. १०५-१०८]**

**[नक्षत्रपटले ऊर्ध्वाधोमध्यविभागः]**

अथ नक्षत्रपटले सर्वमध्ये किम्, उपरि किम्, अधश्च किं नक्षत्रम्? इत्याह—

**[मूल] सव्वब्भंतर अभिई, मूलं पुण सव्वबाहिरे होई।**
**सव्वोवरिं तु साई, भरणी सव्वस्स हिट्ठिम्मि॥९१॥**

**[वृत्ति] सव्व०।** उत्तरस्यां दिशि जगतीतोऽशीत्यधिकशते सर्वाभ्यन्तरे मण्डलेऽभिजिन्नक्षत्रम्। पुनः सर्वबाह्ये मण्डले दक्षिणस्यां दिशि मूलं सदाप्यवस्थितं चरति, तत्र मण्डलेऽष्टौ नक्षत्राणि सन्ति, परं चन्द्रमण्डलं षट्पञ्चाशदेकषष्टिभागप्रमाणम्, नक्षत्रविमानं तु कोशमेकमेव, ततो मण्डलविष्कम्भप्रान्ते मूलम्, शेषाणि तन्मण्डलस्थान्यपि किञ्चदर्वाक् सम्भाव्यन्ते। एवमभिजिदपि द्वादशसु सर्वाभ्यन्तरे ज्ञेयम्। ऊर्ध्वाधश्च चतुर्योजने नक्षत्रपटले सर्वेषां नक्षत्राणामुपरि स्वातिनक्षत्रम्, सर्वेभ्योऽपि नक्षत्रेभ्योऽधस्तनं भरणी चरति॥९१॥

१ **अस्सेस** इत्यधिकम् मु.
२ **छऽहोरत्ते एक्कावीसं मुहुत्ते य** इति मु.
३ **मुहुत्ते तिन्नि** इति मु.
४ **वि** इत्यधिकम् मु.
५ **य समे** इति मु.
६ अभिजिन्नक्षत्रं सूर्येण समं व्रजति चतुरः 'केवलान्' परिपूर्णान् अहोरात्रान्, षट् च मुहूर्तान् यावत् कथमेतदवसीयते? इति चेदुच्यते— इह पूर्वाचार्यप्रदर्शितमेतद्विषयमिदं करणम्— 'जं रिक्ख' मित्यादि, यन्नक्षत्रं यावतः सप्तषष्टिभागान् चन्द्रेण समं व्रजति तन्नक्षत्रमहोरात्रस्य सत्कान् तावतः पञ्च भागान् सूर्येण समं व्रजति, तत्राभिजिदेकविंशतिं सप्तषष्टिभागान् चन्द्रेण समं वर्तते, तत एतावतः पञ्च भागानहोरात्रस्य सूर्येण समं वर्तनमवसेयम्, एकविंशतेश्च पञ्चभिर्भागे हृते लब्धाश्चत्वारोऽहोरात्राः, एकः पञ्चभागोऽवतिष्ठते, स त्रिंशतामपि नक्षत्राणां सूर्येण समं योगान् कालपरिणाममधिकृत्य वक्ष्यामि॥१६१-१६२॥ प्रतिज्ञातमेव निर्वाहयति शतभिषग् भरण्यार्द्रा अश्लेषा स्वातिः जेष्ठा चेत्येतानि षड् नक्षत्राणि प्रत्येकं सूर्येण समं व्रजन्ति षडेवाहोरात्रानेकविंशतिं च मुहूर्तान्, तथाहि— एतानि नक्षत्राणि चन्द्रेण समं सार्धान् त्रयस्त्रिंसत्सङ्ख्यान् सप्तषष्टिभागान् व्रजन्ति, तत एतावतः पञ्चभागान् अहोरात्रस्य सूर्येण समं व्रजन्तीति प्रत्येकम्, [सार्ध] त्रयस्त्रिशतश्च पञ्चभिर्भागे लब्धाः षडहोरात्राः पश्चादवतिष्ठन्ते सार्धास्त्रयः पञ्चभागाः, ते सवर्णनायां जाताः सप्त, ते त्रिंशता गुण्यन्ते, जाते द्वे शते दशोत्तरे २१०, तेषां परिपूर्णमुहूर्तानयनाय दशभिर्भागे हृते लब्धा एकविंशतिर्मुहूर्ताः॥१६३॥ तिस्र उत्तराः, तद्यथा— उत्तरभद्रपदा उत्तराफाल्गुनी उत्तराषाढा च, तथा पुनर्वसुः रोहिणी विशाखा च, प्रत्येकमेतानि षड् नक्षत्राणि सूर्येण समं व्रजन्ति त्रीनेव मुहूर्तान् विंशतिं चाहोरात्रान्, एतानि हि षडपि नक्षत्राणि चन्द्रेण समं सप्तषष्टिभागानां शतमेकस्य च भागस्यार्धं प्रत्येकं व्रजन्ति, तत एतावतः पञ्चभागानहोरात्रस्य सूर्येण समं व्रजनमवगन्तव्यम्, शतस्य च पञ्चभिर्भागे हृते लब्धा विंशतिरहोरात्राः, यदप्येकैकस्य पञ्चभागस्यार्धमुद्धरति तदपि त्रिंशता गुण्ये, जाता त्रिंशत्, तस्या दशभिर्भागे हृते लब्धास्त्रयो मुहूर्ता इति॥१६४॥ 'अवशेषाणि' श्रवणधनिष्ठाप्रभृतीनि नक्षत्राणि पञ्चदशापि सूर्येण सहगतानि यान्ति त्रयोदश समान्-परिपूर्णानहोरात्रान् द्वादश च मुहूर्तान् यावत्, तथाहि— अमूनि परिपूर्णान् सप्तषष्टिभागान् चन्द्रेण समं व्रजन्ति, ततः सूर्येण सहैतानि पञ्चभागानप्यहोरात्रस्य सप्तषष्टिसङ्ख्यान् गच्छन्ति, सप्तषष्टेश्च, पञ्चभिर्भागे हृते लब्धास्त्रयोदशाहोरात्राः, शेषौ च द्वौ भागौ तिष्ठतस्तौ त्रिंशता गुण्येते जाता षष्टिः, तस्याः पञ्चभिर्भागे हृते लब्धा द्वादश मुहूर्ता इति॥१६५॥

## [नक्षत्रतारकाणां मण्डलस्वरूपम्]

अथ तारकाणां स्वरूपमाह—

**[मूल] रिक्खाण व ताराण वि, मंडलगाइं अवट्ठियाइँ सया।**
**णेअव्वाइं णवरं, संपइ अपसिद्धसंखाइं॥९२॥**

**[वृत्ति] रिक्खा०।** नक्षत्राणामिव तारकाणामपि मण्डलानि सदाप्यवस्थितानि ज्ञातव्यानि, प्रतिनियते निजे निजे एव मण्डले सञ्चरणात्। न चैवमाशङ्कनीयमेषां गतिर्न, यतस्तेऽपि प्रदक्षिणया जम्बूद्वीपगतमेरुम् एकमेव अनुलक्षीकृत्य परिभ्रमन्ति, न च दक्षिणोत्तरगाः। ये दक्षिणचारिणो ये चोत्तरचारिणस्ते सर्वदा तथैव। तेषां मण्डलादिसङ्ख्या साम्प्रतीनशास्त्रे न दृश्यते॥९२॥

## [ज्योतिश्चक्रावस्थितिः]

अथ भूमितः कियदूर्ध्वं ज्योतिश्चक्रं तदाह—

**[मूल] समभूतला उ अट्ठहिं, दसूणजोअणसएहिं आरब्भ।**
**उवरि दसुत्तरजोअण, सयम्मि चिट्ठंति जोइसिया॥९३॥**

**[वृत्ति] सम०।** समात्—मेरुमध्यस्थिताष्टप्रदेशात्मकरुचकसमानाद् भूतलादष्टेभ्यो दशोनयोजनशतेभ्य आरभ्योपरि दशोत्तरे योजनशते (११०) ज्योतिष्कास्तिष्ठन्ति। तथाहि—

***शतानि सप्त गत्वोर्ध्वम्, योजनानां भुवस्तलात्। नवतिं स्थितास्ताराः, सर्वाधस्तान्नभस्तले॥***
***तारकापटलाद्गत्वा, योजनानां दशोत्तरे। सूर्याणां पटलं तस्मादशीतिं शीतरोचिषाम्॥***
***चत्वारि च ततो गत्वा, नक्षत्रपटलं स्थितम्। गत्वा ततोऽपि चत्वारि, बुधानां पटलं भवेत्॥***
***शुक्राणां च गुरूणां च, भौमानां मन्दसञ्ज्ञिनाम्।***
***त्रीणि त्रीणि च गत्वोर्ध्वम्, क्रमेण पटलं स्थितम्॥***

**[लोकप्रकाश सर्ग १५, श्लोक १९-२२]**

बहुत्वं चात्र सर्वद्वीपसमुद्रवर्तिज्योतिश्चक्रापेक्षं मन्तव्यम्। यन्त्रं चात्रावधार्यम्—

| ताराः | सूर्यः | चन्द्रः | नक्षत्रं | बुधः | शुक्रः | बृहस्पतिः | मङ्गलः | शनिः |
|---|---|---|---|---|---|---|---|---|
| यो. ७९० | ८०० | ८८० | ८८४ | ८८८ | ८९१ | ८९४ | ८९७ | ९०० |

अमीषामङ्कानां मीलने जातं दशोत्तरे ११० शतम्। इदं तूर्ध्वाधःप्रमाणम्॥९३॥

## [तिर्यक्तारकाणां प्रचारः]

अथ तिर्यक्तारकाणां प्रचारमाह—

**[मूल] इक्कारसजोअणसय, इगवीसिक्कारसाहिआ कमसो।**
**मेरुअलोगाबाहिं, जोइसचक्कं चरइ ठाइ॥९४॥**

**[वृत्ति] इक्कारस०।** एकादशयोजनशतानि एकविंशत्यधिकानि मेरोरबाधाम्—अन्तरं कृत्वा, एतावद्भिः योजनैः मेरुं दूरं विमुच्येत्यर्थः, चलं ज्योतिश्चक्रं मनुष्यलोके परिभ्रमति। तथैकादशयोजनशतानि एकादशाधिकानि अलोकाकाशस्याबाधयाचलं ज्योतिश्चक्रं तिष्ठति। शेषमेरुष्वपि सम्भावनेत्थमेव। इदं तु जम्बूद्वीपतारकापेक्षं चन्द्रसूर्यनक्षत्राणां तु जम्बूद्वीपमेरुतः ४४८२० योजनैः समन्ताद् दूरे परिभ्रमणम्, नैतेभ्यो योजनेभ्योऽर्वाक् कदाप्यागमनं भवति।

तारकाणां चान्तरं द्विधा, व्याघातजं निर्व्याघातजं च। एकैकं द्विधा उत्कृष्टं जघन्यं च। तत्रोत्कृष्टव्याघाते पर्वतादिस्खलने मेरुमपेक्ष्य भावनीयम्। यथा—मेरुर्दशसहस्रयोजनात्मकः, तस्य चोभयतोऽबाधया प्रत्येकमेक विंशत्यधिकान्येकादशशतानि ११२१, ततः सर्वमीलने योजनानां द्वादशसहस्रा द्वे च शते द्विचत्वारिंशदधिके १२२४२। जघन्यं तु निषधनीलवत्कूटाद्यपेक्षम्। यथा—निषधपर्वतः स्वतोऽप्युच्चैश्चत्वारि योजनशतानि, तस्य चोपरि पञ्चयोजनशतोच्चानि कूटानि, तान्यधश्चायामविष्कम्भाभ्यां पञ्चयोजनशतानि, मध्ये त्रीणि शतानि पञ्चसप्तत्यधिकानि ३७५, उपरि चार्धतृतयानि योजनशतानि २५०, एतेषां कूटानाम् उपरितनसमश्रेणिप्रदेशे तथा जगत्स्वाभाव्यादष्टौ योजनान्युभयतोऽबाधया कृत्वा ताराविमानानि परिभ्रमन्तीति जघन्यतो व्याघातजमन्तरं द्वे योजनशते षट्षष्ट्यधिके २६६। तथोत्कृष्टं तु निर्व्याघातजं कोशद्वयम्, जघन्यं पञ्चधनुःशतानि तारतारयोरन्तरम्। उक्तं हि सङ्ग्रहण्याम्—

***तारस्स य तारस्स य, जंबुद्दीवम्मि अंतरं गुरुअं। बारसजोयणसहसा, दोन्नि सया चेव बायाला[१]॥***
***छावट्ठा दो अ सया, जहन्नमेअं तु होइ वाघायए।***
***निव्वाघाए गुरुलहु, दो गाउ अ धणुसया पंच॥॥९४॥***

**[सङ्ग्र.सू. ४९,५०]**

१ साम्प्रतं जम्बूद्वीपे ताराविमानानां व्याघाते निर्व्याघाते च प्रत्येकमुत्कृष्टं जघन्यं चान्तरालप्रमाणं गाथाद्वयेनाह—

**तारस्स य तारस्स य, जम्बुद्दीवम्मि अंतरं गुरुअं। बारसजोयणसहसा, दोन्नि सया चेव बायाला॥**
**छावट्ठा दो अ सया, जहन्नमेअं तु होइ वाघायए। निव्वाघाए गुरुलहु, दो गाउ अ धणुसया पंच॥**

तत एतस्य राशेस्त्रिगुणे कृते इदम् ९४५२६. ४२/६० जातम्। एतस्मिन्नर्धे कृते एवं सम्पद्यते तच्च गाथयाह—

**[मूल] सीयालीससहस्सा, दो य सया जोयणाण तेवट्ठा।**

**इगवीससट्ठिभागा, कक्कडमाइम्मि पिच्छ नरा॥३५॥**

**[वृत्ति]** सप्तचत्वारिंशत्सहस्राणि त्रिषष्ट्यधिकशतद्वयम् एकविंशतिषष्टिभागाः ४७२६३. २१/६० कर्काद्यदिने नरा = मनुष्या इति पूर्वविदेहभरतपश्चिमविदेह ऐरवतादिषु लोकाः सूर्यम् उदयन्तमस्तमयं च एतावद्भूमितः पश्यन्ति॥३५॥

अथ सूर्यस्य पश्चादग्रे च कियत्तेजस्तदाह—

**[मूल] एयं चेव य दुगुणं, उभओ पासेसु ताव खित्तंतु।**

**एयं चेव य सव्वं, दट्ठव्वं बीयरविणो वि॥३६॥**

**[वृत्ति]** एतच्चैव पूर्वोक्तम् ४७२६३. २१/६० उभयोः पार्श्वयोरग्रतोऽप्येतत् पश्चादप्येतद् उभाभ्यां मेलने द्विगुणं भवति, यथा ९४५२६. ४२/६०। एतत्पूर्वोक्तं सर्वम् एकसूर्यापेक्षया तद्द्रष्टव्यं द्वितीयरवेः सर्वं तथैव प्रकारेण ॥३६॥

अथ शेषमनुष्यलोकस्थसर्वसूर्याणां वक्तव्यतामाह—

**[मूल] एवं सेसरवीण य, पयासरिवत्तं दसंसकप्पणया।**

**ता नेअं जा चरमो, पुक्खरदीवड्ढभाणु त्ति॥३७॥**

**[वृत्ति]** एवम् अमुना प्रकारेण जम्बूद्वीपोक्तरविन्यायेन शेषरवीणामपि प्रकाशक्षेत्रं तत्तद्द्वीपसमुद्रपरिधिचक्रवालविभजना सर्वत्र कर्तव्या। प्रकाशक्षेत्रं तु स्वस्वमण्डलपरिधिदशभागकल्पितं स्यात्। सार्धभागतेजःप्रसरो ह्येकैकपार्श्वे ज्ञेयः। सर्वाभ्यन्तरे मण्डले भागत्रयरूपं दिनं तापक्षेत्रं च। सर्वबाह्ये मण्डले तु भागद्वयं दिनं तापक्षेत्रं च सर्वेषां सूर्याणां जम्बूमेरुदिशि मध्यमण्डलं मानुषोत्तरदिशि बाह्यमण्डलम्। एवं तावत् ज्ञेयं यावत्पुष्करद्वीपार्धे चरमभानुरिति। एकैकपङ्क्तिगतषट्षष्ठितम इति॥३७॥

तत्र तेजःप्रसर एकैकपार्श्वे एवं भवतीत्याह—

**[मूल] लक्खिगवीसा चउतीससहससय पंचसत्ततीसरविं।**

**पुक्खरदीवड्ढनरा, पुव्वेण वरेण पासंति॥३८॥**

**[वृत्ति]** एकविंशतिर्लक्षाश्चतुस्त्रिंशत्सहस्राणि पञ्चशतानि सप्तत्रिंशच्च योजनानां साधिकानाम् २१३४५३७ तेजः प्रसरः। तेन पुष्करार्धलोका उदयमानं पूर्वेऽस्तमयन्तं च पश्चिमेऽन्तिमं सूर्यम् एतावद्भूमितः पश्यन्ति। एतदङ्कद्विगुणीकरणेन सर्वाभ्यन्तरमण्डलस्थस्य तस्य सूर्यस्य कर्के प्रथमदिनचारः। यथा ४२६९०७४ किञ्चित्साधिकः तदा च २८४६०४९. १/३ साधिको रात्रिभागोऽपि दिनरात्रिमेलने ७११५१२३. १/३। एकस्य सूर्यस्य यथायं तथा तत्पङ्क्तिगतद्वितीयसूर्यस्यापीत्थमेव। उभयोः सूर्ययोश्च मेलने तत्र परिधिः १४२३०२४६. २/३ साधिको भवति। अत्र साधिकत्वभागक्षेपेण पूर्णः परिधिर्मन्तव्यः। अत्रापि दशभागकरणेन आगतम् १४२३०२४. २/३ साधिको सर्वत्र परिधिदशभागीयभागत्रिकमेलनेन उत्कृष्टदिनभागो भवति।

परिधिदशभागीयभागद्विकमेलने च जघन्यदिनभागः।

एतेन पुष्करार्धे षट्त्रिंशत्सूर्याणां मध्यादन्तिमयोः सूर्ययोरेतत्पूर्वोक्तोत्कृष्टजघन्यसम्बन्धी करप्रसरः। यथा जम्बूद्वीपमध्यस्थयोः सूर्ययोः ४७२६३. २१/६० चैतत्प्रमाणः करप्रसरः। शेषाणां पङ्क्तिद्वयगतानां सूर्याणाम् एतदनुसारेण पूर्वपश्चिमयोः सर्वेषां जम्बूद्वीपापेक्षया बाह्ये बाह्येऽधिकोऽधिकः करप्रसरः यावदन्तिमयोः सूर्ययोः करप्रसरः २१३४५३७ योजनानि। नवरमत्राप्यनुक्तोऽयं विशेषः। यज्जम्बूद्वीपस्थयोः सूर्ययोरुत्तरदक्षिणे करप्रसरो भूयान्। ततोऽपि लवणाद्युपरिस्थानां सूर्याणां दक्षिणोत्तरयोः करप्रसरः स्तोकः स्तोकः, तेषां पूर्वपश्चिमयोश्च भूयान्। यतस्तत्र एकः सूर्यो लवणशिखासमीपेऽर्वाग् द्वितीयस्तत्समश्रेणिगतो लवणशिखायाः परतो दूरे। परं लवणजगती अर्वाक् तयोः पूर्वपश्चिमकरप्रसरापेक्षया जम्बूद्वीपाद्दक्षिणोत्तरयोः स्तोकः, क्षेत्रस्य परिधिबाहुल्यात्। एवं धातकीखण्डे द्वादशसूर्याणाम् एकैकपार्श्वगतपङ्क्तिद्वयषट्सूर्याणां दक्षिणोत्तरयोः स्तोकः स्तोकस्तेजः प्रसरः। पूर्वपश्चिमयोश्च भूयान्। चतुर्लक्षक्षेत्रे षट्सूर्यसम्भवात्। सर्वत्र यथा यथा दक्षिणोत्तरयोस्तेजः प्रसरो घटते तथा तथा पूर्वपश्चिमयोरतिबहुलो वर्धते।

एवं कालोदे एवं पुष्करार्धेऽपि। पुष्करार्धे षट्त्रिंशत्सूर्याणां विष्कम्भे समश्रेण्या परस्परमन्तरम् २२८५६. १३/६१ योजनानां ज्ञेयम्। यतः षट्त्रिंशत्सूर्याणामन्तराणि पञ्चत्रिंशत् तेनाष्टलक्षक्षेत्रं विभज्यते जातम् २२८५७ शेषं पञ्चकं स्थितम्। सूर्यबिम्बाष्टचत्वारिंशद्भागकर्षणे जातं पूर्वोक्तमन्तरं यच्च योजनपञ्चकं स्थितम्। तत एव प्रथमः सूर्यः सम्भाव्यत इति सर्वत्र द्वीपे समुद्रे वा क्षेत्रविष्कम्भसङ्ख्या सूर्यसङ्ख्यया योज्यम्। परं सर्वेषां सूर्याणां पञ्चशतदशोत्तरश्चारो ज्ञेयः। यो यो यत्र यत्र परिभ्रमति तदधोवासिनो लोकास्तमेव पश्यन्ति नान्यम्, व्यवस्थाभङ्गदोषप्रसङ्गात्। एवं चन्द्रमसामपि एवं ग्रहनक्षत्रतारकाणामपि भाव्यम्। निजनिजचन्द्रपरिकरतया परिभ्रमन्ति॥३८॥

अथ पुष्करार्धेऽन्तिमयोः सूर्ययोः सर्वाभ्यन्तरमण्डलपरिधिं सूत्रमध्ये गाथयाह—

**[मूल] एगा जोयणकोडीबायालीसं भवे सयसहस्सा।**

**तीसं चेव सहस्सा, दो चेव सया अउणवन्ना॥३९॥**

**[वृत्ति]** एका योजनकोटिर्द्विचत्वारिंशल्लक्षाः त्रिंशत्सहस्राणि द्वे शते एकोनपञ्चाशद्योजनानि १४२३०२४९ साधिकानि। अयं पुष्करार्धान्तिमसूर्ययोः सर्वाभ्यन्तरमण्डलपरिधिः मानुषोत्तरपर्वतसमीपे। मनुष्यलोकसम्बन्धी परिधिरप्ययमेव सोऽपि परिधिर्दशधा विभक्तो १४२३०२४. २/३ भागा जाता। जाता दशभागेभ्यस्त्रयो भागाः सर्वोत्कृष्टदिवसेऽष्टादशमुहूर्ते एकस्यान्तिमसूर्यस्य चारक्षेत्रम् ४२६९०७४, तदर्धं तेजः प्रसरः २१३४५३७, तत्रैतावत्क्षेत्रसम्भवात्। क्षेत्रानुभावतश्च दूरतोऽपि दृष्टिपथं ज्योतिश्चक्रमायाति। इदं तेजःप्रसरस्वरूपं लघुक्षेत्रसमासादिबहुषु स्थानेषु दृष्टं ततोऽत्र लिखितं न स्वमनीषिकया। आह च—

यदि उत्कृष्टदिवसे प्रथमं सर्वाभ्यन्तरमण्डलं षट्षष्ठितमसूर्यस्य मानुषोत्तरपर्वतसमीपे पुष्करार्धपरिधौ तदान्यानि मण्डलानि तस्य पञ्चशतदशोत्तरयोजनचारश्च कथं सञ्जाघटीति? उच्यते, सूर्यो भूमितोऽष्टशतयोजनान्यूर्ध्वं चरति। मानुषोत्तरपर्वतश्च योजन १७२१ उच्चत्वे, १०२२ मूले, योजनानि

४२४ उपरिविस्तारे, तेन सोऽप्यूर्ध्वमूर्ध्वं विस्तरेण सङ्कीर्णो भवति। तथा जम्बूद्वीपदिशि उन्नतो बहिर्निम्नः सिंहनिषादी च तेन तत्राकाशबाहुल्यात् सूर्यमण्डलानि शेषाणि भवन्त्य(न्तीत्य)दोषः॥३९॥

अथ सर्वमनुष्यलोके सर्वसूर्यपरिभ्रमणपरिधिदशभागान् पूर्वोक्तमर्थं च गाथायां द्रढयति—

**[मूल] सव्वपरिहीण एवं, सव्वे वि य भाणुणो दसंसतिगं।**

**तावंतुक्कोसदिणे, जहन्नए दुन्नि उ दसंसो॥४०॥**

**[वृत्ति]** जम्बूद्वीप-लवण-धातकी-कालोद-पुष्कराभ्यन्तरार्धमध्यबाह्यादिसर्वमण्डलपरिधिदशभागकल्पनानेनैव प्रकारेण ज्ञेया। उत्कृष्टदिवसे सर्वाभ्यन्तरमण्डलस्थाः कर्के सूर्या दशभागीयत्रयोदशभागाः तपन्ति। जघन्यदिवसे सर्वबाह्यमण्डले सूर्या दशांशद्वौ भागौ तपन्ति। पूर्वोक्तप्रकारेण दिनरात्रिमानं ज्ञेयम्, सूर्याणां समश्रेणिव्यवस्थितत्वात् समकालपरिभ्रमणाच्च॥४०॥

अथ सर्वेषु नरलोकीयद्वीपसमुद्रेषु चारक्षेत्रान्तःप्रविशतां निस्सरतां च कियद्दिनैस्तापक्षेत्रं वर्धते घटत इत्याह—

**[मूल] एवं च सइ दसंसे, तेसिं पइसंत-नीहरंताणं।**

**वड्ढइ हायइ तेसीसएण दिवसाण अणुकमसो॥४१॥**

**[वृत्ति]** एवं पूर्वोक्तप्रकारेण सति दशांशे तत्तद्द्वीपसमुद्रबाह्यमध्याभ्यन्तरादिपरिधौ दशभागे कृते सति भागत्रयरूपो दिवसस्तन्मध्यादेको भागः त्र्यशीत्यधिकदिनशतैर्हीयते वर्धते च। तेषामपि रवीणां सर्वबाह्यान्मण्डलान्मध्ये प्रविशतां सर्वाभ्यन्तराद्बहिर्निस्सरतां हानिवृद्धी ज्ञेये। इत्येवं सर्वसूर्याणां ज्ञेयम्॥४१॥

अथ सर्वेषां रवीणां मण्डलान्तरं कियत्प्रमाणं भवतीत्याह—

**[मूल] सव्वेसिं पि रवीणं, सव्वेसिं मंडलाण अन्नुन्नं।**

**दो जोयणंतरालं, पंचसयदहुत्तरो चारो ॥४२॥**

**[वृत्ति]** स[र्वे]षामिति मनुष्यलोकवर्तिद्वात्रिंशाधिकशतसूर्याणां चतुश्चत्वारिंशदधिकशतमितानि सूर्यमण्डलानि १८(४)४ तेषु मण्डलेषु प्रत्येकमन्तरं द्वयोर्द्वयोर्योजनयोर्भवति। एकषष्टिकाष्टचत्वारिंशद्भागमितं सर्वेषां सूर्याणां बिम्बं ज्ञेयमतः पञ्चशतदशोत्तरश्चारः सर्वेषां सूर्याणाम् ५१०। एतदङ्कानां तु करणं पूर्वं प्रोक्तम्। अत्र प्रथममण्डलस्य तथान्त्यमण्डलस्य वा चाराभावादष्टचत्वारिंशद्भागा नोक्ताः। पूर्वं जम्बूद्वीपसूर्याधिकारे ४८ भागाः प्रोक्ताः परं परमार्थस्त्वेक एव॥४२॥

अथ चन्द्राणां मण्डलचारमानमाह—

**[मूल] इगसट्ठंसतिवन्ना, चंदाणं पंचनवहिअसयाइं।**

**अट्ठहिं भागेहिं जओ, अब्भहियं मंडलं ससिणो॥४३॥**

**[वृत्ति]** सर्वेषां चन्द्राणां मण्डलानि पञ्चदशैव तेषामन्तरं योजन ३५. ३०/६१ समस्तं चारक्षेत्रं नवाधिकं

पञ्चशतयोजनमितम् एकषष्टिभागास्त्रिपञ्चाशच्च ५०९. ५३/६१, यतः कारणादष्टभिर्भागैरधिकं सूर्यबिम्बात् चन्द्रबिम्बम्। तच्च षट्पञ्चाशद्भागमितम्। तेन नवाधिकपञ्चशतयोजनानि त्रिपञ्चाशद्भागयुतानि। पूर्वं तु पञ्चशतदशोत्तरयोजनान्यष्टचत्वारिंशद्भागयुतं चन्द्रचारक्षेत्रं ज्ञापितं तदपि सत्यम्। इदं तु करणभेदेन विशेषत्वं ज्ञापितम्, परमार्थस्त्वेक एव। अत्र विमानं न विवक्षितम्, तत्र विवक्षितम् अयमेव विशेषो ज्ञेयः चन्द्रसूर्ययोरिति॥४३॥

अथ यदि सर्वाभ्यन्तरे मण्डले त्र्यशीत्यधिकशतैः दिनैर्दशभागीकृतजम्बूद्वीपस्यैकभागस्य अष्टोत्तरपञ्चशतसमधिकैकत्रिंशत्सहस्राणि ३१५०८ ५४/६० योजनानां तापक्षेत्रस्य वर्धन्ते हीयन्ते तदैकैकेन दिनेन किमागतं तदाह—

**[मूल] जंबूदीवे पइदिणमुभओ पासेसु ताव खित्तस्स।**
**छासीइजोयणाइं, अहियाइं वुड्ढिहाणीसु॥४४॥**

**[वृत्ति]** प्रथमं त्रैराशिकन्यासः १८३३१५०८. ४४/६० १ आद्यन्तयोरित्यादि करणव्यापारेण लब्धं द्विसप्तत्यधिकं शतं साधिकम् १७२. १०/६० ११४४/१८३ अस्य चार्धं षडशीतिः ८६. ५/६० ७२/१८३ योजनानि साधिकानि। जम्बूद्वीपे उभयोः पार्श्वयोरिति सूर्यादग्रे पश्चादपि च वर्धते हीयते च। प्रवेशनिर्गमाभ्यामित्यनेन विधिना सर्वेषां सूर्याणां निजनिजद्वीपसमुद्रपरिध्यनुसारेण भागहारकरणान्निपुणमवगन्तव्यम्। परमिदं करणं तु सर्वाभ्यन्तरमण्डलसम्बन्धि ज्ञेयम्। अन्यन्मण्डलसर्वसम्बन्धि करणं पुरा प्रोक्तम्। यतः कर्कसङ्क्रान्तैः सर्वाभ्यन्तरे मण्डले ९४५२६ मध्यात्तृतीयभागे न्यूने कृते शेषम् ६३०१७. ४८/६१ रात्रिभागः स्थितः। सोऽपि तृतीयभागः त्र्यशीत्यधिकशतैर्दिनैर्विभक्तो द्विसप्ततिशतं योजनानि साधिकानि भवन्तीत्यर्थः॥४४॥

अथ सूर्यस्य पूर्वपश्चिमदाक्षिणोत्तरदिग्विभागं दर्शयन्नाह—

**[मूल] पिट्ठे पुव्वा पुरओ, अवरा वलए भमंत सूरस्स।**
**दाहिणकरम्मि मेरु, वामकरे होइ लवणोही॥४५॥**

**[वृत्ति]** दक्षिणावर्तेन सूर्यस्य भ्रमतः पृष्टे पृष्टे पूर्वा दिक् पुरतोऽग्रेऽग्रे अपरा इति पश्चिमा भवति। सूर्यस्य दक्षिणकरे मेरुः वामकरे लवणोदधिः। एताः सूर्यस्य दिशो न तु लोकदिशः। लोकानां तु सूर्यापेक्षया दिशो भवन्ति। यथा एकसूर्यस्य प्रोक्तं तथा सर्वेषां सूर्याणामित्थमेव एकश्रेणिव्यवस्थितिवशात्॥४५॥

अथ सूर्यस्य किरणप्रसरमाह—

**[मूल] सगचत्तसहसदुसई, तेछट्ठा तहिगवीससट्ठंसा।**
**पुव्वावरकरपसरो, कक्के सूरा अहुत्तरओ॥४६॥**

**[वृत्ति]** कर्काद्यदिने योजनसप्तचत्वारिंशत्सहस्राणि द्वे शते त्रिषष्टिश्च एकयोजनैकषष्टिका एकविंशतिभागाः ४७२६३. २१/६० एतावान् पूर्वस्यां सूर्यस्य करप्रसरः। एतावानग्रेऽप्यपरस्यां करप्रसरः। इदं

पूर्वमुक्तमपि षड्दिक्करप्रसराधिकारात् पुनः कथितम्। उभयोः पूर्वापरयोर्मेलने कर्काद्यदिने उदयास्तान्तरपूर्वोक्तं जातम् ९४५२६. ४२/६०॥४६॥

अथ दक्षिणोत्तरतः करप्रसरमाह—

**[मूल] असिईसऊणसहसा, पणयालीसा य जम्मओ दीवे।**

**असिइसयं लवणे विय, तित्तीससहस्स सतिभागा॥४७॥**

**[वृत्ति]** मध्यमण्डले वर्तमानः कर्काद्येऽशीत्यधिकयोजनशतान्तर्द्वीपे प्रविशति। तेन तदूनपञ्चचत्वारिंशद्योजनसहस्राणि याम्यतः सूर्याद्दक्षिणा हि जम्बूद्वीपे करप्रसरः। अनेन किमागतम्? चतुश्चत्वारिंशत्सहस्राण्यष्टौ शतानि विंशतिरधिकानि ४४८२० मेरुं यावदित्यर्थः। यद्यपि मण्डलसमश्रेणिमेरोः विष्कम्भो योजनदशसहस्रप्रमाणात्मको न लभ्यते किन्तु न्यूनः तथापि व्यवहारेणैतावान् ग्राह्यः।

अथोत्तरस्यामाह—अशीत्यधिकशतं द्वीपसम्बन्धिनं ग्राह्यम्। लवणे तु लक्षतृतीयांशः। यथा त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशाधिकत्रीणि शतानि योजनस्यैकस्य च त्र्यंशः ३३३३३ १/३ द्वैपीययोजनाशीत्यधिकशत १८० मेलने जातम् ३३५१३. १/३ लवणे करप्रसरः। यथा एकस्य सूर्यस्य करप्रसरस्तादृशो द्वितीयस्यापि॥४७॥

अथ क्रमेण ततः पूर्वापरेषु हीयमानं हीयमानं मकरे यदवशिष्यते तदाह—

**[मूल] इगतीससहस अडसय, इगतीसा तह य तीससट्ठंसा।**

**मयरे रविरस्सीओ, पुव्ववरेणं अह उदीणे॥४८॥**

**[वृत्ति]** प्रतिदिनं प्रतिमण्डलं च साधिकचतुरशीतियोजनहान्या हान्या मकरे रवेः किरणप्रसरः। पूर्वापरयोरे कत्रिंशत्सहस्राण्यष्टौ शतानि एकत्रिंशदधिकानि त्रिंशच्चैकयोजनषष्ठिभागाः ३१८३१ ३०/६०। पूर्वापरयोर्मेलने सर्वबाह्ये जातं पूर्वोक्तमुदयास्तान्तरं प्रमाणं यथा ६३६६३ इत्यर्थः॥४८॥

अथोदीच्यां दक्षिणायां चाह—

**[मूल] लवणे तिसई तीसा, दीवे पणचत्तसहस अह जम्मे।**

**लवणम्मि जोयणतिगं, सतिभाग सहस्स तित्तीसा॥४९॥**

**[वृत्ति]** सर्वबाह्यमण्डले लवणसमुद्रान्तः सूर्यः शतत्रयं त्रिंशद्योजनाधिकं प्रविशति। तेन तदधिकपञ्चचत्वारिंशत्सहस्राणि ४५३३० जम्बूद्वीपे करप्रसरः। तथा त्रयस्त्रिंशत्सहस्राणि योजनत्रयाधिकानि एकयोजनस्य तृतीयांशः ३३००३. १/३ लवणे करप्रसरः॥४९॥

अथोर्ध्वाधस्तेजः प्रसारमाह—

**[मूल] मयरम्मि वि कक्कम्मि वि, हिट्ठा अट्ठारजोयणसयाइं।**

**जोयणसयं चउड्ढं, रविकर एवं छसु दिसासु॥५०॥**

**[वृत्ति]** मकरे कर्के च अर्थाद्द्वादशसङ्क्रान्तिसर्वदिनेषु सर्वमण्डलेषु वर्तमानस्य सूर्यस्याधोऽष्टादशयोजनशतानि १८००। यतः समभूतलादष्टशतयोजनैरूर्ध्वं सूर्यो वर्तते। समभूतलात्प्रदेशहान्या हान्या प्रान्ते पश्चिमविदेहे सहस्रयोजनावगाढोऽधोग्रामो वर्तते। उक्तं हि लघुक्षेत्रविचारे—

***जोयणसयदसगंते, समधरणीए अहे अहोगामो। बायालीसं सहसेहिं गंतुं मेरुस्स पच्छिमओ॥***

तत्रापि सूर्यकिरणप्रचारो दिवसरात्रिभागश्च। तत्र जातमष्टादशशतम्। सूर्यादूर्ध्वं च शतमेकं करप्रसरः।

यदुक्तं भगवत्याम्—

***जंबुद्दीवे णं भंते! सूरिया केवइयं खित्तं उड्ढं तवेंति?, केवइयं खित्तं अहो तवेंति?, केवइयं खित्तं तिरियं तवेंति? गोयमा! एगं जोयणसयं उड्ढं तवेंति। हेट्ठा अट्ठारसजोयणसयाइं तवेंति।***

इत्यादि। एवममुना प्रकारेण षट्सु दिक्षु रवेः करप्रसरः॥५०॥

अथ याम्योत्तरयोः सर्वदापि सर्वाग्रमाह—

**[मूल]** **पइदिणमवि जम्मुत्तर, अडसत्तरिसहस तिसयतंसंसो।**
**उड्ढह गुणवीससया, अट्ठिया पुव्वावरा रस्सी॥५१॥**

**[वृत्ति]** प्रतिदिनम् एवं याम्योत्तरयोः कृत्वा सर्वमेलनेऽष्टसप्ततिसहस्राणि त्रीणि शतानि त्रयस्त्रिंशदधिकानि त्र्यंश्येकभागश्च ७८३३३. १/३ ऊर्ध्वाधश्च १९०० एकोनविंशतिशतानि। तथा सूर्यात्पूर्वस्याम[प]रस्यां च रश्मयोऽस्थिराः। यतः कर्कसङ्क्रान्तौ दीर्घतरा मकरसङ्क्रान्तौ च स्तोकाः। हानिवृद्धी पूर्वोक्तानुसारेण ज्ञेये॥५१॥

अथ यस्यां दिशि यदा जम्बूद्वीपे दिवसस्तदा लवणधातकीखण्डादिषु कुत्र दिशि दिवसो रात्रिश्च तत्स्वरूपं गाथाद्वयेनाह—

**[मूल]** **पुव्वावरेण दिवसो, जइआ किर होइ जंबू मंदरओ।**
**उत्तरदाहिणरयणी, एवं सेसेसु नरलोए॥५२॥**

**[वृत्ति]** जम्बूद्वीपस्थमेरुतो यदा पूर्वस्यां पश्चिमायां च दिशि दिवसो भवति तदोत्तरदक्षिणयोः रजनी भवति। एवं लवणेऽपि, धातकीखण्डेऽपि, कालोदेऽपि, पुष्करार्धेऽपि सकलनरलोके उभयोः पार्श्वयोर्दिवसो भवति। द्वात्रिंशाधिकशतसूर्याणां समश्रेणिसद्भावात्॥५२॥

**[मूल]** **उत्तरदाहिणदिवसो, जइया किर होइ जंबुमंदरओ।**
**पुव्वं वरेण रयणी, कह इमिणं सूरपन्नत्ती॥५३॥**

**[वृत्ति]** यदा किल मन्दरतो जम्बूद्वीपे उत्तरदक्षिणयोर्दिवसो भवति तदा पूर्वापरयोः रात्रिर्भवति। एवं लवणादिषु सर्वत्र नरलोके योज्यम्। यतस्तद्गतानां सूर्याणां जम्बूद्वीपगतसूर्यैः सह समश्रेणिव्यवस्थिततत्वमस्ति। एवं चन्द्रमसामपि जम्बूद्वीपगतचन्द्राभ्यां सह समश्रेणिता भावनीया। रात्रिदिवसस्वरूपं सूर्यप्रज्ञप्त्यामप्युक्तम्।

यथा—

***जया णं लवणसमुद्दे दाहिणे दिवसो तया णं उत्तरे वि दिवसो भवइ। जया णं उत्तरदाहिणे दिवसो तया णं पुरत्थिमपच्चत्थिमे णं राई भवइ। एवं जहा जंबुद्दीवे तहेव कालोए वि तहेव। जया णं अब्भंतरपुक्खरद्धे दाहिणे दिवसो भवइ तया णं उत्तरे वि दिवसो भवइ। जया णं उत्तरदाहिणे दिवसो हवइ तया णं अब्भंतरपुक्खरद्धे पुरत्थिमपच्चत्थिमे णं राई भवइ। पाभृत ८***

किं च यथा जम्बूद्वीपस्थमन्दराज्जगती यावद्विस्तीर्णा दिवसस्थापना तथा जगतीतो विस्तीर्णा विस्तीर्णा लवणे जगती यावत्ततोऽपि धातकीखण्डजगतीं यावद्विस्तीर्णा विस्तीर्णा ततोऽपि कालोदजगतीं यावत्ततोऽपि पुष्करार्धे मानुषोत्तरं यावद्विस्तीर्णा विस्तीर्णा इत्याद्यवसेयम्। सर्वेषां चन्द्राणां सूर्याणां च समश्रेणिव्यवस्थितत्वेन जम्बूद्वीपवदन्यत्र द्वीपे समुद्रे च दशभागीकरणकरप्रसरयोजनमानादि तथैव स्वयमभ्यूह्यम्॥५३॥

अथ प्रतिद्वीपं प्रतिसमुद्रं च कति दिवसा कति रात्रयश्च भवन्तीत्याह—

**[मूल] जत्थ य खित्ते जाव य, रविणो ता[व] चेव वासरा हुंति।**
**चंदपमाणा रयणी, समसेणीए सया मणुए॥५४॥**

**[वृत्ति]** यत्र च क्षेत्रे इति द्वीपे समुद्रे च यावन्तः सूर्यास्तावन्तो वासरा दिवसा भवन्ति। यथा जम्बूद्वीपे समश्रेण्या द्वौ वासरौ, लवणे चत्वारः, धातकीखण्डे द्वादश,कालोदे द्विचत्वारिंशत् पुष्करार्धे द्वासप्तति एवं सर्वेऽपि वासरा द्वात्रिंशाधिकं शतं मनुष्यलोके भवन्ति। चन्द्रप्रमाणा द्वात्रिंशाधिकशतप्रमाणा रात्रयोऽपि नरलोके ज्ञेयाः॥५४॥

अथ यदा कर्कसङ्क्रान्तौ भरते दिनमानमष्टादशमुहूर्तं तदा पश्चिममहाविदेहैरावतपूर्वमहाविदेहेष्वपि कियन्मानमिति गाथाद्वयेनाह—

**[मूल] पुव्वविदेहे हुंते, मुहुत्ततिगसेसि वासरे सूरं।**
**भरहनरा उदयंतं, पिच्छंति य कक्कपढमदिणे॥५५॥**

**[वृत्ति]** पूर्वविदेहे मुहूर्तत्रिके शेषे वासरे सति सूर्यम् उदयन्तं भरतवासिनो मनुष्या पश्यन्ति। कर्कसङ्क्रान्ति प्रथमदिने व्यवहारतः, निश्चयनयाच(च्च) सङ्क्रान्तिपूर्वपश्चादपि कदाचिदिति रहस्यम्॥५५॥

**[मूल] भरहे मुहुत्ततियगे, सेसे पच्छिमविदेहमणुआ वि।**
**एरवए पुण एवं, तेणं सव्वत्थ तुल्लमिणं॥५६॥**

**[वृत्ति]** भरतक्षेत्रेऽपि मुहूर्तत्रिके शेषे अवशिष्यमाने दिने सति पश्चिममहाविदेहे मनुष्याः सूर्यम् उदयन्तं पश्यन्ति। तथा ऐरवतवासिनो नरा पश्चिममहाविदेहे मुहूर्तत्रिके शेषे सूर्यमुदयन्तं पश्यन्ति। पूर्वमहाविदेहमनुष्या ऐरवते मुहूर्तत्रिकशेषे सति सूर्यमुदयन्तं पश्यन्ति। सर्वत्र मुहूर्तत्रिके दिने चटिते सतिं(ति) प(पा)श्चात्यक्षेत्रे सूर्योऽस्तमेतीत्यर्थः। यथा उदयसम्बन्धिमुहूर्तत्रिकमागतं तथास्तसमयादर्वाग् मुहूर्तत्रिकं लभ्यते। तेन सर्वत्र क्षेत्रे मध्यमण्डले वर्तमाने सूर्येऽष्टादशमुहूर्तं दिनमानं तुल्यमेव रात्रिर्द्वादशमुहूर्ता। तदा पूर्वमहाविदेहपश्चिमम

हाविदेहभरतैरवतेषु चतुर्षु स्थानेषु दिवसः प्राप्यते परं पूर्वपश्चिममहाविदेहयोः प्रभातकालदिनं भरतैरवतयोश्च सन्ध्याकालदिनम्। यदा भरतैरवतयोः सन्ध्याकालस्तदा पूर्वपश्चिमविदेहयोः सन्ध्याकालिकं मुहूर्तत्रिकं ज्ञेयम् एवं स्वयमभ्यूह्यम्॥५६॥

अत्र रात्रिस्वरूपमाह—

**[मूल] परिहाणीए मयरे, रयणि मुहुत्ते तिगे अइक्कंते।**
**उदएइ तहा सूरो, मुहुत्ततिगसेसि अत्थमइ॥५७॥**

**[वृत्ति]** पूर्वोक्तन्यायेन किञ्चिन्न्यूनचतुर्भिश्चतुर्भिः पलैः क्रमेण दिने हीयमाने हीयमाने तैः पलै रात्रिर्वर्धते। प्रथममण्डलाद् द्वितीये द्वितीयमण्डलाद्यदा तृतीये एवं सर्वबाह्ये मण्डले यदा सूर्यस्तदा मकरसङ्क्रान्त्याद्यदिने पूर्वविदेहे रात्रेर्मुहूर्तत्रिकेऽतिक्रान्ते सति भरते सूर्य उदेति। तथा तत्रैव मुहूर्तत्रिके शेषे सति सूर्योऽस्तमेति। तेनैव प्रकारेण भरते रात्रेर्मुहूर्तत्रिके गते सति पश्चिमविदेहे सूर्योदयोऽवशिष्टमुहूर्तत्रिके रात्रेः सूर्यास्तमनं भवति। एवमैरवते पूर्वविदेहेऽपि सर्वत्र रात्रिरष्टादशमुहूर्ता दिनं तु द्वादशमुहूर्तम्। तदा सूर्ययोर्बाह्यमण्डलेषु गतत्वेन तावत्कालमदर्शनात्॥५७॥

एतत्पूर्वोक्तं दिनरात्रिमानं जम्बूद्वीपे ज्ञेयमथ मनुष्यलोकान्तः शेषे द्वीपद्वये समुद्रद्वये च दिनरात्रिप्रमाणमाह—

**[मूल] दीवो दहिम्मि मणुए, एवं दिणरयणिमाणपरिभणियं।**
**नवरं बहिआ बहिआ, ससिसूराणं गई सिग्घा॥५८॥**

**[वृत्ति]** शेषेषु मनुष्यलोकान्तर्वर्तिषु द्वीपसमुद्रेषु दिनरात्रिपरिमाणं जम्बूद्वीपप्रकारेणैव ज्ञेयम्। तत्रत्य पूर्वविदेहपश्चिमविदेहभरतैरवतादिषु मध्यमण्डलस्थेषु सूर्येषु दिनम् अष्टादशमुहूर्तं रात्रिर्द्वादशमुहूर्तेत्यादिकं तथैव परिभावनीयम्। येषु दिनेषु च जम्बूद्वीपे मध्यबाह्यमण्डलेषु सूर्यौ भवतस्तस्मिन्नेव दिने सर्वे सूर्या निजनिजबाह्यमण्डलेष्वेव भवन्ति। उत्तरचारित्वं दक्षिणचारित्वं च सर्वेषां समकं भवतीत्यर्थः। समश्रेणिव्यवस्थितत्वात् सर्वत्र सदृशदिनमानत्वाच्च। यौगलिकक्षेत्रवर्षधरादिषु च जम्बूद्वीपस्थसूर्यवद्दिन रात्रिप्रकारो ज्ञेयः। जम्बूद्वीपस्थाद् बहिस्थसूर्याणां करप्रसरः पूर्वापरयोरधिकाधिकतरो ज्ञेयः। दक्षिणोत्तरयोः स्तोकः स्तोक इति स्थितिः। किं च नवरम् इत्ययं विशेषः। जम्बूद्वीपाद्बाह्ये लवणे लवणाद्धातकीखण्डे, धातकीखण्डात्कालोदे, कालोदात्पुष्करार्धे सर्वत्र चन्द्रसूर्याणामेकमुहूर्ते गतिः पूर्वोक्तप्रकारादधिकतरा ज्ञेया। मण्डलेषु मुहूर्तप्रमाणं च तथैव सर्वेषां समश्रेणिचलनात् निजनिजमण्डलपरिधिः षष्ठिविभक्तो यद्भवति तदेकमुहूर्तगतिप्रमाणं जायते। अन्यत्सर्वं दशभागीकरण-दिनरात्रिभागस्थापनमान-हानिवृद्धिस्वरूपं तथैव योज्यं न किमपि[१] भेदः॥५८॥

अथ सर्वत्र क्षेत्रे दिङ्निर्णयमाह—

---

१ कोऽपि इति भाव्यम्?

**[मूल] सूरत्थमणं जत्थ य, उदओ तप्पुरजणाण पुव्वा वि।**
**दाहिणपच्छिम नेया, सव्वेसिं उत्तरे मेरू॥५९॥**

**[वृत्ति]** सूर्यास्तमनमिति तत्पाश्चात्यलोकानां यत्र सूर्यो दृग्गोचराददृश्यतां गतस्तदस्तमनं पश्चिमा यत्र पाश्चात्यलोकानामस्तमितस्तदग्रेतनलोकानां सैव पूर्वा। तदनुसारेण दक्षिणोत्तरेऽपि ज्ञेये। यथा पूर्वविदेहे या पश्चिमा सा भरते पूर्वा, भरते या पश्चिमा सा पश्चिमविदेहे पूर्वा, पश्चिमविदेहे या पश्चिमा सा ऐरवते पूर्वा, ऐरवतेऽपि या पश्चिमा सा पूर्वविदेहेऽपि पूर्वा। इदं स्थूलं दर्शितं परं यौगलिकक्षेत्रवर्षधरादिषु सर्वत्र सूक्ष्मेक्षिकया पूर्वाप्रतीच्यौ विचार्ये। मेरुः सर्वेषां कर्माकर्मक्षेत्रीयाणां जनानाम् उत्तरे ज्ञेयः। एवं सर्वत्र लवणधातकीकालोदपुष्करार्धेषु एतत्प्रकारेण दिग्भागो ज्ञेयः, सर्वेषां सूर्याणां समश्रेणिव्यवस्थितत्वात् जम्बूद्वीपगतमेरुमनुलक्षीकृत्यषट्षष्ट्या पङ्क्त्या समकं परिभ्रमणाच्च॥५९॥

अथ जम्बूद्वीपादिष्वष्टप्रहरकालनिर्णयमाह—

**[मूल] अट्ठपहरस्स कालो, रविप्पमाणेण एगसमएणं।**
**लब्भइ जंबुद्दीवे, एवं सव्वत्थ नरलोए॥६०॥**

**[वृत्ति]** अहोरात्रसम्बन्धी अष्टप्रहरषष्ठिघटिका समस्तपलाक्षरादि कालो जम्बूद्वीपे एकस्मिन्समये रविप्रमाणेनेति सूर्यद्वयसद्भावात् वारद्वयं लभ्यते। सूर्यापेक्षया दिनं सूर्याभावाद्रात्रिश्च क्वचित्प्रभातम्, क्वचिन्मध्याह्नः, क्वचित्सन्ध्या, क्वचिन्मध्यरात्रादि सर्वोऽपि कालः सूर्यभ्रमणापेक्षया समवसेयः। यथा भरते यत्र सूर्य उदेति तदधः स्थानां मध्याह्नः। भरते च यदा मध्याह्नस्तदा उदयस्थानानां लोकानामस्तमितो यत्रास्तमेष्यति तेषां जनानामुदित इत्यादि पश्चिममहाविदेह ऐरवतपूर्वविदेहादिषु स्वयं विचार्यम्। यौगलिकक्षेत्रवर्षधरादिषु च विचारणयाष्टप्रहरसम्बन्धी सर्वोऽपि कालः प्राप्यते। एवं सर्वत्र नरलोके ज्ञेयम्। यथा जम्बूद्वीपे द्विवारम् अष्टप्रहरकालः लवणे च चतुःसूर्यसद्भावाच्चतुर्वारमष्टप्रहरकालः, धातकीखण्डे द्वादश, कालोदे द्विचत्वारिंशत्, पुष्करार्धे द्विसप्ततिः॥६०॥

चन्द्रसूर्ययोः स्वरूपमुक्त्वा किञ्चिच्चन्द्रस्य विशेषमाह—

**[मूल] केण य वड्ढइ चंदो, परिहाणी होइ केण चंदस्स।**
**केण सिअ-किण्हपक्खो, उदओ रत्तिं दिवा केण॥६१॥**

**[वृत्ति]** केन प्रकारेण चन्द्रो वर्धते शुक्लपक्षे? (१), केन प्रकारेण कृष्णपक्षे चन्द्रस्य परिहानिर्भवति? (२), केन प्रकारेण शुक्लपक्षोऽपि? (३), केन प्रकारेण कृष्णपक्षोऽपि भवति? (४), केन प्रकारेण चन्द्रस्य रात्रौ उदयो भवति? (५), केन प्रकारेण चन्द्रस्य कदाचिद्दिवापि उदयो भवति?॥६१॥

एतत्षट्प्रश्नान् विवृण्विषुः प्रथमं राहुस्वरूपमाह—

**[मूल] किण्हं राहुविमाणं, निच्चं चंदेण होइ अविरहियं।**
**चउरंगुलमप्पत्तं, हिट्ठा चंदस्स तं चरइ॥६२॥**

**[वृत्ति]** इह द्विधा राहुः—नित्यराहुः, पर्वराहुश्च। तत्र नित्यराहोर्विमानं कृष्णम्। तच्च तथा जगत्स्वाभाव्यान्नित्यं चन्द्रेण सार्धमविरहितं भवति। तथा चतुर्भिरङ्गुलैरप्राप्तं सच्चन्द्रविमानस्याधस्ताच्चरति। चन्द्रमा चरति मुञ्चते(ति) च॥६२॥

आवरणमोचनस्वरूपमाह। अत्र मतत्रयम्। एकं समवायाङ्गसक्तम्, द्वितीयं जीवाभिगमीयम्, तृतीयं सूर्यप्रज्ञप्तिसम्बन्धि। तत्र प्रथमं समवायाङ्गवृत्तिगतमिदम्—

**[मूल] बावट्ठिं बावट्ठिं, दिवसे दिवसे उ सुक्कपक्खस्स।**

**जं परिवड्ढइ चंदो, खवेइ तं चेव कालेण॥६३॥**

**[वृत्ति]** चन्द्रमण्डलस्य एकत्रिंशदुत्तरनवशत(९३१)भागप्रविभक्तस्य प्रतिदिवसं द्वाषष्टिः द्वाषष्टिर्भागाः शुक्लपक्षे यत्परिवर्धते(न्ते) ततः पञ्चदशे दिने सर्वसमुदिता भवन्ति। एकः सदानवा(नाव)रितोऽस्ति। यत एकत्रिंशदुत्तरनवशताङ्कः ९३१ पञ्चदशैर्भागे हृते द्वाषष्टिः द्वाषष्टिः लभ्यमानत्वात्। एकः शेषः तथा तदेव द्वाषष्टिः द्वाषष्टिः भागाः पञ्चदशैर्दिनैः कालेनेति कृष्णपक्षे पुनराव्रियन्ते। एकस्तत्राप्यवशिष्यते॥६३॥

अथ द्वितीयं मतं जीवाभिगमवृत्त्युक्तमाह—

**[मूल] पन्नरसा कालेण य, चंदं पन्नरसमेव तं वरइ।**

**पन्नरसयभागेण य, पुणो वि तं चेव निक्कमइ॥६४॥**

**[वृत्ति]** इह द्विषष्टिभागीकृतस्य चन्द्रविमानस्य द्वावुपरितनौ भागौ राहुणा सदाप्यनावार्यस्वभावत्वात्तावपाकृत्य शेषाः षष्ठिभागाः पञ्चदशैर्दिनैर्भागे हृते चत्वारो भागा लभ्यन्ते। तेन राहुरात्मीयेन पञ्चदशभागेन तच्चन्द्रविमानपञ्चदशभागं कृष्णपक्षे आवृणोति आच्छादयतीत्यर्थः। शुक्लपक्षे तु पुनस्तथैव प्रतिदिवसमात्मीयेन पञ्चदशभागेन चन्द्रविमानपञ्चदशभागं निष्क्रमति मुञ्चतीत्यर्थः। किमुक्तं भवति? कृष्णपदे प्रतिपद आरभ्यात्मीयेन पञ्चदशभागेन प्रतिदिनम् एकैकपञ्चदशभागमुपरितनभागाद् आरभ्य आवृणोति। शुक्लपक्षे तु प्रतिपद आरभ्य तेनैव क्रमेण प्रतिदिनमेकैकपञ्चदशैकभागं प्रकटीकरोति। तेन जगति चन्द्रमण्डलस्य वृद्धिहानी प्रतिभासेते। स्वरूपतः पुनश्चन्द्रमण्डलं तथैवास्ते॥६४॥

अथ तृतीयं मतं सूर्यप्रज्ञप्त्युक्तमाह—

**[मूल] सोलसभागे काऊण उडुवई हायएत्थ पन्नरसं।**

**तत्तियमित्ते भागे, पुणो वि परिवड्ढए जोण्हा॥६५॥**

**[वृत्ति]** षोडशभागान् कृत्वा उडुपतिश्चन्द्रः कृष्णपक्षे प्रतिदिनं पञ्चदशैकैकं भागं हीयते। एवं पञ्चदशैर्दिनैः पञ्चदशभागा भवन्ति, एकोऽवशिष्यते। शुक्लपक्षे चैकैको भागो वर्धते। परिपूर्णाः षोडशभागाः पूर्णिमादिने भवन्ति। एतेन मतत्रयेऽपि स्तोको वा घनो वा उद्घाटो भागस्तिष्ठति। न सर्वथा कदापि राहुणा चन्द्रः पूर्ण आव्रियत इत्यर्थः। **आह च**—चन्द्रविमानस्य योजनैकषष्ठिकषट्पञ्चाशद्भागमात्रत्वं राहुविमानस्य ग्रहविमानत्वेन अर्धयोजनमात्रत्वात् कथं राहुविमानेन सर्वात्मना चन्द्रविमानावरणस्य सम्भवः? **उच्यते-**

ग्रहविमानानाम् उक्तप्रमाणस्य प्रायिकत्वाद्राहुविमानमधिकप्रमाणमपि सम्भाव्यते इत्यदोषः। अन्ये त्वाहुः— लघीयसो राहुविमानस्यात्यन्तबहुलेन प्रसर्पता तमिस्ररश्मिजालेन महदपि चन्द्रविमानमाव्रियते। अथवा महदपि चन्द्रविमानम् अर्वाग्स्थायिना लघुनापि राहुविमानेनाच्छादितम् अधस्तनैर्लोकैर्न दृश्यत इति॥६५॥

अथ सितकृष्णपक्षाभिधं तृतीयं चतुर्थं च द्वारमाह—

**[मूल] एवं वड्ढइ चंदो, परिहाणी होइ एव चंदस्स।**

**कालो वा जोण्हा वा, तेणणुभावेण चंदस्स॥६६॥**

**[वृत्ति]** एवममुना प्रकारेण शुक्लपक्ष(क्षे) चन्द्रो वर्धते। कृष्णे त्वेवं प्रकारेण चन्द्रस्य परिहानिर्भवति आच्छादनं भवतीत्यर्थः। तेनानुभावेन चन्द्रस्य हान्या हान्या कृष्णपक्षः चन्द्रस्य ज्योत्स्नावृद्ध्या वृद्ध्या शुक्लपक्षो भवति॥६६॥

अथ चन्द्रस्य रात्र्युदयदिनोदयस्वरूपं गाथाषट्केनाह—

**[मूल] सूरेण समं उदओ चंदस्स अमावसीदिणे होइ।**

**मंडलगा वि समीवे रासी रिक्खेसु एगट्ठा॥६७॥**

**[वृत्ति]** सूर्येण सार्धं प्रातरमावास्यादिने उदयो भवति। मण्डलकान्यपि समीपे भवन्ति। कोऽर्थः? यस्मिन्मण्डले सूर्यो भवति तत्र वा तत्समीपे वा चन्द्रो भवति। चन्द्रसूर्यौ राशौ नक्षत्रे चामावास्याम् एगट्ठा इति एकत्र भवतः। यस्मिन्नक्षत्रे राशौ च सूर्यस्तस्मिन्नेव चन्द्र इति॥६७॥

ततः किं भवतीत्याह—

**[मूल] सिअपडिवइ रिक्खाई, भेओ उदओ तहेव पुण नवरं।**

**सूरस्स गई सिग्घा, मुहुत्तमेगं पडइ पिट्ठे॥६८॥**

**[वृत्ति]** श्वेतप्रतिपदि नक्षत्रमण्डलकादिभेदः। उदयः किञ्चित्पश्चात् परं चन्द्रात्सूर्यस्य गतिः शीघ्रा। तेनास्तमनावसरे चन्द्रो मुहूर्तमेकं पृष्ठे पतति। यतः सूर्यात् मुहूर्तानन्तरमस्तमेतीत्यर्थः। भागमेकं राहुर्मुञ्चति तथापि न दृग्गोचरम् आयाति सूर्यबिम्बासन्नत्वात्। गतेः शीघ्रविभागस्त्वेवम्—***सर्वमन्दगतिश्चन्द्रः तस्माच्छीघ्रो रविः तस्माद् ग्रहाः तेभ्यो नक्षत्राणि ततः ताराः। ग्रहमध्ये तु बुधात् शुक्रः, शुक्रात् मङ्गलः, मङ्गलाद् बृहस्पतिः, बृहस्पतेः शनिः शीघ्र*** इति सङ्ग्रहणीबृहद्वृत्तिगतम्॥६८॥ **[सङ्ग्रहणीसू. वृ. ४४]**

**[मूल] बीआदिणे वि ससिणो, भागदुगं निच्चराहु परिहरइ।**

**सूराउ मुहुत्तदुगं, चिट्ठइ पयडो हवइ तम्हा॥६९॥**

**[वृत्ति]** द्वितीयादिने शशिनो विमानस्य भागं द्वितीयं नित्यराहुः परिहरति। प्रथमः प्रतिपत्सम्बन्धी, द्वितीयो भागो द्वितीयासक्त एवं भागद्वयं जातम्। ततः सूर्यात् मुहूर्तद्विकमस्तमनावसरे मन्दगतित्वात् पश्चात्पतति।

तस्माद्द्वितीये दिने चन्द्रः प्रकटो दृश्यते॥६९॥

**[मूल] एएणणुक्कमेणं, जा पुन्निमि सव्वभागमुहुवुड्ढी।**

**सूरत्थमणे उदिओ, पुव्वे पुण्णो सयलरयणी॥७०॥**

**[वृत्ति]** एतेनानुक्रमेण यावत् पूर्णिमादिने सर्वभागवृद्ध्या मुहूर्तवृद्ध्या च सूर्यास्तमनावसरे पुव्वे इति पूर्वस्यां चन्द्र उदेति। सकला(लां) च रजनी(नीम्) उद्योतकारी चन्द्रो भवति॥७०॥

तत्रैव विशेषमाह—

**[मूल] ससिसूरा पुन्निमए, परोप्परं रासिउभयसत्तमगे।**

**बहुलपडिवाइ रत्तिं, गए मुहुत्ते उदयमेइ॥७१॥**

**[वृत्ति]** पूर्णिमायां शशिसूर्यौ परस्परं राशेरुभयसप्तमके भवतः। सूर्याक्रान्तात् सप्तमराशेः चन्द्रः चन्द्राक्रान्तात् सप्तमराशेः सूर्य इत्यर्थः।

अथ सार्धगाथया कृष्णपक्षस्वरूपमाह—बहुल इति कृष्णपक्षस्य प्रतिपद्रात्रेर्गतैकमुहूर्ते चन्द्र उदयमेति॥७१॥

**[मूल] पइदिणमुहुत्तवुड्ढी, भागमावरइ राहु पन(न्न)रसमं।**

**तेणं अमावसीए, होइ तहा जं पुरा वुत्तं॥७२॥**

**[वृत्ति]** एवममुना प्रकारेण प्रतिदिनं मुहूर्तवृद्धौ द्वितीयायां मुहूर्तद्वये गते चन्द्रोदयः। तृतीयायां मुहूर्तत्रिके इत्यादि दर्श(र्शं)[1] यावत् राहुरपि प्रतिदिनं पञ्चदशैकभागम् (१/१५) आवृणोति। तेनामावास्यादिने भवति। यत्पुरा सूरेण सममिति गाथायां प्रोक्तं तत्सर्वं ज्ञेयम्, अलं बहुविस्तरेण। अत्र किञ्चिद्दिनमानापेक्षया उदयवेलाया अधिकत्वं स्तोकत्वमपि ज्ञेयम्॥७२॥

अथ पर्वराहुस्वरूपमाह—

**[मूल] ससिसूरस्स य गहणं, छम्मासंते जहन्नओ होइ।**

**उक्कोसड्ढतिवरिसा, ससिणो सूरस्स अडयाला॥७३॥**

**[वृत्ति]** चन्द्रस्य सूर्यस्य च पर्वराहुः कदाचिदकस्मात् समागत्य चन्द्रस्य पूर्णिमारात्रौ सूर्यस्यामावास्यादिने चैव नक्षत्रादिग्रहयोगे अधो निजविमानेन विमानं तिरोधत्ते। तिरोहिते च तस्मिन् ग्रहणमिति लोकरूढिः। स च पर्वराहुर्जघन्यतः षट्सु मासेषु अतिक्रान्तेषु चन्द्रस्य सूर्यस्य वा उपरागं करोति। उभयोर्जघन्यतः षण्मासान्ते ग्रहणं भवति, तन्मध्ये न भवति। उत्कृष्टतः चन्द्रस्य सार्धवर्षत्रयं द्विचत्वारिंशन्मासा इत्यर्थः। सूर्यस्य त्वष्टचत्वारिंशद्वर्षेषु अतिक्रान्तेषु ग्रहणं भवति॥७३॥

पुनर्विशेषमाह—

---

१ = अमावास्या

**[मूल] जइआ इगस्स गहणं, बत्तीसाहिअसअस्स ता गहणं।**

**ससिणो वा रविणो वा, एवं नेयं मणुयलोए॥७४॥**

**[वृत्ति]** यदा कदाचिदेकस्य शशिनः सूर्यस्य वा ग्रहणं भवति, तदा द्वात्रिंशाधिकशतस्य चन्द्रस्य सूर्यस्य वा सकले मनुष्यलोके सर्वेषां ग्रहणं समकालं सम्भवति। एकस्य चन्द्रस्य तदा सर्वेषां चन्द्राणाम्, एकस्य सूर्यस्य तदा सर्वेषां सूर्याणामिति भावः, समश्रेणिव्यवस्थितत्वाद् इति सम्प्रदायाल्लिखितम्, न तु क्वापि शास्त्रे दृष्टम्॥७४॥

अथ चन्द्रसूर्यौ कदा दक्षिणोत्तरचारिणौ भवतस्तदाह—

**[मूल] कक्कमिआइदुछक्को, ससिसूरा दाहिणुत्तराचारी।**

**मासेण हुंति चंदा, सूरा पुण वरिसमेगेण॥७५॥**

**[वृत्ति]** कर्कादिषट्कं कर्क-सिंह-कन्या-तुल-वृश्चिक-धनुष्षु वर्तमानौ चन्द्रसूर्यौ दक्षिणचारिणौ भवतः, उत्तरमण्डलेभ्यः क्रमेण दक्षिणमण्डलेषु गच्छतः। मृगादिषट्कं मकर-कुम्भ-मीन-मेष-वृष-मिथुनेषु वर्तमानौ चन्द्रसूर्यौ उत्तरचारिणौ भवतः, उत्तरतो दक्षिणाहि(भि) गच्छतः(?)।

तत्रापि विशेषमाह—चन्द्रो मासेनैकेन दक्षिणोत्तरचारी भवति। पञ्चदशदिनैर्दक्षिणचारी पञ्चदशैरुत्तरचारी। सपाददिनद्वयमेकैकराश्यवस्थानात् मण्डलकपञ्चदशसद्भावाच्च। सूर्यः पुनर्वर्षेणैकेन भवति। षट्भिर्मासैर्दक्षिणचारी षट्भिर्मासैरुत्तरचारी। एकैकमासं राश्यवस्थानात्।

जैनटिप्पनानुसारेण वर्षस्य दिनानि ३६६। यतः सूर्यस्य चतुरशीत्यधिकशतमण्डलानि दक्षिणोत्तरायणं करणाभ्यां द्विगुणितानि जातानि ३६८। सूर्यः सर्वाभ्यन्तरे मण्डले दिनमेकं तिष्ठति। सर्वबाह्येऽपि मण्डलेऽपि दिनमेकं शेषेषु सर्वेषु गमागमाभ्यां दिनद्वयम्। तेन प्रथमचरमर्थद[दिन]१५/१द्वयन्यूनत्वे ३६६ जातानि। वर्षत्रये मासस्यैकस्य वृद्धिः। तत्र वर्षत्रिके द्वादशतिथयो घटन्ति। मासमध्याद् द्वादशाः तत्र क्षिप्यन्ते, शेषा अष्टादश स्थिताः ताः विभज्य षट्षट्वर्षत्रिके क्षिप्यन्ते। एतेनापि षट्षष्ट्यधिकशतत्रयदिनानि ३६६ जातानि॥७५॥

चन्द्रसूर्ययोर्मण्डलादिस्वरूपमुक्त्वाथ नक्षत्रतारकयोः स्वरूपमाह—

**[मूल] अट्ठेव मंडलाइं, णक्खत्ताणं जिणेहिं भणियाइं।**

**दो मंडलाइं दीवे, मंडलछक्कं च लवणम्मि॥७६॥**

**[वृत्ति]** तत्र नक्षत्राणामष्टावेव मण्डलानि जिनेन्द्रैर्भणितानि। अष्टानां मण्डलानां मध्ये द्वौ जम्बूद्वीपे शेषषट्कं लवणोपरि। परं नक्षत्राणां मण्डलान्यपि पञ्चशतदशोत्तरयोजनानां विष्कम्भक्षेत्रे एव ज्ञेयानि॥७६॥

अथात्र विशेषमाह—

**[मूल] जम्मि पुण मंडलम्मि य, जे णक्खत्ता सया परिभमंति।**

**ते तत्थेव चरंति य, चंदाईणं च उवभोगा॥७७॥**

**[वृत्ति]** यस्मिन् पुनर्मण्डले यानि नक्षत्राणि सदा परिभ्रमन्ति तानि नक्षत्राणि तत्रैव परिभ्रमन्ति, चकारात्

तारा सर्वा अपि निजैकमण्डले परिभ्रमन्ति। नक्षत्रमण्डलस्वरूपं जम्बूद्वीपप्रज्ञप्तिगतं किञ्चिल्लिख्यते—

*कइ णं भंते! नक्खत्तमंडला पण्णत्ता? गो[यमा!] अट्ठ णक्खत्तमंडला पण्णत्ता। जंबूदीवे णं भंते! केवइया णक्खत्तमंडला पण्णत्ता? गो[यमा!] असीसयजोयणं ओगाहेत्ता एत्थ णं दो नक्खत्तमंडला पण्णत्ता। लवणसमुद्दे छ णक्खत्तमंडला पण्णत्ता। उभओ वि अट्ठ भाणिअव्वा। सव्वब्भंतराओ णं भंते! णक्खत्तमंडलाओ केवइयं आबाहे सव्वबाहिरिए णक्खत्तमंडले पण्णत्ते? गोयमा! पंचदसुत्तरे जोयणसए आबाहाए पण्णत्ते।*

प्रथमे नक्षत्रमण्डले अभिजित्-श्रवण-धनिष्ठा-शतभिषक्-पूर्वभद्र{पच}-उत्तरभद्र-रेवती-अश्विनी-भरणी-पूर्वफाल्गुनी-उत्तरफाल्गुनी-स्वाति एभिर्द्वादशैः प्रथमं मण्डलम्(१), पुनर्वसु-मघाभ्यां द्वितीयम् (२), कृत्तिकया तृतीयम् (३), रोहिणी-चित्राभ्यां चतुर्थम् (४), विशाखया पञ्चमम् (५) अनुराधया षष्ठम् (६) ज्येष्ठया सप्तमम् (७) मृगशिर-आर्द्रा-पुष्य-अश्लेषा-मूल-हस्त-पूर्वाषाढोत्तराषाढाभिरष्टमम् (८)।

अथ केषु चन्द्रमण्डलेषु नक्षत्रमण्डलानि भवन्ति?

*एते णं भंते! अट्ठ णक्खत्तमंडला कएहिं चंदमंडलेहिं समोअरंति? गोयमा!। अट्ठ चंदमंडले समोअरंति?। तं पढमे चंदमंडले पढमं ततिए चंदमंडले दुच्चं छट्ठे ततिअं सत्तमे चउत्थं अट्ठमे पंचमं दसमे छट्ठं एक्कारसमे सत्तमं पन्नरसमे अट्ठमं।* इत्याद्यवधार्यम्।

नक्षत्राणि चन्द्रादीनामुपभोग्यानि तत्तन्नक्षत्रराशिपरिवर्तनाद् आदिशब्दात् सूर्यग्रहादीनां ग्रहः।

तथा समवायाङ्गे—

*अट्ठ णक्खत्ता चंदेण सद्धिं पमद्दं जोगं जोएंति। तं [जहा] कत्तिआ रोहिणी पुणव्वसू महा चित्ता विसाहा अणुराहा जेट्ठा।* (सू.८.२)

अस्य वृत्त्येकदेशो यथा—*अष्टौ नक्षत्राणि चन्द्रेण सार्धं प्रमर्दमिति चन्द्रो न तेषां मध्ये*[1] *गच्छतीत्येवंलक्षणं योगं सम्बन्धं प्रयोजयन्ति कुर्वन्ति। अत्रार्थेऽभिहितं लोकश्रियाम्—।*

*पुणव(व्व)सु-रोहिणि-चित्ता मह-जेट्ठ-णुराह-कत्तियविसाहा। चंदस्स उभयजोगा।। त्ति।*

*यानि च दक्षिणोत्तरयोगीनि तानि प्रमर्दयोगीन्यपि कदाचिद्भवन्ति। यतो लोकश्रीटीकाकृतोक्तम्—एतानि नक्षत्राण्युभययोगीनि चन्द्रस्य उत्तरेण दक्षिणेन च युज्यन्ते। कदाचिच्चन्द्रेण भेदमप्युपयान्तीति।*

तथा तत्रैव नवमे स्थाने—

*अभिजिदादि नव न(ण)क्खत्ता चंदस्स उत्तरेण जोगं जोएंति। तं [जहा] अभिजिइ सवणो जाव भरणी य त्ति।*(सू.९.२)

अभिजिदादि नव नक्षत्राणि चन्द्रस्य उत्तरेण योगं योजयन्ति। उत्तरस्यां दिशि स्थितानि

---

१ **चन्द्रो तेषां मध्येन** इति पाठ अभयदेवसूरिकृतटीकायाम्।

दक्षिणाशास्थितचन्द्रेण सह योगमनुभवन्तीति भावः॥७७॥

अथ कानि नक्षत्राणि कति मुहूर्तानि चन्द्रेण सार्धं योजयन्ति?। तत्र प्रथममभिजिदमाह—

**[मूल] अभिइस्स चंदजोगो, सत्तट्ठी खंडिउ अहोरत्ते।**

**ते हुंति नवमुहुत्ता, सत्तावीसं कलाओ य॥७८॥**

**[वृत्ति]** नक्षत्राणां सीमाविष्कम्भः पूर्वापरतश्चन्द्रस्य नक्षत्रभुक्तिक्षेत्रविस्तारः नक्षत्रेणाहोरात्रभोग्यक्षेत्रस्य सप्तषष्ठ्या भागैर्भाजितो विभक्तः समासः समच्छेदः प्रज्ञप्तः। भागान्तरेण तु भज्यमानस्य नक्षत्रसीमाविष्कम्भस्य विषमच्छेदता भवति, भागान्तरेण वक्तुं न शक्यत इत्यर्थः। तथा हि—नक्षत्रेणाहोरात्रगम्यस्य क्षेत्रस्य सप्तषष्ठिभागीकृतस्य एकविंशतिर्भागाः अभिजिन्नक्षत्रस्य सीमाविष्कम्भो भवति। एतावति क्षेत्रे चन्द्रेण सह तस्य योगो व्यपदिश्यते। तदनु अन्यनक्षत्रेण सह योगः। अथ कालसीमा किम्प्रमाणः? यथा तस्यामेव एकविंशतौ त्रिंशन्मुहूर्तत्वादहोरात्रस्य त्रिंशता गुणितायां षट्शतानि त्रिंशदधिकानि ६३०। तेषां सप्तषष्ठ्या भागाहारे यल्लब्धम्। ल(स) सीमा भवति। चन्द्रेण सह तस्यैतत्कालयोगः, सा च नवमुहूर्ताः सप्तविंशतिश्च सप्तषष्ठिर्भागाः ९ २७/६७॥७८॥

अथ पञ्चदश मुहूर्तान्याह—

**[मूल] सयभिसयाभरणीओ, अद्दा-अस्सेस-साइ-जिट्ठा य।**

**एए छ न्नक्खत्ता, पन्नरसमुहुत्तसंजोगा॥७९॥**

**[वृत्ति]** शतभिषक्-भरण्यार्द्राश्लेषा-स्वाति-ज्येष्ठानां षण्णां नक्षत्राणां प्रत्येकं सप्तषष्ठिभागाः त्रयस्त्रिंशद् एकस्य सप्तषष्ठिभागस्यार्धं च ३३.[६७ १/२]। यावच्चन्द्रेण सार्धं क्षेत्रसीमाविष्कम्भो भवति, ततः कालमानाय मुहूर्तगतभागकरणार्थं सार्धत्रयस्त्रिंशता गुण्यन्ते जातं पञ्चोत्तरं सहस्रम् १००५। तच्च सप्तषष्ठिहृतभागैर्यल्लब्धं तदेषां कालसीमा भवति, तच्च पञ्चदशमुहूर्ताः॥७९॥

अथ पञ्चचत्वारिंशन्मुहूर्तान्याह—

**[मूल] तिन्नेव उत्तराइं, पुणव्वसू रोहिणी विसाहा य।**

**एए छ न्नक्खत्ता, पणयालमुहुत्तसंजोगा॥८०॥**

**[वृत्ति]** उत्तराफा[ल्गुनी], उत्तराषा[ढा], उत्तरभा[द्रपदा], पुनर्वसु, रोहिणी, विशाखा एतेषां षट् नक्षत्राणां प्रत्येकं सप्तषष्ठिकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्कानां भागानां शतमेकम् एकस्यार्धं च १०० [१/२] यावच्चन्द्रेण क्षेत्रसीमायोगः। तत्रैषां भागानाम् १०० मुहूर्तगतभागकरणार्थं त्रिंशता गुणने जातानि पञ्चदशोत्तराणि त्रीणि सहस्राणि ३०१५। एतेषां सप्तषष्ठ्या भागे हृते यल्लब्धं तत्कालसीमा भवति। सा च पञ्चचत्वारिंशन्मुहूर्ताः॥८०॥

शेषाणां पञ्चदशनक्षत्राणां मुहूर्तान्याह—

**[मूल] अवसेसा नक्खत्ता, पन्नरस वि हुंति तीसई मुहुत्ता।**

**चंदम्मि एस जोगा, णक्खत्ताणं मुणेयव्वा॥८१॥**

**[वृत्ति]** श्रवणा, धनिष्टा, पूर्वभा[द्रपदा], रेवती, अश्विनी, कृत्तिका, मृग[शीर्षं], पुष्य, मघा, पूर्वफा[ल्गुनी], हस्त, चित्रा, मूल, अनु[राधा], पूर्वाषाढा एतेषां प्रत्येकं परिपूर्णानां सप्तषष्ठिभागानां क्षेत्रसीमाविष्कम्भः ते च सप्तषष्टयः त्रिंशद्गुणिताः २०१० द्वे सहस्रे दशोत्तरे। ते च सप्तषष्ट्या हृता लब्धास्त्रिंशत् ३०। तदेषां कालसीमा। एषां च एकस्य षण्णां षण्णां पञ्चदशानां चेत्येवम् अष्टाविंशतिनक्षत्राणां सप्तषष्ठिभागानामेकत्र मेलनेऽष्टादशशतानि त्रिंशदधिकानि १८३०। तच्च द्विगुणं षट्पञ्चाशन्नक्षत्रैर्भवति सहस्रत्रयं षट्शतानि षष्ठ्यधिकानि ३६६०। यन्त्रम्।१८३० X २=३६६०

| | | |
|---|---|---|
| १ | २१ | २१ |
| ६ | ३३ | २०१ |
| ६ | १०० | ६०३ |
| १५ | ६७ | १००५ |
| २ | १८ | ३० |
| | ३६ | ६० |

सूर्यस्यापि नक्षत्रयोग इमाभिर्गाथाभिर्ज्ञेयो यथा—

***अभिई छच्च मुहुत्ते, चत्तारि य केवले अहोरत्ते। सूरेण समं गच्छइ, एत्तो सेसाण वोच्छामि॥***

***सयभिसया भरणीओ, अद्दा-अस्सेस-साइ-जिट्ठा य। वच्चंति मुहुत्तेक्कवीसं छच्चेवहोरत्ते॥***

***तिन्नेव उत्तराइं, पुणव्वसू रोहिणी विसाहा य। वच्चंति मुहुत्ततिगं, चेव वीसं अहोरत्ते॥***

***अवसेसा नक्खत्ता, पन्नरससूरं सह गया हुंति। बारस चेव मुहुत्ता, तेरस पुन्ना अहोरत्ता॥८१॥***

अथ नक्षत्रतारकाणां मण्डलस्वरूपमाह—

**[मूल] णक्खत्ततारयाणं, अवट्ठिया मंडला मुणेयव्वा।**

**ते वि य पयाहिणेणं, भमंति न हु दाहिणुत्तरया॥८२॥**

**[वृत्ति]** नक्षत्राणाम् अष्टावपि मण्डलानि तारकाणां सर्वाण्यपि मण्डलानि अवस्थितानि स्थिराणि ज्ञातव्यानि। तानि नक्षत्राणि ताश्च तारकाश्च प्रदक्षिणावर्ततया परिभ्रमन्ति। न च दक्षिणोत्तरचारिणः कदापि भवन्ति। यानि उत्तरचारीणि तानि सर्वदा तथैव। यानि दक्षिणचारीणि तान्यपि नक्षत्राणि तत्रैव चरन्ति। न भिन्नभिन्नमण्डलेषु कदापि गच्छन्तीत्यर्थः। किं च ग्रहमण्डलसङ्ख्या तारकमण्डलसङ्ख्या चरमद(चास्मद) वलोकितशास्त्रेषु न दृष्टा तेनात्र न लिखितेति बोध्यम्। ग्रहमण्डलानामस्थिरत्वं, तारकमण्डलानां स्थिरत्वं ज्ञातं तच्च ज्ञापितम्। ग्रहमण्डलानां चारश्च पञ्चशतदशोत्तरे एव ज्ञेयस्तेषां नक्षत्रोपभोगात्॥८२॥

अथान्यद्ग्रन्थसम्बद्धं नक्षत्राणां स्थिरत्वं ज्ञापयति—

**[मूल] बहिमंडलाउ दसमे, चंदस्सब्भंतराउ पुण दसमे।**

**कत्तिय अणुराहाओ, चरंति भणिअं दसमठाणे॥८३॥**

[वृत्ति] चन्द्रस्य सर्वबाह्यमण्डलाद्दशमे मण्डले सर्वाभ्यन्तरात्षष्ठे इत्यर्थः। तत्र सर्वदा कृत्तिका नक्षत्रमवस्थितं परिभ्रमति। तथा सर्वाभ्यन्तरात् मण्डलाद्दशमे सर्वबाह्यात् षष्ठे इत्यर्थः। सदाप्यनुराधा चरति इति भणितं स्थानाङ्गदशमस्थाने॥८३॥

अथ नक्षत्रपटलमध्ये किं बाह्ये किम् उपरि किम् अधश्च किमित्याह—

**[मूल] सव्वब्भंतर अभिई, मूलं पुण सव्वबाहिरे होइ।**

**सव्वोवरिं तु साई, भरणी सव्वस्स हेट्ठम्मि॥८४॥**

[वृत्ति] सर्वेषु नक्षत्रेषु मेरुदिशि अभ्यन्तरेऽभिजित् नक्षत्रं बाह्ये इति लवणदिशि सर्वबाह्यचन्द्रमण्डले इत्यर्थः मूलनक्षत्रं सदाप्यवस्थितं चरति। तत्रान्त्यमण्डलेऽष्टौ नक्षत्राणि सन्ति परं चन्द्रमण्डलं ५६ भागमयम्। नक्षत्रं तु क्रोशद्विकप्रमाणं ततो मण्डलप्रान्ते मूलम्। शेषाणि सप्त तन्मण्डलस्थान्यपि किञ्चिदर्वाग् एवमभिजिदपि ज्ञेयम्। ऊर्ध्वाधश्चतुर्योजननक्षत्रपटले सर्वेषां नक्षत्राणामुपरि स्वातिनक्षत्रं चरति। सर्वेभ्यो नक्षत्रेभ्योऽधस्तनं भरणीनक्षत्रं चरति। ज्योतिष्कपटलविचारः पूर्वाचार्यश्लोकेष्वेवम्।

***शतानि सप्त गत्वोर्ध्वं योजनानां भुवः तलात्।***

***नवतिं च (७९०) स्थितास्तारा: सर्वाधस्तान्नभस्तले॥***

***तारका पटलाद्गत्वा योजनानि दशोत्तरे। सूर्याणां पटलं तस्मादशीतिं शीतरोचिषाम्॥***

***चत्वारि च ततो गत्वा नक्षत्रपटलं स्थितम्। गत्वा ततोऽपि चत्वारि बुधानां पटलं भवेत्॥***

***शुक्राणां च गुरूणां च भौमानां मन्दसञ्ज्ञिनाम्। त्रीणि त्रीणि च गत्वोर्ध्वं क्रमेण पटलं स्थितम्॥***

बहुत्वं चात्र सर्वमनुष्यलोकीयसर्वज्योतिष्कापेक्षया यन्त्रकम्—

| तारा | सूर्य | चन्द्र | नक्ष. | बुध | शुक्र | बृह. | मङ्ग. | शनि |
|---|---|---|---|---|---|---|---|---|
| ७९० | १० | ८० | ४ | ४ | ३ | ३ | ३ | ३ |

सर्वमीलने जातम् ११०। इदं तूर्ध्वाधः प्रमाणम्। तिर्यक् तु पञ्चशतदशोत्तरे चारे एव नक्षत्राणि चन्द्रसूर्यग्रहाणामुपभोगात्॥८४॥

अथ तारकाणां स्वरूपमाह—

**[मूल] एगारस इगवीसीहिं आरओ जोयाणहिं मंदरओ।**

**निय इक्कमंडलेसुं, चरंति ताराउ नरलोए॥८५॥**

[वृत्ति] एकादशशतानि एकविंशत्यधिकानि ११२१ योजनानि मेरुं परतो दूरे विमुच्य तारकाः

परिभ्रमन्ति। स्वकीयस्वकीयमण्डले एव चरन्ति प्रदक्षिणया। इदं तु तारकाणां ज्ञेयं चन्द्रसूर्यग्रहनक्षत्राणां मेरुतो ४४८२० योजनैर्दूरे समन्ताद्भ्रमणम्। नैतेभ्यो योजनेभ्योऽर्वाग् समागमनं भवति। तारकाणां मण्डलसङ्ख्या न लब्धास्ति।

अन्तरं तु कथ्यते। अन्तरं द्विधा—व्याघातजं निर्व्याघातजं च। तच्च व्याघातजमपि द्विधा—उत्कृष्टं जघन्यं च। तत्रोत्कृष्टव्याघाते पर्वतादि स्खलने मेरुमपेक्ष्य भावनीयम्। यथा मेरुर्दशयोजनसहस्राणि तस्य चोभयतोऽबाधया प्रत्येकम् एकविंशत्यधिकानि एकादशशतानि ११२१। ततः सर्वमीलने योजनानां द्वादशसहस्राः द्वे च शते द्विचत्वारिंशदधिके १२२४२ उत्कृष्टव्याघातजमन्तरम्। जघन्यं तु निषधकूटाद्यपेक्षं यथा निषधपर्वतः स्वतोऽप्युच्चैश्चत्वारियोजनानि। तस्य चोपरि पञ्चयोजनशतोच्चानि कूटानि तानि चायामविष्कम्भाभ्यां मूले पञ्च पञ्च योजनशतानि ५००, मध्ये त्रीणि शतानि पञ्चसप्तत्यधिकानि ३७५, उपरि चार्धतृतीयानि योजनशतानि २५०। तेषां कूटानाम् उपरितनश्रेणिप्रदेशे तथाजगत्स्वाभाव्याद् अष्टावष्टौ योजनान्युभयतोऽबाधया कृत्वा ताराविमानानि परिभ्रमन्तीति जघन्यतो व्याघातजमन्तरं द्वे योजनशते षट्षष्ट्यधिके २६६। निर्व्याघातं तु उत्कृष्टं क्रोशद्वयम्, जघन्यं च पञ्च धनुःशतानि तारतारयोरन्तरम्। उक्तं हि सङ्ग्रहिण्याम्—

***तारस्स य तारस्स य, जंबूदीवम्मि अंतरं गुरुयं। बारसजोयणसहसा, दुन्निसया चेव बायाला॥***

***छावट्ठा दो य सया, जहन्नमेयं तु होइ वाघाए। निव्वाघाए गुरुलहु, दो गाउ य धणुसया पंच॥***

तथा—ध्रुवपार्श्ववर्तिनस्तारा ध्रुवमेव परिभ्रमन्ति मेरुं परितो न परिभ्रमन्ति॥८५॥

अथ नवत्यधिकसप्तशते यथा तारारूपं तथाग्रे तारापटलमस्तीत्याह—

[मूल] **समभूतलाउ अट्ठहिं, दसूण जोयणसएहिं आरब्भ।**
**उवरिदसुत्तरजोयणसयम्मि चिट्ठंति ताराओ॥८६॥**

[वृत्ति] समात् मेरुमध्यस्थिताष्टप्रदेशात् मेरुरुचकसमानाद् भूतलात् नवत्यधिकसप्तशतयोजनेभ्य आरभ्याधस्तनं तारारूपं ज्योतिषं चारं चरति। तत एवाधस्तनतारारूपाद् दशोत्तरं योजनमुपरितनं तारापटलं चरति। यत उक्तं समवायाङ्ग-जीवाभिगम-जम्बूद्वीपप्रज्ञप्त्यादिषु नवमे स्थाने समवायाङ्गे यथा—

***इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ नवजोयणसए उड्ढं आबाहाए उवरिल्ले तारारूवे चारं चरति।***

एतावता दशोत्तरं यावत्सर्वत्र सम्भाव्यते॥८६॥

अथ लवणसमुद्रे षोडशसहस्रप्रमाणायां शिखायां ज्योतिष्काणां चरतां कथं न व्याघातस्तदाह—

[मूल] **जोइसियविमाणाइं, सव्वाइं भवंति फालियमयाइं।**
**दगफालिआमया पुण, लवणे जे जोइसविमाणा॥८७॥**

[वृत्ति] लवणशिखाव्यतिकरस्त्वेवं विशेषमार्गरूपो नीचनीचतरभूप्रदेशो गोतीर्थमिव गोतीर्थम्। तच्च

लवणे उभयतः पञ्चनवतियोजनसहस्राणि। तत्रादौ जम्बूद्वीपधातकीखण्डजगत्योः समीपतः समभूभागापेक्षया उण्डत्वम्[१] उपरि च जलवृद्धिः प्रत्येकमङ्गुलसङ्ख्येयभागः। ततः परं क्रमादध ऊर्ध्वं च प्रदेशानां वृद्ध्या वृद्ध्या पञ्चनवतिसहस्रान्ते समभूतलापेक्षयाधोऽवगाहो योजनसहस्रम् १००० तदुपरि च जलवृद्धिः सप्तयोजनशतानि ७०० ततः परं मध्यभागे दशयोजनसहस्राणि रथचक्रवालविस्तीर्णीभूतसमजलपदा दूर्ध्वं षोडशसहस्राण्युच्चा सहस्रम् एकमधोऽवगाढा लवणशिखा भवति। तस्य चोपर्यहोरात्रमध्ये द्वौ वारौ किञ्चिन्न्यूने द्वे गव्यूते जलम् अधिकमधिकं पातालकलशगतवायोः क्षोभादुपशमाच्च वर्धते हीयते चेति। उक्तं हि क्षेत्रसमासे—

***पंचाणउइसहस्सा, गोतित्थं उभयओ वि लवणस्स।***
***जोयणसयाण सत्तउ, उदगपरिवुड्ढि उभओ वि॥***
***दसजोयणा सहस्सा, लवणसिहा चक्कवालओ रुंदा।***
***सोलससहस्स उच्चा, सहस्समेगं च ओगाढा॥***
***देसूणमद्धजोयण, लवणसिहोवरि दगं दुवे काले।***
***अइरेगं अइरेगं, परिवड्ढइ हायए वावि॥***

चन्द्रसूर्यादि सर्वेषां ज्योतिष्काणां विमानानि सर्वाणि स्फटिकमयानि। यानि तु पुनर्लवणसमुद्रे शिखाचारीणि ज्योतिष्कविमानानि तानि तथाजगत्स्वाभाव्याद् उदकस्फटिकानि। तेषां चलतां लवणशिखाचारि द्विधा विभज्यते। पश्चाद्गमनानन्तरं पुनर्मिलति। लवणशिखा षोडशसहस्रोच्चा ज्योतिषां चारो नवशते एव ज्ञेयम्। सर्वेषां ज्योतिष्काणां विमानानि अर्धकपित्थाकाराणि स्थापना यथा—  । विमानं चेह प्रमाणाङ्गुलेन योजनैकषष्ठिभागा बुद्ध्या विधीयते। तत्र क्रमेण समवृत्तत्वाच्चन्द्रविमानानामायामो विस्तारश्च षट्पञ्चाशद्भागा एवं सूर्यविमानानामष्टचत्वारिंशद्भागाः ग्रहविमानानां त्रिंशद्भागाः द्वे गव्यूते क्रोशद्वयमित्यर्थः। नक्षत्रविमानानाम् एकं क्रोशम्। ताराविमानानामर्धक्रोशम् उच्चत्वे त्वर्धम्। तथा हि चन्द्राणां विमानान्युच्चत्वेऽष्टाविंशतिः एकषष्ठिभागाः, सूर्याणां चतुर्विंशतिः, ग्रहाणां क्रोशम्, नक्षत्राणामर्धक्रोशं धनुःसहस्रमित्यर्थः १०००, ताराणाम् आयामविष्कम्भाभ्यां पञ्चधनुःशतानि। उच्चत्वेऽर्धतृतीयानि धनुःशतानि २५०। यदुक्तं तत्त्वार्थभाष्ये—

***सर्वोत्कृष्टास्तारा पञ्चधनुःशतानि विष्कम्भार्धबाहुल्याश्च भवन्तीति।***

ज्योतिष्काणां विमानानां वर्णविभागो यथा—ताराः पञ्चवर्णाः शेषाश्चत्वार उत्तप्तकनकवर्णाः ज्ञेयाः॥८७॥

अथ मनुष्यलोकबहिर्वर्तमानानां ज्योतिषां स्थितिस्वरूपमाह—

**[मूल] बहिया रयणी दिवसा, अवट्ठिया चंदसूरनाएण।**
**अभिजिइ जोए चंदा, सूरा पुण पुस्सजोएण॥८८॥**

---
१ उंडुं इति भाषायाम्।

**[वृत्ति]** मनुष्यलोकाद्बहिः रात्रिदिवसा अवस्थिताः सन्ति। कोऽर्थः? यत्र स्थाने दिवसस्तत्र सर्वकालं दिवस एव मध्याह्नकालतुल्यः। यत्र रात्रिस्तत्र सर्वदा रात्रिरेव। केन न्यायेन? चन्द्रसूर्यन्यायेन। यथा चन्द्रसूर्या अवस्थिताः तथा रात्रिदिवसा अप्यवस्थिता इत्यर्थः। तथा अभिजिन्नक्षत्रयोगे सर्वे चन्द्राः सर्वदा चन्द्रसमीपेऽभिजिन्नक्षत्रम् इत्यर्थः। सूर्याः पुनः पुष्यनक्षत्रयोगे पुष्यनक्षत्रं तेषां समीपे इत्यर्थः। असङ्ख्याता अपि चन्द्रसूर्या इत्थमेव। तत्रान्यानि नक्षत्राणि सन्ति, परं चन्द्रसूर्येभ्यो दूरे न कदापि समीपे समागमनं तेषामपि स्थिरत्वात्। एवं ग्रहास्तारकाश्च स्थिरा ज्ञेयाः। एषां विमानानां मानं चरज्योतिष्कादर्धं ज्ञेयम्। चन्द्राणामष्टाविंश तिरेकषष्ठिभागा आयामो विष्कम्भश्च, उच्चत्वे चतुर्दश। सूर्याणो(णां) चतुर्विंशतिः आयामतो विष्कम्भतश्च, उच्चत्वे द्वादशभागाः। ग्रहाणां क्रोशमेकम्, उच्चत्वेऽर्धम्। नक्षत्राणामर्धम्, उच्चत्वे चतुर्थांशः। ताराणां क्रोशचतुर्थांशो आयामतो विष्कम्भतश्च, उच्चत्वेऽष्टमांशः। किञ्च बहिस्थचन्द्रसूर्याणां पङ्क्तिविषये बहूनि मतानि सन्ति। तान्यत्र ग्रन्थगौरवभयान्न लिखितानि। सङ्ग्रहणीवृत्त्यादिभ्यो ज्ञेयानि॥८८॥

अथोपसंहारमाह—

**[मूल] एसो वियारलेसो, जोईसियमंडलाणमिह भणिओ।**
**इत्थ य विसेसभावा, नेआ जोइसकरंडाओ॥८९॥**

**[वृत्ति]** एष विचारलेशः चरज्योतिष्कमण्डलानामिह ग्रन्थे मया भणितः। अत्र च विशेषभावाः विशेषार्थाः ज्योतिष्ककरण्डकसूत्रादिभ्यो ज्ञेयाः। आदिशब्दाज्ज्योतिः(तिष्क)करण्डवृत्ति १ जीवाभिगमसूत्रवृत्ति २ विशेषणवतीवृत्ति ३ सङ्ग्रहणीवृत्ति ४ क्षेत्रसमाससूत्रवृत्ति ५ चन्द्रप्रज्ञप्तिसूत्रवृत्ति ६ सूर्यप्रज्ञप्तिसूत्रवृत्ति ७ जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्त्यादयो ग्राह्याः॥८९॥

**[मूल] तवगणगयणदिणेसरसूरीसरविजयसेणसुपसाया।**
**विणयकुसलेण लिहिओ, सरणत्थं सपरगाहाहिं॥९०॥**

**[वृत्ति]** स्पष्टा।

गुरुतमतपगणपुष्करसूर्यश्रीविजयसेनसूरीणाम्। राज्ये रचिता टीका करबाणरसेन्दु १६५२ मितवर्षे॥१॥
मूलत्राणाह्वपुरे स्वोपज्ञा निजपरार्थमिह कृतिभिः। शोध्यानुग्रहबुद्ध्या येनेयं भवति सुपवित्रा॥२॥

॥इति मण्डलविचारकुलकवृत्तिसमाप्ता॥

ग्रन्थाग्रं श्लोकसङ्ख्यया ८४५।

शुभं भवतु॥ श्रीः॥

## ॥परिशिष्टं पञ्चमम् (अ)॥

आ.श्रीमुनिचन्द्रसूरिविरचितः

# ॥चन्द्रसूर्यमण्डलविचारः॥

॥श्रीसर्वज्ञाय नमः॥

इह दीवे दुन्नि रवी, दुन्नि अ चंदा सया पयासंति।
चुलसीसयमन्नेसिं, मंडलमन्नेसिं पन्नरस॥१॥
दो जोअणंतराइं, सूराण ससीण पुण पणतीसा[१]।
तीसमिगसट्ठिभागा, चउरा तस्सत्तभागा य॥२॥

(टी.) सूर्याणां[२] योजनद्वयम्। शशिनो योजनानि-३५.३०/६१, ४/७

मंडल[३]मंतरमेअं, रवीण पणसट्ठि मंडला दीवे।
तत्थ बिसट्ठी निसढे, तिन्नि य[४] बाहाइ[५] तस्सेव॥३॥
चंदाणं निसढि च्चिअ, मंडल पण गुरूवएसि दीसंति।
सेसाइं मंडलाइं, दुण्णि वि जलहिस्स मज्झम्मि॥४॥
रविदुगभमणवसाओ, निप्फज्जइ मंडलं इहं एक्कं।
तं पुण[६] मंडलसरिसं ति[७] मंडलं वुच्चइ तहा हि॥५॥
गिरिनिसढनीलवंतेसु उग्गयाणं रवीण कक्कम्मि।
पढमाउ चेव समया[८], ओसरणेणं जओ भमणं॥६॥
ता[९] नो निच्छयरूवं, निप्फज्जइ मंडलं दिणयराणं।

---

१ **पंचतीसा य।** इति जैविभा। एवं इ प्रतौ।
२ **रवेः** इ प्रतौ।
३ **संतत** इति जैविभा। एवं इ प्रतौ।
४ **ऊ** इति जैविभा।
५ **बाहाउ** इ प्रतौ।
६ इति नास्ति इ प्रतौ।
७ **य** इत्यधिकम् इ प्रतौ।
८ **समयाओ** इ प्रतौ।
९ **तो** इ प्रतौ।

**चंदाण वि एवं चिअ[१], निच्छयओ मंडलाभावा॥७॥[२]**

**इह छच्चिअ दसभाए, जंबुद्दीवस्स[३] दुन्नि दिवसयरा।**

**ताविंति दित्तलेसा, अब्भिंतरमंडले संता॥८॥**

**चत्तारि अ दसभागे, जंबुद्दीवस्स दुन्नि[४] दिवसयरा।**

**ठाविंति[५] मंदलेसा, बाहिरए मंडले संता॥९॥**

अस्य[६] गाथायुगलस्य[७] व्याख्या—

**एगारस अडतीसे[८], वज्जित्तु सयाइं दीवपरिहीए।**

**सेसे दसहिं विभत्ते[९], जं लद्धं तं इमं होइ॥१०॥**

**इगतीस सहस्साइं, सयाइँ स[१०]ट्ठाहिआइं तह पंच।**

**चउप[११]न्न सट्ठिभागा, छहिं गुणणे अंसछेआणं[१२]॥११॥**

(टी.) अर्धभागरूपाणां षड्भिर्गुणने जातम्- ९४५२६.४२/६०

तओ एयस्स रासिस्स तिगुणत्ते अद्धे य[१३] कए एयं[१४] संपज्जइ—

**सीआलीस सहस्सा, दो अ सया जोअणाण तेवट्ठा।**

**इगवीस सट्ठीभागा[१५], कक्कडमाइम्मि पि[१६]च्छ नरा॥१२॥**

---

१ **चिय** इ प्रतौ।

२ क. प्रतौ अस्या गाथायाः पूर्वोत्तरार्धयोर्व्युत्क्रमो दृश्यते।

३ **जम्बुद्दीवम्मि** इ प्रतौ।

४ **दोवि** इ प्रतौ।

५ **तावंति** इ प्रतौ।

६ **अथास्य** इ प्रतौ।

७ **अथास्य गाथायुग्मस्य** इति जैविभा। गाथाद्वयस्य इति इ प्रतौ।

८ **अडतीसा** इ प्रतौ।

९ **विहित्ते** इ प्रतौ।

१० **अ** इ प्रतौ।

११ **व** इ प्रतौ।

१२ **अंसछेअयाणं** इ प्रतौ।

१३ य इति नास्ति इ प्रतौ।

१४ **एवं** इ प्रतौ।

१५ अत्र पत्रस्य जीर्णत्वेन लिखितापि टीप्पणिर्न दृश्यते।

१६ **पे** इ प्रतौ।

एवं[१] चेव य दुगुणं, उभओ पासेसु ताव खित्तेसु।
एवं[२] चेव य सव्वं, द[३]ट्ठव्वं बीअरविणा वि॥१३॥
एवं सेसरवीण य, पयासखित्तं दसंसकप्पणया।
ता नेयं जाव, चर[४]मो पुक्खरदीवड्ढभाणु त्ति॥१४॥

एयं च—

